॥ श्रीः ॥

चौखम्बा–संस्कृत–ग्रन्थमाला

ग्रन्थ–संख्या ६

नं० २५, २७.

* श्रीः *

भाट्टचिन्तामणिः

[तर्कपादः]

भट्टकुलावतंस महामहोपाध्याय श्रीगागाभट्टेति प्रसिद्धनामधेय-
श्रीविश्वेश्वरसुधी विरचितः ।

न्यायव्याकरणाचार्य मीमांसकशिरोमणि काशीस्थराजकीयप्रधानसंस्कृत
पाठशालाध्यापक पं० श्रीसूर्यनारायणशुक्लेन स्वकृतया मयूख-
टिप्पण्या प्रभाख्यया सूत्रवृत्त्या च सह सम्पादितः ।

प्रकाशकः—
जयकृष्णदास हरिदासगुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस सिटी ।

१९३३

भूमिका ।

सुविदितमेवेदं समेषां विदुषां यद् 'धर्मो रक्षति रक्षितः' इत्यभियुक्तोक्त्या धर्म एवास्माकं परमं शरणम् । स च धर्मो वेदैकसमधिगम्य इति वेद एव सर्वासु विद्यासु प्रधानमन्याश्च सर्वा अपि विद्यास्तत एवाविर्भूता इति वेदार्थनिर्णयाय त्रैवर्णिकानां प्रवृत्तिमुपलक्ष्य भगवान् जैमिनिमहर्षिः 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अन्वाहार्ये च दर्शनादि'त्यन्तां द्वादशलक्षणीं मीमांसां प्रणिनाय ।

सा च पाणिनिगुरोर्वर्षस्य कनिष्ठभ्रात्रोपवर्षेण रचितया वृत्त्या मण्डितापि कालक्रमेण मनुष्याणां बुद्धिमान्द्याद् दुरधिगमा संवृत्तेति श्रीमान् शबरस्वामी भाष्यनिर्माणव्याजेन शून्यवादं विज्ञानवादं च निराकरिष्यन् भाष्यमभाषत् । तदपि भाष्यं किंचित्कालानन्तरं दुरधिगमं व्याख्यातृभिरन्यथा व्याख्यातं च दृष्ट्वा श्रीकार्तिकेयावतारः कुमारिलमूर्त्याऽवतीर्य श्लोकवार्तिकतन्त्रवार्तिकटुप्टीकाभिर्व्याख्यानैर्याथार्थ्येन भाष्यरहस्यार्थं प्रकाश्य तदानीं बौद्धतमोभिराच्छादितं सनातनधर्मपथं निराकुलं चकार । तदनु पार्थसारथिप्रभृतिभिर्महारथैः समये समये मीमांसाशास्त्रं व्याख्यातमभूदिति नः परमा प्रमोदपरम्परा ।

तेष्वेव महारथेषु अयं नः प्रकृतग्रन्थनिर्माता दिनकरभट्टतनूजः (गागाभट्टापरनामधेयः) विश्वेश्वरभट्टो नाम, एतस्य स्थितिविषये च १५७९ शाके काश्यामेकस्मिन् धार्मिकविषये विवादमधिकृत्य प्रवृत्तं व्यवस्थापत्रं प्रमाणम् तद्यथा—

अथ देवर्षिविप्राणां काश्यां श्रीमुक्तिमण्डपे ।
यतिमिश्रविपश्चिद्भिः सद् ब्राह्मण्यं विविच्यते ।।

तत्र तावत्पूज्यपादपरमहंसपरिव्राजकमहाराष्ट्रकार्णाटककोंकणतैलङ्गद्राविडादिसकलज्ञातीयविद्वद्गृहस्थनिचयसंमत्या वेदशास्त्रलोकतो विमृश्य देवर्षिब्राह्मणा वेदशास्त्रपुराणेतिहासेभ्योऽधिगतपरमार्थाः क्रतुयजनयाजनादिसदाचरणशीलाः पङ्क्तिपावनाः शरीरान्वयार्हा अत्युत्तमब्राह्मण्यशालिनः शिष्टानुष्ठितशरीरान्वयाश्चेति सिद्धान्तितम् । दृष्टं चैतत्—

भट्टमीमांसकश्रीमद्रघुनाथाख्यसूरिभिः ।
मणिकर्णीत्युपाख्यस्यानन्तभट्टस्य कन्यका ।।
देवर्षेः प्रसमुद्वाह्य वाजपेययजिः कृता ।
भूयांसश्चेदृशा अन्ये तद्वंशीया वयं च ते ।।
ब्रुवाणा दोषमत्रार्थे विद्वद्भिः परिशोधिते ।
विश्वेशद्रोहिणो ब्रह्मघातिनश्च भवन्ति ते ।।

इति दिक् । लिखितं चैतन्मीमांसकभट्टलक्ष्मणेन विद्वदनुज्ञातेन ।
संवति कृतकगाब्द १७१४ संमितौ नंदशैलशरभू १५७९ मितशाके ।
हेमलम्बशरदि समपत्रं ज्ञायते सकलभूसुरवृन्दैः ।।

सम्मतोऽयमर्थः—पूर्णेन्द्रसरस्वती, व्यासेन्द्र, भट्टनीलकण्ठ, चक्रपाणिपण्डित शेष, आडवाशुक्ल, कालोपनामगोविन्दभट्ट, वापूव्यास, मौनीगोपीभट्ट, रघुदेवभट्टाचार्य, दशपुत्रगोविन्दभट्ट, विनायकशुक्ल, टेंकालोपाख्यवापूभट्ट, विद्वांसोपाख्यवहिरवभट्ट, गणेशदीक्षित, दातारविश्वनाथ, कोवाइ वासुदेव, आरडे इत्युपनाम नारायण भट्ट, गद्रारनृसिंह भट्ट, पायसनृसिंह भट्ट, वडेरुतमभट्ट, कुंडलीघाऊ भट्ट, ब्रह्मेन्द्र सरस्वत्याख्ययति नृसिंहाश्रम, अनन्तदेव, गागाभट्ट, साम्राज्यपण्डित, भय्याभट्ट, गोविन्दभट्टाचार्य बालकृष्णदीक्षित, वीरेश्वरशुक्ल, हरिशंकरकोडरे, तुलसीदेवभट्ट, चण्डीभैरव, मनोहर विश्वनाथ, अप्पयदीक्षित, रामह्रदस्थढुण्ढिराज, भास्करज्योतिर्विद्, महाशब्दोपाख्यज्योतिर्विद्, नगरकरकृष्णभट्ट, वैशम्पायन गिरिधरभट्ट, खरोपनामक गणेशभट्ट, गौतमरामभट्ट, चिन्तामणिभट्टद्रोण, कविमण्डनबालकृष्णभट्ट, कालबाण्डे वीरेश्वरभट्ट, पाटणकरविष्णुदीक्षित, शिवरामतीर्थ, नारायणतीर्थ, खण्डदेव, मीमांसक अनन्तभट्ट, लक्ष्मणपण्डितवैद्य, चैतन्यमाधवदेव, रामरामभट्टाचार्य, रामह्रदस्थगोमाजीभट्ट, डाऊगणेशदीक्षित, वापूदीक्षित, पालशेतकर ज्योतिर्विन्नारायण, दामोलकर ज्योतिर्विद्विठ्ठल, भावेरुद्र दीक्षित, काशीसोमयाजी, लक्ष्मणसोमयाजी, महाशब्देदेवभट्ट, घुमरेमहादेवभट्ट, पोलकाशीभट्ट, सच्चिदानन्दसरस्वती तिलभाण्डेश्वर, मौनीविष्णुदीक्षित, नरहरिदीक्षित, विष्णुदीक्षित, लक्ष्मणदीक्षित, दीनदीक्षित, नमूदीक्षित, वाछाभट्ट, पौराणिकगदाधर, जयरामन्यायपञ्चानन, भारद्वाजमहादेव साठे, महादेवपोटे, प्रभृतीनाम् ।

एतादृशमेव व्यवस्थापत्रं १५०५ शकेऽपि विद्वद्भिर्दत्तं यत्र च भावागणेशप्रमुख चिपोलणे, कृष्णभट्टप्रमुखकहाडे, शेषकृष्णभट्ट प्रमुखमहाराष्ट्र, गोपीभट्टप्रमुखगुर्जर, विद्यानिवासभट्टाचार्य प्रमुखगौड, रघुपत्युपाध्यायप्रमुखतैलमुक्त, प्रभृतीनां हस्ताक्षराणि सन्ति ।

इति व्यवस्थापत्रदर्शनेन सुस्पष्टमिदमवगतं भवति यद् विश्वेश्वरापरनामधेयगागाभट्ट, खण्डदेव, नागेशभट्टगुरुरामरामभट्टाचार्याः १७१४ सवत्सरे अष्टादशशताब्द्यामासन् । गागाभट्टस्यैव शिष्यो मीमांसाशास्त्राब्धिमन्दरः मीमांसाकौस्तुभभाट्टरहस्यभाट्टदीपिकाप्रणेता खण्डदेवः आसीदिति श्रूयते । अत्र च भाट्टदीपिकाप्रारम्भे 'विश्वेश्वरं नमस्कृत्य खण्डदेवः सतां मुदे' इति पद्यमुपोद्वलकम् । गागाभट्टनिर्मितो ग्रन्थो भाट्टचिन्तामणेरतिरिक्तः सूत्रवृत्तिरूपः कुसुमाञ्जलिरतीति 'इदं गुरुमतं तु मद्विहितसूत्रवृत्तौ मया विचार्य कुसुमाञ्जलौ बहु च दूषितं भूषितम्' इति पद्यादवगम्यते इति ।

यद्यपि मीमांसाशास्त्रे शास्त्रदीपिकाभाट्टदीपिकाप्रभृतयः सन्तिः भूयांसो

ग्रन्थाः प्रमेयबहुलाः तथापि भाट्टचिन्तामणिस्तावत्सर्वानप्यतिशेते तथाहि अत्र तार्किकाणां शाब्दिकानां गुरुमुरारिकुमारिलप्रस्थानभेदभिन्नमीमांसकानां च मतं साधूपपादितं मीमांसायां लक्षणानां परिष्कारप्रणाली एतदुपज्ञमेव प्रवृत्ता खण्डदेवेनोपबृंहिता। मीमांसकानां शाब्दबोधप्रणाली मीमांसकाभिमताः पदार्थाश्च सम्यगत्रोपपादिताः सन्ति इति न मादृशैरेतद्गाभीर्यं परिच्छेतुं शक्यं किं पुनर्वर्णयितुमिति सहृदया एव प्रमाणम्।

अयं च भट्टचिन्तामणेस्तर्कपादः पूर्वमस्मद्गुरुवरभूतपूर्ववाराणसेय-हिन्दूविश्वविद्यालयसाहित्यप्रधानाध्यापक व्याकरणसाहित्याचार्य श्रीचन्द्रधर-शर्ममहोदयानां परमगुरुभिर्जगद्विख्यातवैदुष्यैः बालशास्त्रिमहोदयैः पण्डितपत्रे संशोध्य प्रकाशितः तदनन्तरं तात्याशास्त्र्यपराभिधानरामकृष्णशास्त्रिमहोदयै शोधयित्वा बाबूश्रीहरिदासगुप्तेन चौखम्बसंस्कृतमालायां प्रकाशितः। सांप्रतं बाबू श्रीहरिदासगुप्तात्मजबाबू श्रीजयकृष्णदासगुप्तमहोदयेन प्रार्थितोऽहमेत-च्छोधने प्रवृत्त इति एतस्य क्वचित्तार्किकैः क्वचिच्छाब्दिकैः क्वचिन्मीमांसकैश्च दुरधिगमतामाकलय्य भाट्टचिन्तामणिमयूखनामकटिप्पणीं विरचय्य सहैव सम्पादितवानस्मि। सूत्राणामर्थबोधाय च सरला संक्षिप्ता एका वृत्तिरपि सहैव मुद्रिता अस्ति। संभावये यदनेन मीमांसकानां कश्चिदुपकारलेशो भवेत्।

इदं च परमं प्रमोदस्थानं यद्भाट्टचिन्तामणिः संपूर्णोऽत्यन्तदुरधिगमोऽपि बाबू श्रीजयकृष्णदासमहोदयेन समासादितः झटिति भाट्टचिन्तामणिमयूख-टीकया समेतः श्रीमतां दृष्टिपथमधिगमिष्यति।

सांप्रतं विदुषामनुरोधेन भाट्टचिन्तामणेस्तर्कपादमात्रं प्रकाश्यते।

भाट्टचिन्तामणितर्कपादस्य शोधनसमये महामहोपाध्यायपूज्यपाद श्रीनि-त्यानन्दपर्वतीय महोदयैश्शोधितं पुस्तकमुपकरोतिस्म। अथाऽपि दृष्टिदोषजा अशुद्धयो ग्रन्थे सन्त्येवति शुद्धिपत्रेण संशोध्य विद्वांसः पठिष्यन्तीति प्रार्थये विद्वद्वरान्।

भूमिकायामुद्धृतस्य व्यवस्थापत्रस्योपलब्धिः सरस्वतीभवनहस्तलिखित-पुस्तकालयाध्यक्ष साहित्याचार्य श्रीनारायण शास्त्रिखिस्ते महोदयेभ्यो जातेति तदर्थं तेभ्यः शतशो धन्यवादाः।

अग्रिमोऽपि भाट्टचिन्तामणेर्भागः झटितिप्रकाशमेष्यतीति निवेदयन् प्राचीनाखि-दुर्लभ चौखम्बा—काशीसंस्कृतग्रन्थमलाद्यनेक पुस्तकप्रकाशने बद्धपरिकराणां स्वर्गीय बाबूहरिदासगुप्तात्मज जयकृष्णदासगुप्तप्रभृतीनामुत्साहमवेद्य प्रस-न्नचेतसा श्रीमन्तमुमारमणमेतेषां सर्वविधोन्नत्यर्थं प्रार्थये।

इति विदुषां वशंवदः

सूर्यनारायण शर्मशुक्लः

भाट्टचिन्तामणेस्तर्कपादस्य विषयानुक्रमणिका ।

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ०	प०
सप्रकारक	शब्दप्रकारक	९	३०
बाह्येन्द्रिय	बाह्यैकेन्द्रिय	१६	१७
दर्शनाद्देशान्तरे	दर्शनादेकदेशान्तरे	२३	१५
पञ्चरूपत्व	पञ्चरूपोपपन्नत्व	२६	३१
व्यापकत्वाग्राहक	व्यापकत्वग्राहक	२७	२२
आलोकवान्र्वत	आलोकवान्पर्वत	२९	३०
प्रतिज्ञादेतुभ्या	प्रतिज्ञाहेतुभ्या	३१	१४
विगमने	निगमने	३१	१५
भिरव	भिरेव	३१	१६
निरययव	निरवयव	३२	५
प्रतिबन्धो न	प्रतिबन्धेन	३२	१८
त्रिवक्षतिरेद्दृष्टे	विवेक्षतिरदृष्टे	३६	१
ऽबाधित	बाधितत्वे च	३७	१९
तदैच्छत्	तदैक्षत	३८	२५
पुरुरुप	पुरुरूप	३९	२२
पश्यति	पश्यते	३९	२५
बीजभावेन	बीजाभावेन	४२	२३
भोगनेति	भोगेनेति	४३	२७
श्रुद्धिजनकम्	शुद्धिजनकम्	४४	१८
योगजन्यं	यागजन्य	४६	२१
न्नाक्तोतिप्रसङ्गो	नोक्तातिप्रसङ्गो	६०	८
रूढः प्राबल्य	रूढेः प्राबल्य	६०	१५
शचादि	शौचादि	६४	५
रित्याहुः	रित्याह	७७	२४
कापारस्य	व्यापारस्य	८१	५
पारक्षीणे	परिक्षीणे	८९	३२
शक्त्यभावन	शक्त्यभावेन	९०	३२

इति शुद्धिपत्रम् ।

श्रीगणेशाय नमः ॥

भाट्टचिन्तामणिः ॥

अधिसरयूतटिनीतटमधिसाकेताङ्गणमधितदुद्यानम् ।
खेलन्नीरदनीलो बालो मे मानसे सदा भूयात् ॥ १ ॥
सारं यच्छ्रुतिशिरसामगोचरं यन्मनोवचसाम् ।
तत्कौशल्यावचसां शिक्षापात्रं महो वन्दे ॥ २ ॥
विश्वामित्रकुलध्वजः समभवद्यो भट्टनारायण-
स्तद्वंशस्य करीरतां दधदयं विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालनाद्-
मीमांसाम्बुनिधिं प्रमथ्य चिनुते श्रीभाट्टचिन्तामणिम् ॥ ३ ॥
गुरोरथ कुमारिलस्य मुरविद्विषोपि श्रम-
क्रमो न सफलोऽभवद्भवति तत्र कस्योद्यमः ।
स साहसमिति प्रथामवितथां प्रकर्तुं ममो-
द्यमोयमिति चिन्तयन् बुधजनः परि क्षाम्यतु ॥ ४ ॥

अथातो धर्मजिज्ञासा ॥ १ ॥

अनेन सूत्रेण विषयप्रयोजनकथनद्वारा शास्त्रारम्भकर्तव्यता प्रतिपाद्यते । कर्तव्यपदाध्याहारेण जिज्ञासापदे विचारलक्षणया च वेदाध्ययनानन्तरं वेदाध्ययनहेतुको धर्मज्ञानेच्छाप्रयोज्यो धर्मप्रमाफलको विचारः कर्तव्य इति सूत्रार्थः ।

तेन विचारहेतुसूत्रसमुदायरूपशास्त्रस्य धर्मज्ञानप्रयोजनकता धर्मविषयकता चोक्ता । सम्बन्धोपि प्रतिपाद्यप्रतिपादकभावः ।

वेदाध्ययनहेतुकता चाधीतवेदस्य "धर्मेण पापमपनुदति" इत्यादिवाक्येभ्यः । सामान्यतो धर्मज्ञानस्य विशेषधर्मप्रकारकज्ञानेच्छाहेतुत्वात् । तथाहि । "धर्मेण" इति वाक्येन सामान्यतो धर्मज्ञाने तदुत्तरं तदनुव्यवसाये धर्मज्ञानत्वसामान्यप्रत्यासत्त्या, सकलधर्मज्ञानज्ञानम् । घटत्वसामान्यप्रत्यासत्त्या, नीलघटादिज्ञानवत् । ततस्तद्विषयकेच्छेति क्रमेण, सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकेच्छाप्रयोजकत्वम् ।

सा चेच्छा सप्रमाणकधर्मज्ञानं जायतामित्याद्याकारिका, तादृशेष्ट-

साधनताज्ञानजन्या च । तादृशज्ञानज्ञानं च धर्मज्ञानत्वसामान्यलक्षणप्रत्यासत्त्येति । तेन चाधीतवेदोऽधिकारी प्रदर्शितः ।

इदं च सूत्रं स्मृतिरूपं स्वसूचितन्यायानुग्राह्यप्रमाणसापेक्षं चेत्यध्ययनविधिमूलकम् । तेनापि वेदाध्ययनानन्तरं तदर्थज्ञानाय विचारविधानात् । तथाहि ॥ स्वाध्यायोऽध्येतव्य इत्यत्राध्ययनकरणकभावनायामर्थज्ञानं भाव्यम् कर्मानुष्ठानौपयिकत्वेन पुरुषार्थत्वादिति । स्वर्गार्थत्वमिति चेन्न अदृष्टार्थत्वापत्तेः । नाप्यक्षरग्रहणम् । पुरुषार्थानुबन्धित्वात् । व्याकरणादीनां वेदाङ्गत्वोपपत्तेश्च ।

अङ्गत्वं कार्यजनने सहकारित्वं, तच्च वेदाध्ययनस्यार्थज्ञानार्थत्वे उपपद्यते । व्याकरणादीनां वेदार्थज्ञानोपयोगित्वात् । स्वर्गार्थत्वे वा तदनुपयोगात् । वेदाध्ययनमिष्टजनकदृष्टार्थकम् अर्थवद्विषयकविहिताध्ययनत्वात् अङ्गाध्ययनवदित्यनुमानात् अत्र स्तोभाध्ययने व्यभिचारवारणाय अर्थवद्विषयकेति । विषमन्त्राध्ययने व्यभिचारवारणाय विहितेति । अतोऽर्थज्ञानं भाव्यम् । न चार्थज्ञानस्य भाव्यत्वेऽनध्यायादिनियमानां स्वरूपकार्ययोरनुपयोगादध्ययनाङ्गत्वानुपपत्तिः । कार्योपयोगाभावेपि विघ्ननिवारणार्थत्वेन स्वरूपोपयोगित्वात् । नियमापूर्वे उपयोगाच्च ।

कर्मार्थकतव्यप्रत्ययस्तु सम्बन्धमात्रे लाक्षणिकः । विषं भुनक्ति सक्तून् जुहोतीतिवदनीप्सितकर्मत्वपरो वा ।

ईप्सितकर्मत्वपरत्वेपि स्वाध्यायकर्मकभावनाविशिष्टतत्करणभावनाविधित्वेनैतस्य विधेरर्थज्ञानभाव्यकत्वमिति कश्चित् ।

अत्र स्वाध्यायत्वं स्वशाखात्वम् । स्वत्वञ्च परम्परयाऽध्ययनविषयत्वमनुष्ठानविषयत्वं च । तेन वेदत्रयान्तर्गतैकैकशाखापरः स्वाध्यायशब्दः । तनाध्ययनानुष्ठानयोः स्वपरम्परापरिगृहीताध्ययनानुष्ठानविषयत्वोपपत्तिः । तत्रेतिकर्तव्यतापेक्षायां योग्यतया विचार इतिकर्तव्यतात्वेन सम्बध्यत इति विचारकर्तव्यतासिद्धिः । एवं च "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योर्थम्" "योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मे" त्यर्थाभिज्ञतदनभिज्ञनिन्दास्तुती(१) उपपद्येत इति वार्तिकाकारादयः ॥

पितृचरणास्तु प्रोक्षणादिविधावपूर्वसाधनत्वेन व्रीहीणामिवात्रापि

गुरोः श्रीमाधवार्यस्य श्रीमद्रामानुजस्य च ।
वचः स्मृत्वा तथा नत्वा टिप्पणी प्रवितन्यते ॥ १ ॥

(१) अभिज्ञस्य स्तुतिः अनभिज्ञस्य निन्देत्यर्थः ।

प्रयोजनवदर्थज्ञानजनकत्वेन स्वाध्यायस्यैव भाव्यत्वं, वेदार्थज्ञानस्य द्रव्यप्राप्तिप्रतिष्ठौपयिकत्ववत्कर्मानुष्ठानौपयिकत्वमिति लोकसिद्धं पुरुषार्थत्वं, (१)द्रव्यार्जनवत् । अतोयं विधिः प्रतिग्रहादिनियमवदध्ययननियमार्थः ।

नन्वध्ययननियमस्य निषेधेषु नोपयोगः, अध्ययनेनैव विध्यर्थं जानन् विधेयानुष्ठानेन फलमाप्नुयादितिवदध्ययनेनैव निषेधार्थं जानन् निषेध्यानुष्ठानेन प्रत्यवेयादिति कल्पनायां निषेधाध्ययने प्रवृत्त्ययोगादिति चेत् ।

न—तत्रागत्याऽध्ययनेनैव निषेधार्थमजानन् प्रत्यवेयादिति कल्पनात् । न चैतावता ऽदृष्टार्थकत्वं, नापि विनियोगभङ्गः यदेव विद्यया करोतीति वाक्यं तु अर्थज्ञानस्य नाङ्गताबोधकं, किं तु श्रद्धोपनिषज्जन्यज्ञानार्थवादः । अस्तु वा यत्करोतीति वैदिककर्मसामान्यमुद्दिश्य विद्यापदलक्षितार्थज्ञानविशेषनियमार्थः सन्नङ्गताबोधकः, व्रीहिविधिवत् । तथापि न क्रत्वपूर्वार्थज्ञानजनकत्वेनैवोद्देश्यता, येनाध्ययनस्याङ्गता स्यात् , स्याच्च प्रकरणापेक्षा । स्वाध्यायस्योद्देश्यत्वादेव तद्गतैकत्वाविवक्षया वेदानधीत्येत्यादिस्मृतेरेतन्मूलकत्वेन तन्मूलश्रुत्यन्तरकल्पनागौरवम् । तेनार्जनविधिवद् अर्थज्ञानजनकत्वेनैवोद्देश्यतेति अर्थज्ञानफलकविधिर्विचारकर्तव्यताक्षेपक इत्याहुः ॥

तेनार्थज्ञानपर्यन्तं गुरुकुलवासो विचारकरणं चाध्ययनविधेः फलम् । क्रत्वधिकारानियमाच्च । तथाहि । वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमित्यादिवाक्यैर्ब्राह्मणाद्यङ्गत्वेनोपनयनं विधीयते । अष्टवर्षं ब्राह्मणमुपनयीतेत्यादिवाक्येषु ब्राह्मणाद्युद्देशेनाष्टवर्षत्वादिविधिः तत्सन्निधिपठितश्चाध्ययनविधिः कर्तृसापेक्षः कार्यापेक्षानुपनीतानेव कर्तॄन् गृह्णाति इत्यध्ययनविधिप्रयुक्ताध्ययनजन्यार्थज्ञाने त्रैव-

---

(१) ब्राह्मणस्य द्रव्यार्जने प्रतिग्रहयाजनाध्यापननानि । श्रुतानि तत्र संशयः किमेतद्द्रव्यसंपादनं क्रत्वर्थमुतपुरुषार्थम् तत्र पूर्वपक्षः क्रत्वर्थमेतत् स्यादर्जनोपायानां नियतत्वात् पुरुषप्रीतिस्तु यथाकथंचिदर्जितेनापि द्रव्येण संभवान्नियमस्य नैरर्थक्यात् क्रतौ तु नियमापूर्वं परमापूर्वोपयोगीति सार्थको नियमः इति ॥ सिद्धान्तस्तु द्रव्यार्जने रागत एव प्रवृत्तेस्संभवेन तत्र विधेर्नापेक्षा । किञ्च क्रत्वर्थत्वे जीवनाभावात्क्रतुरेव न सिद्ध्येत् पुरुषार्थत्वे तु ऐहिकप्रीतिकारिभोजनादिवत् क्रतोरामुष्मिकप्रीतिकारितया पुरुषार्थेष्वन्तर्भावात्क्रत्वर्थत्वमप्यार्थिकं सिध्यति, उपायनियमस्तु उपायान्तरेषु प्रत्यवायविवक्षयोपपद्यत इति द्रव्यार्जनं पुरुषार्थम् तद्वदध्ययननियमोऽपि पुरुषार्थ एवेति भावः ।

र्णिकानामेव सिद्धे क्रतुविधयो ऽर्थज्ञानोपायाक्षेपकत्वाभावलाघवस- हकृता ब्राह्मणादिपरा एव भवन्तीति शूद्रादेरुपनीतकर्तृकाध्ययनज- न्यार्थज्ञानरूपाङ्गसम्पादनासमर्थस्य नाधिकारः। तमध्यापयीतेति स- न्निधिसिद्धोपनीतकर्तृकत्वानुवादः। यद्वा उपनयनाध्यापनवाक्ययोः प्रयोजकव्यापराविवक्षया उपगमनाध्ययनाविधिः। अष्टवर्षो ब्राह्मण उपगच्छेत्सोऽधीयीतेति शाखान्तरीयत्वेन स्वाध्यायविधेर्नानर्थक्यम्। कर्मणां नित्यतया उपनयनाध्ययनयोः फलतो नित्यत्वम्।

यद्वा—

ब्रह्मक्षत्रविशां काल औपनायनिकः परः।
अत ऊर्ध्वं पतन्त्येते यथाकालमसंस्कृताः॥

इति वाक्येन अनधीयाना व्रात्या भवन्तीति निषेधेन च नित्यत्वसिद्धिः

अधीतवेदस्य प्रयोजनवत्त्वं चेत्थमवसेयम्। विधीनां प्रवृत्ति जनकप्रवर्तनाज्ञानम्, अर्थवादानां प्राशस्त्यज्ञानं, मन्त्राणां विशिष्टार्थ स्मरणं, नाम्नां कर्मभेदो गुणफलोपबन्धः सङ्कल्पलाघवं च, साम्नाम- क्षराभिव्यक्तिः, स्तोभानां सामकालपूर्त्तिः, उपनिषदां पारलौकिकफल ककर्मप्रवृत्तिजनकशरीरव्यतिरिक्तजीवात्मज्ञानं क्रमज्ञानादि च यथेष्ट- मूहनीयम्।

एवमङ्गानां वेदोपकारकत्वम्। तच्च शिक्षायाः स्वरादिनिश्च- यद्वारा, कल्पस्य शाखान्तरसन्दिग्धविध्युपसंहारद्वारा न्यायलभ्या- र्थतात्पर्यनिर्णयद्वारा च, व्याकरणस्य वैदिकोहविज्ञानद्वारा, छन्द- सां वैदिकवाक्यपरिमाणद्वारा, ज्यौतिषस्य वैदिककर्मप्रयोगोपयोगिति- थ्यादिज्ञानद्वारा।

अधीतवेदजन्यार्थज्ञानोपयोगित्वाद् शास्त्रारम्भसिद्धिर्वैधी। अधि- करणं च पञ्चाङ्गम्।

विषयः संशयश्चैव पूर्वपक्षस्तथोत्तरः।
प्रयोजनं च पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥

प्रयोजनं सङ्गतिश्चेति क्वचित्पाठः। तच्चेत्थम्। अध्ययनविधिर्विषयः। वेदाध्ययनोत्तरं धर्माधर्मज्ञानफलकविचारविधायको न वेति संशयः। अध्ययनस्य गुरुमुखोच्चारणपूर्वकोच्चारणरूपत्वात्तस्य (१)विश्वजिद्व-

(१) "विश्वजिता यजेत" इति श्रुत्या विश्वजिद्यागो विहितः तत्र पुंसः प्रवृत्तिसिद्धये किंचित्फलं कल्प्यमिति 'स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्' इति सूत्रेण सर्वाभिलाषा स्पदत्वेनाश्रुतोऽपि स्वर्गः फलं तद्वदध्ययनविधावश्रुतोऽपि स्वर्गः फलमिति भावः।

द्वत्स्वर्गार्थत्वादधीत्य स्नायादिति स्नानविधिना न कर्तव्य इति पूर्वपक्षः । उक्तयुक्त्या ऽध्ययनविधेरर्थज्ञानपर्यन्ततया तस्य विचारमन्तरेणासम्भवात्कर्त्तव्यः । स्मृतिस्त्वध्ययनकरणकभावनोत्तरकालं स्नानमिति व्याख्येया । श्रुत्यनुरोधादिति सिद्धान्तः । प्रयोजनं स्पष्टम् । एवमग्रेऽप्यधिकरणानि द्रष्टव्यानि । तथा च सिद्धं धर्मज्ञानाय शास्त्रमारम्भणीयमिति । तज्ज्ञानं च स्वरूपप्रमाणसाधनप्रयोजनविचारद्वारेणेति तच्चिन्ता । एवं सूत्रे अकारप्रश्लेषेणाधर्मचिन्ताया अपि शास्त्रे विषयत्वमुक्तम् ॥

अत्र जैमिनेर्विघ्नाभावनिश्चयाद् ग्रन्थादौ न मङ्गलाचरणे प्रवृत्तिरिति जीर्णाः ॥

वस्तुतस्तु अतः पदेन अध्ययनहेतुत्वोक्तेरानन्तर्यस्याप्यर्थप्राप्तत्वादथशब्दानर्थक्यापत्त्या अथशब्दो मङ्गलार्थकः । तत्त्वं च समाप्तिविघ्नध्वंसान्यतरहेतुत्वेन विहितत्वम् । विधायको वेदस्त्वाचारानुमेयः । न च (१)नास्तिकग्रन्थकादम्बर्यादावन्वयव्यतिरेकव्यभिचारेण मङ्गलस्य तद्धेतुत्वेन विधिर्न संभवतीति वाच्यम् । व्यभिचारस्य हेत्वन्तरप्रयुक्ततया श्रुतिबोधितहेतुत्वबोधकत्वाभावाद्विघ्नसमसङ्ख्याकमङ्गलत्वेन कारणत्वकल्पनाद्वेति जीर्णाः ।

समाप्तेर्बुद्धिप्रतिभादिदृष्टसामग्रीजन्यतया मङ्गलाजन्यत्वेन विघ्नध्वंसहेतुत्वेन विहितत्वं मङ्गलत्वमिति मणिकृत् ॥

अत्र चिन्तयन्ति । विघ्नध्वंसस्य न भाव्यता, अपुरुषार्थत्वात् । न च समाप्तिजनकत्वेन तस्य पुरुषार्थता । समाप्तौ विघ्नसंसर्गाभावस्यैव जनकतया ध्वंसस्याजनकत्वात् । अन्यथा विघ्नात्यन्ताभाववदारब्धस्य समाप्तिर्न स्यात् । इष्टसाधनत्वभाव्यत्वयोः समानप्रकारकत्वनियमात् । न च विघ्नसंसर्गाभावस्य भाव्यता । अत्यन्ताभावप्रागभावयोर्ध्वंसवदजन्यत्वेन संसर्गाभावत्वस्य भाव्यतानवच्छेदकत्वात् । अतोऽदृष्टद्वारा मङ्गलस्य बुद्धिप्रतिभादीनां च दृष्टद्वारा समाप्तिजनकत्वम् ।

यदि (२)चोपवापकर्मत्वेन तुषाणामन्वये तादृशनियमस्य व्यभिचार

---

(१) नास्तिकग्रन्थे मङ्गलरूपकारणाभावेऽपि समाप्तिरूपकार्यदर्शनेन व्यतिरेकव्यभिचारः । कादम्बर्यां मङ्गलरूपकारणसत्त्वेऽपि समाप्तिरूपकार्यादर्शनेनान्वयव्यभिचार इति तत्त्वम् ।

(२) 'पुरोडाशकपालेन तुषानुपवपति' इति कपाले तुषधारणं श्रुतम् । तत्र 'कपा-

इति विभाव्यते तदा कीर्णकरप्रतिपत्तिकर्मत्वातिरिक्तकर्मत्वान्वये ताहशनियमाद्विघ्नध्वंसत्वस्य भाव्यतावच्छेदकत्वानुपपत्तिरेव । अदृष्टकल्पनागौरवं तु विघ्नध्वंसस्य फलत्वेपि मङ्गले पूर्वोत्तराङ्गोपसंहृतये तुल्यमिति दिक् ॥

चोदनालक्षणोर्थो धर्मः ॥ २ ॥

अनेन सूत्रेण धर्मस्वरूपं तत्प्रमाणं चोच्यते ।

न तावद्यागापूर्वोभयनिष्ठा धर्मत्वं जातिः । यागस्य क्रियेच्छान्यतररूपतया क्रियात्वेनेच्छात्वेन च सङ्करात् । अतोऽपूर्वनिष्ठैव सुखकारणतावच्छेदिका धर्मत्वं जातिरिति नैयायिकाः ॥

अपूर्वमजानतामपि यागादिकर्तरि धार्मिक इति प्रयोगाद्वेदबोधितेष्टसाधनत्वरूपो यागापूर्वोभयनिष्ठापोधिरेव धर्मत्वमिति केचित् ॥

(१)वस्तुतस्तु अलौकिकश्रेयः साधनत्वेन विहितक्रियात्वं अलौकिकश्रेयः साधनत्वेन विहितत्वं वा धर्मत्वम् । सोमादिष्वङ्गत्वेन विहितेष्वतिव्याप्तिवारणाय तृतीयान्तम् ।

अलौकिकत्वं च वेदतदुपजीविप्रमाणातिरिक्तप्रमाणागम्यत्वे सति प्रमितिविषयत्वम् ।

वेदत्वं च न मुख्यवेदप्रयोगविषयत्वं, शाखासमुदायत्वं वा, शाखात्वस्य वेदैकदेशत्वरूपतया आत्माश्रयात् । नापि सन्दिग्धकर्तृकवाक्यत्वम् । वादिनोः सन्देहाभावेन मध्यस्थसन्देहस्य वादिपञ्चावयवाक्यप्रयोगजन्यतया तत्र पक्षतावच्छेदकज्ञानाभावेनान्योन्याश्रयात् । अतो मन्त्रत्वब्राह्मणत्वव्यापकजातिविशेषो वेदत्वमिति केचित् ।

तदपि पौराणमन्त्रब्राह्मणत्वव्यापकपुराणत्वे ऽतिव्याप्तेर्न युक्तम् । शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दाजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वमिति चिन्तामणिः ।

लेषु श्रपयति' इति विहितं श्रपणं यथा कपालसंपादनस्य प्रयोजकं तथा तुषोपवापोऽपि प्रयोजकः कपालेनेतितृतीयया कपालस्य तुषवापार्थत्वावगमादिति पूर्वपक्षः सिद्धान्तस्तु पुरोडाशकपालेनेति सविशेषणनाम्ना यत्कपाल पुरोडाशश्रपणायासादितं तस्य कपालस्य सासाधनत्वं तथा सति प्रथमं श्रपणेन कपालं प्रयुज्यते न च प्रयुक्तस्य पुनस्तुषवापेन प्रयुक्तिस्संभवति तस्माच्छ्रपणेनप्रयुक्तं कपालं तुषोपवापेऽपि प्रसङ्गात्सिध्यति ईदृशमेवाङ्गत्वं तृतीयाश्रुत्या बोध्यते इत्यधिकरणस्वरूपम् ।

(१) तदुक्तं तन्त्रवार्तिके—द्रव्यक्रियागुणादीनां धर्मत्वंस्थापयिष्यते । तेषामैन्द्रियकत्वेऽपि न तादूप्येण धर्मता इति ।

अत्र लौकिकवाक्येऽतिव्याप्तिवारणाय सत्यन्तं, घटादिवारणाय द्वितीयं, स्मृतिपुराणादिवाक्येष्वतिव्याप्तिवारणाय शब्दाजन्येति । तादृशेश्वरीयज्ञानजन्यत्वाद्वेदस्य लक्षणसमन्वयः ।

अपौरुषेयवाक्यत्वं वेदत्वं अपौरुषेयत्वं च पौरुषेयभिन्नत्वम् । पौरुषेयत्वं च न तावत्स्वतन्त्रपुरुषप्रणीतत्वम् स्वातन्त्र्यस्य निर्वक्तुमशक्यत्वाद्, व्यर्थविशेषणत्वात्, पठ्यमानभारतेऽव्याप्तेश्च । नापि शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्यजातीयत्वं तत् पठ्यमानभारते अव्याप्तिवारणाय तज्जातीयेति । महाभारतादावसम्भवात् । सर्वस्यैव शब्दजन्यवाक्यार्थज्ञानजन्यत्वात् । तदुच्चारणेच्छाजन्यवाक्यत्वं, तदर्थधीजन्यवाक्यत्वं वा, सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं वा, स्मृतिपुराणादिष्वव्याप्तिवारणाय सजातीयेति । एतादृशपौरुषेयत्वाभावस्य वेदे सत्त्वात् । तथा च सिद्धमपौरुषेयं वाक्यं वेद इति । उपपादयिष्यते चेदमुपरिष्टात् ।

अनिष्टसाधनकलञ्जभक्षणादौ(१) व्यभिचारवारणाय श्रेयः पदम् । अपूर्वे व्यभिचारवारणाय विहितेति । तत्त्वं च विधिविषयभावनान्वयित्वम् । तेन फलसाधनत्वेन विहितक्रियाद्रव्यगुणादीनां धर्मत्वम् । एतेन विहितक्रियाजन्यत्वमपूर्वनिष्ठमेव धर्मत्वमित्यपास्तम् । (२)धर्मः क्षरति कीर्तनादित्यादौ तु लाक्षणिकः प्रयोगः ।

एवं च "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणी"ति ।

"इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो (३)धर्मः, इति निर्धारणषष्ठ्यपि सङ्गच्छते ।

न चैवं श्येने धर्मत्वापत्तिः, इष्टत्वात् । प्राणवियोगरूपहिंसायाः श्येनफलत्वेन श्येने हिंसात्वाभावान्निषेधाप्रवृत्तेरधर्मत्वायोगात् । तदुक्तम्

हिंसा हि फलमेतेषां भिन्ना तेभ्यः स्वरूपतः ।
सा हि प्राणवियोगात्मा श्येनस्तत्रासिवत्पृथक् ॥

यदि च प्राणवियोगानुकूलव्यापारस्य हिंसात्वमुपेयते, तदाप्यदृष्टाद्वारकव्यापारस्य हिंसात्वात् श्येने तदभावः सुवचः । अस्तु वा हिंसात्वं, तथाप्यग्नीषोमीयहिंसावद्विधेयतया, निषेधाप्रवृत्तेर्धर्मत्वोपप

(१) न कलञ्जं भक्षयेदिति निषिद्ध कलञ्जभक्षणादावित्यर्थः ।

(२) कर्मनाशाजलस्पर्शात्करतोयातिलङ्घनात् । गण्डकीबाहुतरणादिति आदिमं पादत्रयम् ।

(३) 'यद्योगेनात्मदर्शनम्' इति चतुर्थः पादः । इज्यादीनां धर्मत्वे एव निर्धारणषष्ठ्युपपद्यते यतश्च निर्धारणमिति सजातीयनिर्धारणे एव षष्ठीविधानादितिभावः

त्तिः। यागे रागादङ्गे वैधी प्रवृत्तिरित्यादि प्रभाकरवचनं निर्युक्तिकत्वादनादेयम्। यदि च तत्र हिंसात्वाभावेप्यदृष्टद्वारकमरणानुकूलव्यापारस्याभिचारत्वेन—

"अभिचारमहीनं च त्रिभिः कृच्छ्रैर्विशुध्यति"

इति स्मृत्याऽभिचारस्य निषिद्धतया तत्राधर्मत्वं विभाव्यते। तदा तस्यान्यतररूपेण धर्मत्वेपि न क्षतिः।

अलौकिकपदेनैव, विवाहार्थमिथ्यावादस्य विधेयत्वेपि, धर्मत्वं व्यावर्त्यते। तस्य विवाहमात्रसाधनतया तदभावात्। अत एवं "पञ्चानृतान्याहुरपातकानी"ति पातकत्वाभावमात्रं तत्र, न तु धर्मत्वम्। उपनिषज्जन्यात्मज्ञानस्याविद्यानिवृत्तिद्वारा मोक्षजनकस्य प्रमाणान्तरप्राप्तत्वाभ्नालौकिकत्वमिति न तत्र धर्मत्वम्। अस्तु वा तत्र धर्मत्वम्। निषेधबोधितालौकिकानिष्टसाधनत्वमधर्मत्वम्।

इदमप्यवधेयम्। स्वप्नकृतगङ्गास्नानादीनां मिथ्यात्वेपि श्रेयः साधनतया धर्मत्वम्।

यस्यां यस्यामवस्थायां यद्यत्कर्म करोति यः।
तस्यां तस्यामवस्थायां तत्तत्फलमुपाश्नुते॥

इति वचनात्। अतः सिद्धं क्रियादीनां धर्मस्वरूपत्वम्।

एतत्प्रमितिकरणं वेदः। तत्रापि प्राधान्येन विधिनिषेधौ।

ननु कोयं विधिस्तेन च कथमलौकिकश्रेयः साधनत्वबोध इति चेत्।

अत्र केचित्। लिङादिश्रवणे प्रवृत्तिर्जायत इति लिङादिज्ञानं प्रवृत्तिसामग्रीजनकम्। सा च कृतिसाध्यत्वप्रकारकेच्छारूपा चिकीर्षा, तज्जनकज्ञानं च लिङादिभिर्जन्यते, तच्चेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वज्ञानम्। अन्यतराभावे प्रवृत्त्यजननात्। अतो लिङादिज्ञानेन त्रितयज्ञानजननात् त्रितयेपि शक्तिः। (१)पुष्पवन्तशब्दवद्युगपदर्थत्रयस्य बोधः। अन्वयश्च तेषां विधेयधात्वर्थे। एवं च यागादिनिष्ठेष्टसाधनताबोधाद्धर्मे प्रामाण्यं, निषधेष्वपि क(२)लञ्जभक्षणादावनिष्टसाधनत्वबोधादधर्मे प्रामाण्यमिति केचित्॥

---

(१) एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरावितिकाशात् दिवाकरनिशाकरयोरेकशक्तिसत्वात् युगपदर्थद्वयबोधः।

(२) कलञ्जेति। शूल्यं मांसं कलञ्जमिति केचित्। विषदिग्धवाणाहतमृगमांसं कलञ्जमित्यन्ये। पलाण्डुः कलञ्जमिति परे। वस्तुतस्तु कलञ्जं रक्तशुनम्। 'कलञ्जपलाण्डुपारीरकाः' इत्यापस्तम्बधर्मसूत्रेव्याख्याने हरदत्तेन, वीरमित्रोदये वीरमिश्रेण, कलञ्जं रक्तलशुनमिति व्याख्यातत्वादिति।

मीमांसकास्तु विधेः प्रवर्तनायां शक्तिः । शब्दजन्यप्रवृत्तौ प्रवर्तनाज्ञानस्य हेतुत्वात् । प्रवर्तनाज्ञानस्य प्रवृत्तिहेतुत्वम्, अहमेनं प्रवर्तयामि आचार्यो मां प्रवर्त्तयतीत्यनुभवात् । न च तत्रेष्टसाधनत्वज्ञानमेव प्रवर्त्तकम् । अनिष्टसाधनेपि आचार्यप्रवर्त्तितोहं करोमीत्यनुभवात् ।

प्रवर्तना च परनिष्ठप्रवृत्तिहेतुः प्रवर्त्तकधर्मः । प्रवर्त्तकधर्मत्वं चाहमेनं प्रवर्तयामीति देवदत्तस्त्वां प्रवर्तयति नाहमित्यादिप्रतीतिसाक्षिकं, भोजनस्य स्वनिष्ठप्रवृत्तिहेतुत्वेन प्रवर्तनात्ववारणाय परनिष्ठेति प्रवृत्तिविशेषणम् । आचार्यत्वादिवारणाय प्रवृत्तिहेतुरिति । प्रवृत्तिहेतुलिङादिवारणाय धर्मत्वं समवेतत्वं बोध्यम् । स च धर्मो लोके इच्छादिरूपो वेदे तु तदसम्भवाल्लिङादिनिष्ठोऽलौकिकः कल्प्यते । प्रवृत्तिजनकत्वं च प्रवृत्तिविषयेष्टसाधनताज्ञानजननद्वारेत्याक्षिप्तेष्टसाधनताबोधकत्वात् सिद्धं विधेः प्रामाण्यम् । एतच्च नियोज्यन्वायवादे स्फुटीकरिष्यते ।

एवमर्थवादानामपीष्टसाधनयागविशेष्यकलक्षितप्राशस्त्यप्रकारकप्रमितिजनकत्वेन भावनाविशेष्यकप्राशस्त्यादिप्रमितिजनकत्वेन वा प्रकारांशे अनधिगतार्थगन्तृत्वं विशेष्यांशे धर्मप्रमाजनकत्वं चोपपदानीयम् ।

एवं मन्त्राणां निर्वापाग्न्यादिस्मारकत्वेनानधिगतार्थगन्तृत्वरूपप्रामाण्यासम्भवेपि अविसंवादिफलकत्वमेव प्रामाण्यमिति जीर्णाः ॥

अङ्गताविधिकल्पनद्वारेष्टसाधननिर्वापादिविशेष्यकमन्त्रप्रकारकप्रकाश्यतादिसंसर्गकप्रमाप्रयोजकत्वेनोभयोपपत्तिरिति सोमेश्वरः ॥

प्रयाजादिमन्त्रादिविशिष्टेन भावयेदिति प्रयोगविध्यर्थे पदार्थे पदार्थविधया प्रामाण्यमिति मिश्राः ॥

वस्तुतस्तु मन्त्राणां मन्त्रवाक्यार्थबोधजनकत्वेनैव प्रामाण्यं निर्वापाग्न्यादिसंसर्गस्यानाधिगतत्वेनानाधिगतार्थगन्तृत्वोपपत्तेः । इष्टसाधननिर्वापस्य विशेष्यत्वाद्धर्मप्रामाण्योपपत्तेश्च । यदि च स्वसमानाधिकरणस्वाव्यवहितपूर्वक्षणवृत्तिज्ञानाविषयाविषयकत्वरूपमनाधिगतार्थकत्वं विभाव्यते तदा सुतरां स्मारकत्वेऽपि प्रामाण्योपपत्तिः एवं नाम्नां सप्रकारकप्रमितिजनकत्वेन प्रामाण्यम् ॥

तस्य निमित्तपरीष्टिः ॥ ३ ॥

धर्मे वेदः प्रमाणमित्युक्तं, तत्सम्भवति नवेति परीक्षा, प्रत्यक्षादीनां धर्मप्रामाण्यासम्भवेनिरूपणद्वारा क्रियत इत्यर्थः । किं नाम प्रामाण्यं प्रमाकरणत्वम् ।

ननु किं प्रमात्वम्। उच्यते-यथार्थानुभवत्वम्। याथार्थ्यञ्च तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानत्वम्, भ्रमवारणाय विशेष्यकान्तम् रजतविशेष्यकद्रव्यत्वप्रकारकज्ञाने रजतत्वप्रमात्ववारकं तत्प्रकारकमिति।

नच रङ्गरजतयो रजतरङ्गप्रतीतेः प्रमात्वापत्तिः, ज्ञानैक्येन तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोः सत्त्वादिति वाच्यम्। तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वस्य विवक्षणात्। तत्रापि येन सम्बन्धेन तद्वत्त्वं तेन तत्प्रकारकत्वं बोध्यम्। अतो न समवायेन लोहितः स्फटिक इति ज्ञानेऽतिप्रसङ्गः। न चैवं पाकरक्ते इदानीं श्यामरूपवानिति प्रतीतेः प्रमात्वप्रसङ्गः। यदवच्छिन्नेत्यस्य विवक्षितत्वात्। रूपप्रकारताया वर्त्तमानकालावच्छिन्नरूपवद्विशेष्यकत्वानवच्छेदकत्वात्॥

अन्ये तु अयं विनाशीत्यादौ मतुपो वर्तमानार्थत्वासम्भवेन सम्बन्धार्थकत्ववदत्रापि सम्बन्धार्थकत्वादव्याहतमेव प्रमात्वमित्याहुः॥

निर्विकल्पकस्य तु भ्रमप्रमोभयबहिर्भूतत्वमेवाकरे व्यक्तम्। अस्तु वा तस्यापि प्रमात्वं, विशेष्यावृत्त्यप्रकारकत्वस्यैव प्रमात्वात्। अत्र ज्ञानत्वघटितमेव प्रमात्वं सुवचं, तथापि तस्य स्मृतिसाधारण्येन तत्कारणस्य प्रमाणान्तरतापत्त्यानुभवत्वघटितमेवानुमन्यन्ते सांप्रदायिकाः।

अनुभवत्वस्य जातित्वेन ज्ञानत्वाघटितत्वान्न गौरवमित्यन्ये।

वस्तुतस्तु ज्ञानत्वघटितमेव तल्लाघवात्। न च स्मृतिकारणस्य प्रमाणान्तरतापत्तिः। इष्टत्वात्। निर्युक्तिकप्रवादस्य हेयत्वात्। अत एव मन्त्राणां स्मारकत्वेऽपि प्रामाण्यम्।

अनुभवत्वं च स्मृतिभिन्नज्ञानत्वं, स्मृतिजनकतावच्छेदकजातिविशेषो वा। न च स्मृतौ निश्चयत्वेन ज्ञानत्वेन वा जनकतेति वाच्यम्। गौरवात्, बहुतरानियताजनकवृत्तित्वाच्च। न च स्मृतितोऽपि स्मृतिजननान्नानुभवत्वेन स्मृतिहेतुतेति वाच्यम्। प्रथमानुभवस्यैव संस्कारद्वारा तत्र हेतुत्वात्। न च स्मरणेनानुभवजन्यसंस्कारनाशात्स्मरणोत्तरमस्मरणप्रसङ्गः। चरमस्मृतेरेव तन्नाशकत्वकल्पनात्। अतोऽनुभवत्वेन स्मृतिजनकता। संस्कारं प्रति तु उपेक्षान्यनिश्चयत्वेन। संशयात्संस्काराजननान्निश्चयेति। समानप्रकारकस्मृतेरेव संस्कारनाशकत्वकल्पनात्समूहालम्बनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः। उद्बोधकसमवधानस्यैव तत्तत्स्मृतिजनकत्वात्। उपेक्षात्वं च प्रवृत्तिनिवृत्त्यजनकज्ञानत्वम्। तादृशेन संस्कारानुपपत्तेः सर्वसम्मतत्वात्। उपेक्षान्यत्वञ्च उपेक्षात्वात्यन्ताभाववत्वम्। तेनांशे उपेक्षात्मकस्यांशेऽनुपेक्षात्मकस्य सुवर्णतृणे इति ज्ञानस्याद्यांशेन संस्कारजनकत्वमप्रत्यूहम्। तदंशे

ज्ञातत्वाभावसत्त्वात् । इदं रजतमिति ज्ञाने प्रकारांशे प्रमात्वाभावव· । अतोऽनुभवत्वं जातिः ।

वस्तुतः संस्कारं प्रति उपेक्षान्यसंशयान्यानुभवत्वेन स्मृति प्र· ज्ञानत्वेन जनकता, नातः षण्डसंस्कारकल्पनेति युक्तम् । एवं च ःकारजनकतावच्छेदकतयाऽनुभवत्वजातिसिद्धिरिति ।

संस्कारश्च सविषयकः । अन्यथा घटविषयकानुभवस्य स्वजन्यसं· ारसम्बन्धेनस्मृतिहेतुत्वे घटत्वप्रकारकानुभवात् तद्विशेष्यकस्मर· ापत्तिः । अतः समानप्रकारकसमानविशेष्यकसंस्कारस्य तादृशस्मृति हेतुत्वान्नानुपपत्तिः । एवं च स्मृतिजनकतावच्छेदके ऽनुभवत्व· ाप्रवेशेन लाघवम् । समानविशेष्यकसमानप्रकारकत्वेनैव स्मृतिजन· वादिति दिक् ॥

स्मृतित्वं च ज्ञातविषयकज्ञानत्वं, संस्कारजन्यज्ञानत्वं वा । एवं ज्ञातविषयकं बाधकज्ञानरहितज्ञानं प्रमेति फलितम् । अनेनैवाशये· गृहीतग्राहित्वं प्रामाण्यमित्याचक्षते । न चैवं गृहीतविषयकधारावा· हिज्ञानस्याप्रामाण्यप्रसङ्गः । कालस्य षाडिन्द्रियवेद्यत्वेन पूर्वक्षणवि· शिष्टघटस्य विषयीकरणेन तादृशस्योत्तरज्ञानाविषयतया ऽनधिगतार्थ· विषयकत्वसम्भवात् । मन्त्राणामनुवादवाक्यानां स्मृतीनां च स्वस· ाधिकरणस्वाव्यवहितपूर्वक्षणवर्तिज्ञानाविषयविषयकत्वस्वरूपागृही· ताहित्वेन प्रामाण्यापपत्तिः ॥

तानि च प्रमाणानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्ध्या· ानि षड् लौकिकानि ।

धर्मप्रमाणानि विध्यर्थवादमन्त्रनामधेयस्मृतिशिष्टाचाररूपाणि षट् ॥

धर्मभेदकानि शब्दान्तराभ्याससंख्यानामगुणप्रकरणान्तराणी· षट् ।

धर्माङ्गताबोधकानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्येति षट् ।

श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिरूपाणि षट् क्रमबोधकानि ।

वचननामालिङ्गान्यातिदेशप्रमाणानि ।

स्थानापत्तिरूहप्रमाणम् । प्रत्याम्नानप्रतिषेधार्थलोपरूपाणि बाध· ाणानि ॥ एवमेकत्रिंशदलौकिकप्रमाणानि ।

एषामालोकसंयोगादिवत्सहकारितामात्रं, विधिरेवात्र मानमित्यपि चेत् ।

इदं तु चिन्त्यते । ज्ञानप्रामाण्यं ज्ञानहेतुभिन्नहेतुजन्यं ज्ञानग्राहक· ज्ञानग्राह्यश्चोत्तरज्ञानसामग्रीजन्यं ज्ञानग्राहकसामग्रीग्राह्यं वेति ॥

अत्र नैयायिकाः। प्रमात्वं ज्ञानसामान्यकारणभिन्नकारणजन्यतावच्छेदकम् ज्ञानवृत्त्यनित्यधर्मत्वात् अप्रमात्ववदित्यनुमानेन प्रमात्वस्येन्द्रियादिगतगुणजन्यत्वं सिद्ध्यति। दोषाभावस्य कारणत्वे गौरवात्। पीतः शङ्ख इति शङ्खप्रमानुत्पत्तिप्रसङ्गाच्च अन्वयव्यतिरेकाभ्यां तद्धेतुकत्वसिद्धेश्च। एवं च प्रमायां गुणः भ्रमे दोषः कारणम्। किं च रङ्गादपि रजतज्ञानोत्पत्तिदर्शनान्न ज्ञानमात्रस्य तत्प्रकारकत्वावच्छिन्नतद्वद्विशेष्यकत्वनियमः। अतस्तत्र भिन्ना सामग्री वाच्या। ज्ञानसामान्यकारणजन्यत्वे जन्यज्ञानमात्रस्य प्रमात्वप्रसङ्गः। तेन प्रामाण्यमप्रमाण्यं च परत उत्पद्यते। एवं ज्ञानान्तरेण गृह्यते। तच्च इदं ज्ञानं प्रमा, गुणवत्कारणजन्यत्वात्, अर्थक्रियासम्वादात्, बाधाभावाद्, इत्याद्यनुमानम्। संवादत्वं च तद्विषयविषयकत्वम्। न चैवं वेदवाक्यजन्ययागस्वर्गसाध्यसाधनभावज्ञाने ऽर्थक्रियासम्वादाभावात् न कदापि प्रामाण्यनिश्चयः स्यादिति वाच्यम्। तेषामीश्वरवाक्यजन्यतया गुणवत्कारणजन्यत्वेन तदनुमानात्। न चार्थक्रियादिज्ञानेषु कथं प्रामाण्यनिश्चय इति वाच्यम्। अगत्या तत्र स्वतः प्रामाण्यग्रहाङ्गीकारात्। तस्मात्परतः प्रामाण्यं निश्चीयते इत्याहुः।

सिद्धान्तस्तु अनन्तगुणानां हेतुत्वमपेक्ष्य ज्ञानसामान्यसामग्रीजन्यत्वस्यैवोचितत्वात्। दोषवदिन्द्रियजन्यस्यापि धर्म्यंशे प्रमात्वाच्च। एतेन गुणज्ञानज्ञाप्यत्वं दोषाभावज्ञानज्ञाप्यत्वं चापास्तम्। अनेकदोषाभावानामननुगतत्वेन गौरवात्। अतो न ज्ञानोत्पत्तेः परतस्त्वं, नापि ज्ञप्तेः परतस्त्वं सम्भवति। तथा हि। नोदकाहरणरूपार्थक्रिया ज्ञानेनार्थनिश्चयद्वारा पूर्वज्ञाने प्रमाण्यनिश्चयः। तस्यापि स्वप्नावस्थायामर्थव्यभिचारेण तेनार्थनिश्चयासम्भवात्। नापि तज्जन्यसुखोत्पत्त्या। अयथार्थादपि स्वप्ने चन्दनलेपादिज्ञानात्सुखोत्पत्तेस्तस्याप्यर्थव्यभिचारात्। किं चोदकाहरणादिरूपार्थक्रियया व्याप्यविधया घटनिश्चयः। व्याप्तिश्च सम्बन्धरूपेति नागृहीते सम्बन्धिनि ग्रहीतुं शक्यते। तत्र सम्बन्धिघटज्ञाने स्वत एव प्रामाण्यनिश्चयो वाच्यः। एवं गुणज्ञानसंवादज्ञानयोरपि न चैताभ्यां विषयो निश्चेतुं शक्यते। न च तत्रापि ज्ञानान्तरेण प्रामाण्यनिश्चयः। अनवस्थापत्तेः। एवं च स्वतः एवार्थतथात्वनिश्चयो वाच्यः। एवं तर्हि घटादिज्ञानेपि स्वत एव प्रामाण्यं, तस्यापराधाभावात्। तेन ज्ञानग्राहकेणैव तस्य ज्ञानमिति सिद्धं प्रामाण्यज्ञप्तेः स्वतस्त्वम्। किं च ज्ञानं न प्रत्यक्षम्। तस्य प्रत्यक्षत्वे निर्विकल्पकप्रत्यक्षवारणाय निष्प्रकारकत्व-

निर्विशेष्यकत्वनिःसंसर्गकत्वानां विनिगमकाभावेन त्रयाणामपि प्रतिबन्धकत्वकल्पने गौरवात् । न च विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुतया तदभावान्न निर्विकल्पकप्रत्यक्षतापत्तिरिति वाच्यम् । विशेष्ये विशेषणमिति रीत्या एकत्रोभयमिति रीत्या वा तादृशप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वाभावेन तद्रीत्या निर्विकल्पकप्रत्यक्षापत्तेर्दुर्वारत्वात् । एवं चावश्यकप्रतिबध्यप्रतिबन्धकभावकल्पनमपेक्ष्यात्मनिष्ठगुणप्रत्यक्षे तादात्म्येन ज्ञानस्यैव धर्माधर्मभावनामिव ज्ञानभावनादृष्टसाधारणवैजात्यकल्पनया तज्जात्यवच्छेदेनैव वा प्रतिबन्धकत्वकल्पनमुचितम् । जानामीत्याद्यनुभवानामपि अनुभवामीत्युपनीतभानत्वम् । एवं च विषयनिष्ठज्ञाततया तन्निष्ठमेव ज्ञानमनुमीयते । घटो ज्ञानवान् ज्ञातताववत्त्वादिति । तत्र घटत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन ज्ञानानुमितौ तादृशप्रकारतानिरूपितविशेष्यतारूपप्रामाण्यग्रहः । न च ज्ञाततायाः प्रमात्वाव्याप्यतया तदनुमापकत्वासम्भव इति वाच्यम् । प्रमात्वस्याननुमेयत्वात् ज्ञानानुमाने समानसंवित्संवेद्यतया ज्ञानत्ववत्प्रमात्वस्य स्वतस्त्वसम्भवात् । न च ज्ञाततायां मानाभावः । तस्या विषयज्ञानातिरिक्ताया आवश्यकत्वात् । तथाहि । न तावद्विषयता ज्ञानस्वरूपा । घटप्रकारकभूतलविशेष्यकज्ञानाद् भूतलप्रकारकघटविशेष्यकानुव्यवसायापत्तेः । नापि विषयस्वरूपा, विशिष्टज्ञानसमूहालम्बनयोरवैलक्षण्यापत्तेः । अत उभयातिरिक्ता, सा च नित्या, लाघवात् । अन्यथा ऽनन्ततत्तद्विषयकज्ञानैरनन्ततत्तद्विषयतोत्पत्तितन्नाशकल्पनाद् गौरवापत्तेः । एवं च नष्टयुधिष्ठिरादिविषयकज्ञानोत्पत्तिरपि सुलभेति युक्तम् ।

अन्ये तु आत्मघटयोर्व्याप्यतालक्षणः सम्बन्धो मानसप्रत्यक्षः स विषयतेत्याहुः । तेषां भावं नाकलयामः ॥

अन्ये तु तत्तज्ज्ञानजन्या तत्तद्विषयनिष्ठा ज्ञातता सा च नष्टभाविविषयनिष्ठापि । न चासतः कथं कार्योत्पत्तिरिति वाच्यम् । द्वित्वादिवदुत्पत्तौ बाधकाभावात् । न च तत्र नष्टद्वित्वस्य स्मरणमिति वाच्यम् अननुभूतद्वित्वस्य स्मरणासम्भवात् । न च यावदाश्रयप्रत्यक्षं विना कथं द्वित्वप्रत्यक्षमिति वाच्यम् । लाघवेन संयोगप्रत्यक्षे तस्य हेत्वाङ्गीकारेण व्यासज्यवृत्तिधर्मप्रत्यक्षे तस्य हेतुत्वाभावेन तत्प्रत्यक्षस्य सुवचत्वात् । न चाश्रयप्रत्यक्षं विना कथं तन्निष्ठगुणप्रत्यक्षमिति वाच्यम् । वायुप्रत्यक्षाभावे ऽपि तन्निष्ठस्पर्शप्रत्यक्षस्य त्वयैवाङ्गीकारात् । अतो द्वित्वबहुत्वयोर्भाविभूतपदार्थनिष्ठत्ववत् तज्ज्ञानोत्पाद्यविषयताया अपि

भाविभूतपदार्थनिष्ठत्वम्। न च द्वित्वादेर्गुणस्य समवायिकारणाभावेन भाविभूतयोः कथमुत्पत्तिरिति वाच्यम्। समवायसम्बन्धेन भावकार्योत्पत्तौ तदात्म्यसम्बन्धेन द्रव्यस्य जनकतेति समवायिकारणकार्यकारणभावस्य वक्तव्यत्वेन संख्यायाः पदार्थान्तरत्वेन विषयतावत् समवायेनोत्पन्नत्वभावेन समवायिकारणानावश्यकत्वात् सङ्ख्याया विषयतायाश्चाभावं जानामि, अभावौ द्वौ, चतुर्विंशतिर्गुणा इति प्रतीत्याऽभावागुणादिनिष्ठतया स्वरूपसम्बन्धेनैवोत्पत्त्यङ्गीकारेण समवायिकारणानावश्यकत्वात्। न च द्वित्वादीनामकस्मिकत्वप्रसङ्गः। अपेक्षाबुद्धेरेव जनकतया नियामकत्वात्। अपेक्षाबुद्धेरभिव्यञ्जकत्वे तु नित्यतया न तदापत्तिप्रसङ्गोऽपि। न च कार्यसमवेतगुणत्वेनानित्यत्वानुमानात् कथं नित्यत्वमिति वाच्यम्। एकत्वेनाङ्गीकृतासु अरुणादिव्यक्तिषु व्यभिचाराद्, अनुकूलतर्काभावेनाप्रयोजकत्वाच्च। न च आश्रयाभावे विषयताद्वित्वादेः क्वावस्थानमिति वाच्यम्। कपालादिनाशे क्षणमात्रं घटादेरिव विषयताया अपि सत्त्वे बाधकाभावात्। अतो न ष्टघटादावपि घटो ज्ञात इत्याद्यनुभवाद् भूतभाविनिष्ठत्वमिति, दिक्॥ अत एव ज्ञानजन्यज्ञाततावत्त्वाद् घटं जानामीति कर्मत्वोपपत्तिः। तस्मादतिरिक्ता विषयता किं च ज्ञानेच्छाकृतिसंस्काराणां समानविषयकत्वेनैव कार्यकारणभावे लाघवादपि विषयता ऽतिरिक्ता, सैव च ज्ञातता, तयैव ज्ञानं गृह्यते, तन्निष्ठप्रमात्वमपीति स्वतस्त्वम्।

नन्वेवमिदं ज्ञानं प्रमा नवेति सन्देहो न स्यात्, ज्ञानग्रहे धर्मिज्ञानाभावात्, तद्ग्रहे तन्निष्ठप्रमात्वस्यापि ग्रहादिति चेन्न—नायं ज्ञानविशिष्टप्रमात्वसंशयः, किं तु विषयसंशय एवायं, पुरोवर्त्तिनि रजतत्वमस्ति वा नवेति रजतादिज्ञानोत्तरं प्रमात्वस्मरणे रजतादिज्ञाननाशात्तत्संशयोपपत्तेः। यद्वा धर्मिज्ञानाभावेऽपि धर्मीन्द्रियसन्निकर्षमात्रेण संशयोत्पत्तिः। यद्वा सत्यपि प्रामाण्यज्ञाने दोषवशादेव तदुत्पत्तिः। दोषश्चानभ्यासदशानापन्नत्वमिति। तस्मादुक्तं ज्ञप्तिप्रामाण्यस्य स्वतस्त्वमिति॥

गुरवस्तु घटादिमात्रविषयकं न ज्ञानं सर्वज्ञानानां त्रिपुटीविषयकत्वाङ्गीकारात्। त्रिपुटी च ज्ञानात्मविषयरूपा, तेन सर्वज्ञानं घटं जानामीत्याद्यनुव्यवसायाकारमिति। स्वेनैव स्वस्य घटादिविषयकग्रहणात्ततः प्रमाण्यमित्याहुः।

मुरारिमिश्रास्तु घटादिज्ञानोत्तरं घटं जानामीत्याद्यनुव्यवसायो जायते तेन घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपप्रामाण्यग्रह इत्याहुः॥

वस्तुतो जलादिज्ञानोत्तरं प्रवृत्त्या जलादिनिश्चयोत्तरं पूर्वज्ञाने

प्रमाण्यं जानातीति कश्चित् ।

कश्चित्तु ज्ञात्वा प्रमाण्यं प्रवर्तते इत्यनुभवाज्जातं ज्ञानं प्रमा न वेत्यादिसंशयानुभवान्न ज्ञानमात्रे स्वतः प्रमाण्यनिश्चयो युक्तः । नापि परतः प्रामाण्यं क चित्सिद्धान्तभङ्गापादकम् । किं तु कुत्र चित्स्वतः प्रमाण्यग्रहः क्वचित्परत इत्यननुगत एव प्रमाण्यग्रहः शक्तिग्रहवत्। तेन वेदजन्यज्ञाने संशयाभावात्स्वतः प्रमाण्यं, तद्भिन्नज्ञाने तु परतः प्रामाण्यं ज्ञायते । अत एव स्मृतिजन्यज्ञाने सन्मूलकत्वगुणज्ञानादेव प्रामाण्यं सिद्धान्तेऽप्यङ्गीकृतमिति युक्तमुत्पश्यामः ॥

इति गागाभट्टकृतभाट्टचिन्तामणौ ज्ञानप्रमाण्यविचारः ।

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

इदानीं प्रत्यक्षस्य धर्मप्रामाण्यनिराकरणाय प्रत्यक्षलक्षणमुक्तं सूत्रकारेण । न तावदिन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति लक्षणम् । ज्ञानमात्रस्य मनोजन्यत्वात् । अत इन्द्रियार्थसम्बन्धजन्यं ज्ञानं प्रत्यक्षमिति सूत्रकारः । न चेश्वरप्रत्यक्षे ऽव्याप्तिः । ईश्वरज्ञानस्यानुमितिविलक्षणत्ववत् प्रत्यक्षाविलक्षणत्वादिति जीर्णाः ॥ यद्वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमित्युपमितिशाब्दबोधार्थापत्तिस्मृतीनां ज्ञानकरणकत्वात् । न च सविकल्पकप्रत्यक्षे विशिष्टवैशिष्ट्यप्रत्यक्षे चाव्याप्तिः, तयोर्निर्विकल्पकादिज्ञानकरणकत्वादिति वाच्यम् । व्यापारवदसाधारणकारणस्य करणतया तज्जन्यत्वे सति तज्जन्यजनकस्य व्यापारतया च निर्विकल्पकादेः कारणत्वे ऽप्यकरणत्वात् । जन्यज्ञानजन्यमात्रवृत्तिजातिशून्यज्ञानत्वं वा । सर्वत्र प्रत्यक्षे इन्द्रियस्य कारणत्वात् । तत्संबन्धस्य व्यापारत्वाच्च तादृशानामनुमितित्वादीनां प्रत्यक्षे ऽभावाल्लक्षणसङ्गतिः ।

सविकल्पकत्वादिकं तु न जातिः। इन्द्रियत्वं च संबद्धार्थविशदावभासकत्वम्, अपरोक्षज्ञानजनकद्रव्यत्वं वा, ज्ञानानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं वा ॥ तच्च षड्विधम् । घ्राणरसनचक्षुस्त्वक्श्रोत्रमनोभेदात् । तत्राद्यानि चत्वारि गन्धरसरूपस्पर्शमात्राभिव्यञ्जकतया गन्धादिमत्त्वानुमानेन पृथिव्यप्तेजोवायुप्रकृतीनि । श्रोत्रमपि शब्दमात्रग्रहकतया शब्दवत्त्वानुमानेनाकाशात्मकमित्यक्षपादीयाः । अभियुक्तैस्तु कर्णशष्कुल्यन्तर्गतदिशः श्रोत्रमिति लिङ्गाद्दिगात्मकत्वं युक्तम् । मनसि च सुखीति प्रत्यक्षमिन्द्रियजन्यं, प्रत्यक्षत्वादित्यनुमानं प्रमाणम् ।

अन्ये तु सुखादीनां नित्यद्रव्यविशेषगुणत्वेन द्रव्यान्तरसंयोगासमवायिकारणकत्वे सिद्धे तादृशसंयोगाश्रयतया मनःसिद्धिरित्याहुः। तन्न—शरीरसंयोगेन सिद्धसाधनादर्थान्तरत्वाच्च।

तच्चान्तरिन्द्रियं स्वातन्त्र्येणात्मतद्योग्यगुणतद्गतजातिमात्रग्राहकं, बाह्यविषयेषु तस्य स्वातन्त्र्याभावात्।

कुतो न स्वातन्त्र्यमिति चेन्न। तस्याणुपरिमाणस्य देहाद्बहिर्भावाभावेन सन्निकर्षासंभवात्। युगपज्ज्ञानानुत्पत्तिश्च मनसोणुत्वे प्रमाणम्। येपि तस्य विभुत्वमाहुस्तेषामपि देहावच्छिन्नस्येन्द्रियत्वादस्वातन्त्र्याक्षतिः, युगपज्ज्ञानोत्पत्तिरिष्टैव।

सन्निकर्षश्च संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायश्चेति। द्रव्यं संयोगेन, तद्गतगुणकर्मजातयो द्वितीयेन, गुणकर्मगतजातयस्तृतीयेन।

केचित्तु समवायरूपप्रत्यासत्त्या द्रव्यगुणकर्मसामान्यगता सत्ता गृह्यते। सत्ता च तत्कालसंबन्ध इति तस्य जातिगतत्वं नानुपपन्नमित्याहुः, तेषां भावं नाकलयामः।

शब्दस्य च द्रव्यत्वात्तत्रापि संयोग एव संबन्धः।

ननु बाह्येन्द्रियग्राह्यतया शब्दे गुणत्वमिति चेत्॥ न। वायौ रूपत्वादिसामान्ये च व्यभिचारात्। प्रत्यक्षद्रव्यगुणत्वाभावविशिष्टप्रत्यक्षेण गुणत्वाभावानुमानाच्च। तत्रापि कर्मवेगरवेन द्रव्यत्वानुमानम्।

न च तथापि शब्दे श्रोत्रसंयोगासम्भवः तस्य सर्वत्रोपलम्भेन विभुतया दिगात्मकश्रोत्रस्यापि विभुतया संयोगासमवायिकारणकर्माभावादिति वाच्यम्। न तावत्संयोगत्वावच्छिन्नं प्रति कर्मणो जनकता, संयोगजसंयोगे व्यभिचारात्। किं तु विजातीयसंयोग, तत्र वैजात्यकल्पनमपेक्ष्य जन्यसंयोगे कर्मत्वेन कारणता युक्ता। संयोगजसंयोगानङ्गीकाराच्च न व्यभिचारः। विभुनी मिथः संयुक्ते निरन्तरद्रव्यत्वात्, घटाकाशवदित्यनुमानेन विभुसंयोगसिद्धेश्च॥

तच्च प्रत्यक्षं निर्विकल्पकं सविकल्पकञ्चेति द्वेधा। प्रकारताविशेष्यतादिविषयतारहितं ज्ञानं निर्विकल्पकं, तद्विशेषणविशेष्यभावानापन्नघटघटत्वादिविषयकम्। इन्द्रियसंयोगानन्तरमविविक्तसामान्यव्यक्तिभागस्य व्यक्तिमात्रगोचरज्ञानस्य जायमानत्वात्। तच्च प्रत्यक्षं, किं चिद्भासत इति प्रतीतेः, अश्वोऽयं न तथा पूर्वं प्रतीत इति प्रतीतेश्चेति केचित्।

विशिष्टज्ञानरूपसविकल्पकस्य विशेषणज्ञानं विनोत्पत्त्यसम्भ-

वादनुमानगम्यमित्यन्ये ॥

विशेष्यविशेषणेन्द्रियसन्निकर्षस्य विशिष्टज्ञानहेतुतया विशेषणज्ञानस्य विशिष्टज्ञाने न हेतुत्वमिति केचित् ॥

तत्सिद्धं घटत्वनीलपीतादिनानाधर्मविषयकं निर्विकल्पकम् ।

सविशेष्यकं सप्रकारकं ससंसर्गकं वा ज्ञानं सविकल्पकम् । तच्च जातिद्रव्यगुणक्रियानामविषयकतया पञ्चधा । चाक्षुषादिभेदेन षोढा च । तत्र प्रत्यक्षमात्रे महत्त्वं हेतुः। तच्च द्रव्यप्रत्यक्षे समवायेन, गुणक्रियाजातिप्रत्यक्षे समवायघटितसामानाधिकरण्येन, गुणक्रियागतजातिप्रत्यक्षे त्वेकार्थसमवायसमवायेन ।

चाक्षुषे चोद्भूतरूपमुद्भूतानभिभूतरूपालोकसंयोगश्च । कालादिचाक्षुषे महत्त्वोद्भूतरूपादीनां न हेतुतेति केचित् ।

स्पार्शने चोद्भूतस्पर्शः । न तु रूपमपि । तेन वायुरपि त्वाचप्रत्यक्षः । एवं च बहिरिन्द्रियजन्यप्रत्यक्षत्वं नोद्भूतरूपकार्यतावच्छेदकं, किं तु चाक्षुषत्वादिजातिरेवेति लाघवम् । मानसेपि महत्त्वं हेतुरिति केचित् ।

नेत्यन्ये ॥

केचित्तु क्रिया न प्रत्यक्षा, किंतुविभागोत्तरसंयोगाभ्यामनुमेया अतस्तत्प्रत्यक्षे महत्त्वस्य न हेतुतेत्याहुः ॥

द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोन्धकारशब्दरूपाण्येकादश ।

गुणा रूपरसगन्धस्पर्शपरिमाणसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टबुद्धिसुखदुःखेच्छाद्वेषयत्ना इति विंशतिः ।

कर्म चलनात्मकमेकम् ।

सामान्यं परापररूपं द्वेधा ।

समवायश्चैकः ।

शक्तिस्त्रिधा । सहजा ऽऽधेया पदशक्तिश्चेति ।

अभावस्त्रिधा । ध्वंसो ऽत्यन्ताभावो भेदश्चेति ॥

एवं च द्रव्यगुणकर्मसामान्यसमवायशक्त्यभावाः सप्त पदार्थाः ॥

संख्यापि गुणादिवृत्तित्वात्पदार्थान्तरमित्यन्ये ॥

गुणसमुदाय एव पृथिव्यादिद्रव्यं, नातिरिक्तमिति केचित् ।

तन्न--पृथिव्यादौ पाकादिना पूर्वरूपनाशस्योत्तररूपोत्पत्तेश्चानुभवसिद्धत्वात् ॥

अन्ये त्ववयवसमुदायमेवावयविनमाहुः । तदपि न उत्पन्नः पटो

विनष्टः पट इत्यादिप्रतीतेः।

तेन पटो रूपवान् नीलश्चलति डित्थोऽयमिति सविकल्पकं सिद्धम्

ननु नेयं प्रमा। अलीकघटत्वादिजातिविषयकत्वात्। तथाहि। न तावद्व्यक्तिभिन्ना जातिः प्रत्यक्षत उपलभ्यते। इह गवि गोत्वमिति प्रतीत्यभावात्। भिन्नापि सा सर्वगता व्यक्तिमात्रनिष्ठा वा। अन्तरालेऽनुपलब्धेर्नाद्यः। द्वितीयेपि नित्याया उत्पत्त्ययोगात्। अमूर्त्ताया व्यक्त्यन्तरादागमनासम्भवाद् भविष्यति घटे सा न स्यात्। न चांशत आगमनम्, निरवयवत्वात् एवमेकस्यां व्यक्तौ कृत्स्नायामंशेन वा न वृत्तिः सम्भवतीत्यवगन्तव्यम्। अतो न व्यक्तितो भिन्ना जातिः सम्भवति। व्यक्त्यात्मकत्वं तु नित्यत्वानित्यत्वाभ्यां विरुद्धधर्माभ्यामपहस्तितम्, भेदाभेदश्चात्यन्तविरुद्धः। एवं च स्वलक्षणरूपशुद्धविषयकमेव निर्विकल्पकं प्रमेति चार्वाकैकदेशिनः।

तन्न—काणकुटाद्यसदृशगोव्यक्तिष्वेकाकारप्रत्ययानुपपत्तेः। किं च सामान्यस्यालीकत्वं वदता वस्तुत्वव्यापकभेदाभेदासम्भवेन सामान्ये वस्तुत्वं निराक्रियते। सिद्धं तर्हि वस्तुत्वसामान्यम्। भेदाभेदाङ्गीकारेण च पूर्वोक्तप्रत्यक्षापादनादिनिरासः। इयं गौरिति पदयोर्भिन्नप्रवृत्तिनिमित्तकयोः सामानाधिकरण्येनानुवृत्तव्यावृत्ताकारबोधकत्वेन भेदाभेदसिद्धिः। किञ्च जातिव्यक्त्योः समवायसम्बन्धाङ्गीकारेण चाभेदसिद्धिः। येन सम्बन्धेनाधेयमाधारस्य स्वानुरक्तबुद्धिजनकं स सम्बन्धः समवायः। न त्वयुतसिद्धसम्बन्धः सः। युतसिद्धेर्वक्तुमशक्यत्वात्। पृथक्चलनवत्त्वस्य वृक्षशाखयोः सत्त्वेन तयोः समवायसम्बन्धं न स्यात्। अतो भेदाभेदः।

एवमवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोरपि भेदाभेदो नुसन्धेयः तेन सिद्धं सामान्यं जातिरूपं, तद्बाधके तूपाधिरूपम्। सामान्यं च नित्यमेकमनेकानुगतम्। तद्बाधकानि च—

व्यक्तेरभेदस्तुल्यत्वं सङ्करोथानवस्थितिः।
रूपहानिरसम्बन्धो ह्यांशिकत्वमपीष्यते॥

इति। एकव्यक्तिगतं न सामान्यम्। यथाकाशत्वम्। तुल्यव्यक्तिगतं न सामान्यद्वयम्। यथा घटत्वकलशत्वादि। परस्परात्यन्ताभावसमानाधिकरणमेकव्यक्तिवृत्ति न सामान्यद्वयम्। यथा भूतत्वमूर्तत्वे अनवस्थितं न सामान्यं यथा जातित्वम्। अनित्यम् न सामान्यं, यथ पृथुबुध्नोदराकारत्वम्। असमवेतं न सामान्यम्। यथाऽभावत्वादि आंशिकं न सामान्यम्। यथोपेक्षात्वमिति दिक्। तत्राप्यांशिकत्वं सङ्क

रान्तर्गतम् । स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्य जातिनिष्ठस्वस्वाभावोभयसामानाधिकरण्यकत्वस्य भेदाभेदगर्भस्य दूषकताबीजस्य तुल्यत्वादित्यस्तु प्रसक्तानुप्रसक्तम् । अतः—सविकल्पकप्रमा सिद्धा ॥

अत्र निरालम्बनवादिनः । सर्वाणि बाह्यघटादिविषयकाणि सविकल्पकज्ञानानि मिथ्यार्थविषयकाणि, बाह्यार्थविषयकज्ञानत्वात् । स्वप्नप्रत्ययवत् । स्वप्नज्ञानानां हि बाह्यघटाद्याकारेण परिणतं ज्ञानमेव विषयो न घटादि, तदानीमभावात् । मनः प्रत्यासत्त्यभावात् । स्वशिरश्छेदादीनामसम्भवाच्च । अतस्तत्र ज्ञानरूपात्मैव विषयः । एवं सर्वज्ञानानामिति दृष्टान्तेन न किं चिदपि ज्ञानं प्रमेत्याहुः ॥

तन्न—स्वप्नप्रत्ययानामात्मविषयकत्वासिद्ध्या दृष्टान्तासिद्धेः । किं च नीलोयमित्यादिसविकल्पकानामात्मविषयकत्वे नीलोहमित्याकारत्वापत्तिः । अत इदं बाह्यविषयकं बाधकाभावेन प्रमैवेति ॥

शून्यवादी तु न ज्ञानातिरिक्तो बाह्यो विषयोऽस्ति, ज्ञानस्यैवाकारो विषयो ज्ञानस्वरूपात्मक एव, स्वप्नज्ञानवत्, तेन सविकल्पकं न प्रमा । तथाहि । नीलादेः किं ज्ञानविषयत्वम्, न तावत्पदार्थत्वं सत्तावत्त्वं वा । नीलज्ञाने पीतादेरपि विषयत्वप्रसङ्गात् । नवा ज्ञानहेतुत्वम्, इन्द्रियादेरपि तत्त्वप्रसङ्गात् । नापि ज्ञानजनकसन्निकर्षाश्रयत्वम् । रूपज्ञाने स्पर्शस्य विषयत्वापत्तेः । नापि सादृश्यविशिष्टहेतुत्वं, विशेषणज्ञानस्य ज्ञानत्वेन सादृश्याद्धेतुत्वाच्च विशिष्टज्ञाने विषयत्वप्रसङ्गात् । न चात्यन्तसादृश्यं विवक्षितं, तच्च न ज्ञानत्वेन, तस्य साधारणत्वात् । किं त्वेकज्ञानविषयत्वेन । तच्च त्रिपुटीप्रत्यक्षाङ्गीकारेण ज्ञाननीलयोरेकज्ञानविषयत्वाद्धेतुत्वाच्चोपपन्नं विषयत्वमिति वाच्यम् । धारावाहिकज्ञानेषु पूर्वज्ञानस्य सादृश्येनोत्तरज्ञाने विषयत्वापत्तेः । ज्ञानस्य स्वस्मिन्स्वस्य हेतुत्वासम्भवेन विषयत्वानुपपत्तेश्च ।

न च ज्ञाने नीलाद्याकारतासमर्पकत्वे सति हेतुत्वम् । तच्च जपाकुसुमस्यैव सन्निधिनेति वाच्यम् । विषयस्य नीलाद्याकारतासमर्पकत्वे मानाभावात् ।

ज्ञानवैचित्र्यं मानमिति चेत्—न—अर्थं विनापि स्वप्नज्ञानवैचित्र्यदर्शनात् । नापि ज्ञानजन्योपादानहानादिव्यवहारवत्त्वम् । घटज्ञाने घटद्व्यणुकानां विषयत्वापत्तेः । सुखादीनां स्वज्ञानाविषयत्वापत्तेश्च । न च सुखादिषु सुखीत्यादिशब्दप्रयोगो व्यवहार इति वाच्यम् । शब्दप्रयोगस्य ज्ञानविषयनिरूपकत्वाभावात् । ज्ञानविषयनिरूपणपूर्वकत्वेन

शब्दप्रयोगस्य तेन विषयनिरूपणे इतरेतराश्रयापत्तिः।

नापि ज्ञानजन्यज्ञाततावत्त्वं तत्। भूतभविष्यतोस्तदसम्भवात्। तत्र मानाभावाच्च। अतो ज्ञानात्मकमेव तत्। किं च विषयो ज्ञानात्मको, ज्ञानेन सहोपलभ्यमानत्वात्, ज्ञानत्ववत्। सहानुपलभ्यमानयोर्घटपटयोर्भेददर्शनमनुकूलतर्कः।

न च घटोयमिति ज्ञानस्य ज्ञानाविषयत्वेनासिद्धः सहोपलम्भ इति वाच्यम्। उत्तरकाले ज्ञातो घट इति ज्ञानघटयोः स्मरणदर्शनेन पूर्वानुभवस्यावश्यकतया घटोयमिति ज्ञानस्य ज्ञानविषयकत्वकल्पनात्। स्वप्नादिज्ञानानां साकारत्वमिव सर्वेषां साकारत्वेन ज्ञानातिरिक्तविषयाभाव इति स्वमतं परिष्करोति।

तच्चिन्त्यम्। नीलोदर्ज्ञानात्मकत्वे ज्ञानस्य स्वविषयाकारत्वे मानाभावात् उक्तानुमानस्याप्रयोजकत्वात्। समूहालम्बने सहोपलभ्यमानयोर्घटपटयोरभेदाभावेन व्यभिचाराच्च। किं च न ज्ञानात्मको विषयः। ज्ञानाभावविषयके ज्ञाने ज्ञानाभावस्य ज्ञानात्मकत्वासम्भवात्। तदेवेदमिति स्थायित्वविषयके ज्ञाने स्थायित्वस्य क्षणिकज्ञानात्मकत्वासम्भवात्। इदं नानाकारमिति चित्रबुद्धावनेकाकारस्यैकस्मिन्नसम्भवाच्च। किं च विषयस्य ज्ञानात्मकत्वे ज्ञानात्मकत्वज्ञानस्यापरोक्षत्वनियमेनानुमितिविषयवन्ह्यादेः परोक्षत्वानुपपत्तिः, किं चातीतकालसम्बन्धानुमानविषयस्यातीतकालसम्बन्धस्य वर्तमानज्ञानात्मकत्वानुपपत्तिः। न च तत्रातीतं ज्ञानमेव विषय इति वाच्यम्। अतीतत्वस्य ज्ञानाकारत्वासम्भवात्। अतोवश्यं ज्ञानभिन्नो विषयो वाच्यः। तन्निष्ठविषयत्वं ज्ञानजन्यफलभागित्वं नित्यमतिरिक्तं वेत्युक्तं प्राक्।

न च स्वप्नदृष्टान्तो युज्यते। तस्यापि बाह्यविषयत्वात्। तथाहि। स्वप्ने दिवसानुभूतदेशकालान्तरगताः शिरश्छेदादयो विषया अदृष्टोद्बोधितसंस्कारवशात्स्मर्यमाणा निद्रारूपदोषवशेनात्मनिष्ठतया भासन्ते। एवं चान्यसम्बन्धित्वेनावगतानामन्यसम्बन्धित्वेन भानं शुक्तिरजतज्ञानवत्। इयमेव चान्यथाख्यातिः। न च बाह्यविषयेषु मनसस्तदीनामसम्बन्धात्कथं भानमिति वाच्यम्। ज्ञानलक्षणायाः प्रत्यासत्तेरङ्गीकारात्। प्रमुष्टतत्ताकस्मरणाङ्गीकाराद्वा न दोषः। अतः स्वप्नज्ञानानां बाह्यविषयत्वं सिद्धम्। तेनानुभूयमानानां बाह्यार्थानामपलापासंभवात्तद्विषयकज्ञाने न मिथ्यात्वं, किं तु दुष्टकारणजन्यं बाधितमिति॥

गुरवस्तु शुक्तिरजतज्ञानादौ न संसर्गग्रहो मानाभावात। किं तु

स्मरणानुभवविषययो रजतत्वशुक्त्योरसंसर्गाग्रहमात्रं, नान्यथाख्यातिः । किन्तु संसर्गाग्रहरूपेयमख्यातिः । एवं चासंसर्गाविषयकतत्प्रकारकज्ञानस्य प्रवृत्तौ व्यवहारे च हेतुत्वादतिलाघवमित्याहुः ॥

तन्न—असंसर्गाविषयकत्वरजतत्वप्रकारकत्वयोर्ज्ञानविशेषणयोर्विशेषणविशेष्यभावे विनिगमकाभावेन कार्यकारणभावद्वयकल्पनागौरवात् । एवं सामान्यतः प्रवृत्तौ कार्यताज्ञानस्य हेतुत्वे यत्र कार्यताभ्रमात्प्रवृत्तिस्तत्रासंसर्गाविषयकत्वकार्यत्वप्रकारकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण हेतुहेतुमद्भावद्वयकल्पनम् । एवमप्रामाण्याज्ञानाभावविशिष्टकार्यत्वप्रकारकज्ञानस्य हेतुत्वेन यत्राप्रामाण्यग्रहो भ्रमरूपस्तत्राप्रमात्वासंसर्गाविषयकत्वकार्यत्वप्रकारकत्वयोर्विशेषणविशेष्यभावे विनगमनाविरहेण हेतुहेतुमद्भावद्वयकल्पनेऽतिगौरवापत्तिः । अतोऽत्रासंसर्गाग्रहस्य प्रवृत्तिव्यवहारादिहेतुत्वानुपपत्तेर्नाख्यातिसम्भवः । तेनान्यथाख्यातिरूपरजतत्वविशिष्टज्ञानस्यैव ग्रहे प्रवृत्त्यादिहेतुता युक्तेति । न चैवं चैत्रो रजतज्ञानवान् कार्यताज्ञानवत्त्वादिति ज्ञानान्मैत्रस्य प्रवृत्त्यापत्त्या भ्रान्तभ्रान्तिज्ञसंकरापत्तिरिति वाच्यम् । भ्रान्तिज्ञस्य बाधादेव प्रवृत्त्यभावोपपत्तेः । परकीयरजतत्वप्रकारकज्ञानज्ञानवतः क्षणविलम्बेन रजतत्वप्रकारकज्ञानादेव प्रवृत्त्यङ्गीकारात् । ज्ञानाविषयकज्ञानत्वेन प्रवृत्त्यङ्गीकाराद्वा न दोषः ।

यद्वा रजतविषयकप्रवृत्तित्वावच्छिन्नं प्रति रजतत्वप्रकारतानिरूपितरजतनिष्ठमुख्यविशेष्यताशालिज्ञानत्वेन हेतुत्वान्न काप्यनुपपत्तिरिति ।

किं च सर्वत्र प्रवृत्तौ नासंसर्गाग्रहो हेतुः । सर्वत्र प्रवृत्त्यापत्तेः किं तु प्रमाजन्यप्रवृत्तौ तत्प्रकारकनिश्चयो हेतुः । भ्रमजन्यप्रवृत्तौ चासंसर्गाग्रह इति कार्यकारणभावद्वयकल्पनागौरवम् । मम तु सर्वत्र प्रवृत्तौ तत्प्रकारकनिश्चयत्वेनैव हेतुत्वमिति लाघवमिति दिक् ॥

तच्च सविकल्पकं द्विविधम् । लौकिकमलौकिकञ्च । उक्तसन्निकर्षजन्यमाद्यम् । सामान्यलक्षणाज्ञानलक्षणाजन्यं द्वितीयम् । सामान्यलक्षणा च सामान्यज्ञानं ज्ञायमानं सामान्यं वा । तेन सम्बन्धेनेन्द्रियसम्बद्धानां तत्सामान्याश्रयव्यक्तीनां प्रत्यक्षम् । इदञ्चावश्यकम् । अन्यथा व्यवहारविषयघटे शक्तिग्रहे सर्वव्यक्तीनामप्रत्यक्षतया सर्वत्र शक्तिग्रहो न स्यात् ॥

गङ्गेशस्तु महानसीयधूमे व्याप्तिप्रत्यक्षे सति धूमत्वसामान्यलक्षणप्रत्यासत्त्या सकलधूमप्रत्यक्षानङ्गीकारे धूमो वन्हिव्याप्यो न वेति संशयो न स्यात् । प्रसिद्धधूमे प्रत्यक्षेण व्याप्तिनिश्चयात् । अन्यस्य चा-

ज्ञानात्संन्देहानुपपत्तिः । किञ्च सुखार्थं कर्मणि प्रवृत्तिर्न स्यात्, सिद्धे सुखेच्छाविरहात् । असिद्धस्य चाज्ञानात् । एवं सुखादाविच्छापि न स्यात् । किं च कपालेषु घटप्रागभावप्रत्यक्षं न स्यात् । प्राचीनघटानां प्रतियोगित्वानुपपत्त्या प्रागभावविशेषणीभूतस्य प्रतियोगिनो घटस्याज्ञानात् एवं कपालाधिकरणको वर्त्तमानप्रागभावप्रतियोगी घट इति शाब्दबोधोपि न स्यात् । अतः सामान्यलक्षणा ऽङ्गीकार्येत्याह ॥

अत्र शिरोमणिः । प्रसिद्धधूमे तद्धूमत्वेन व्याप्तिनिश्चयेपि धूमत्वेन तन्निश्चयाभावात् उक्तसंशयस्य नानुपपत्तिः । समानप्रकारकनिश्चयस्यैव संशयादिविरोधित्वात् । धूमत्वेन व्याप्तिनिश्चये संशयाभावस्येष्टत्वात् । एवमिच्छाप्रवृत्त्योरपि तत्प्रकारकनिश्चयहेतुकतया नानुपपत्तिः । विशिष्टज्ञाने विशेषणज्ञानस्य हेतुत्वाङ्गीकारेण विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वाङ्गीकारेण च न प्रागभावप्रत्यक्षानुपपत्तिः । किं च प्रागभावसत्त्वेऽप्यत्र घटो भविष्यतीत्यत्र न घटप्रागभावप्रतीतिः किन्तूत्पत्तिप्रागभावस्य । तस्याश्च कालसम्बन्धरूपाया अप्रत्यक्षत्वात् तत्प्रतियोगिकप्रागभावस्य सुतरामप्रत्यक्षत्वात् तत्प्रतियोगिप्रत्यक्षार्थं का कथा सामान्यलक्षणायाः । तथाहि । भविष्यति भवितेत्यादौ उत्पत्तिर्धात्वर्थः । आख्यातार्थस्तदनुकूलव्यापारः, तेन वर्त्तमानकालोत्तरकालीनकपालाधिकरणकोत्पत्त्यनुकूलव्यापारवान् वर्तमानप्रागभावप्रतियोग्युत्पत्त्यनुकूलव्यापारवान् वा घट इति बोधः । उत्पत्त्याश्रय इति वा । एवं नङ्क्ष्यतीत्यत्र नाशो धात्वर्थः वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपं भविष्यत्त्वं प्रतियोगितासम्बन्धेन धात्वर्थे ऽन्वेति । तेन वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिककपालाधिकरणकनाशप्रतियोगी घट इति बोधः । एवं चात्र वर्त्तमानोत्तरकालीनत्वं न प्रागभावेन तत्प्रतियोगिना घटेन वा नाशेन वान्वेति । तदन्वये परश्वो भविष्यति परश्वो नङ्क्ष्यति च श्वो नङ्क्ष्यति श्वो भविष्यतीति प्रयोगापत्तिः । गृहाङ्गण आगमिष्यति देवदत्ते श्व उत्पत्स्यति गृहाङ्गणे भविष्यतीति प्रयोगापत्तिश्च । तेन वर्त्तमानोत्तरकालत्वस्य उत्पत्तावेवान्वय इति न तदर्थं सामान्यलक्षणापेक्षा । वस्तुतः प्रागभावे प्रमाणाभावात् सर्वमिदं गर्भस्रावगलितमिति । न च प्रागभावानङ्गीकारे उत्पन्नस्य पुनरुत्पत्तिप्रसङ्गः । शततन्तुकपटे द्वितन्तुकपटोत्पत्तिप्रसङ्गश्चेति वाच्यम् । तद्व्यक्तेरेव प्रतिबन्धकत्वाङ्गीकारात् अक्लृप्तप्रागभावतद्धेतुत्वकल्पने गौरवात् ॥

केचित्तु प्रागभावो नाशश्च नाभावरूपः । किं स्वाद्यक्षणस-

म्बन्धरूपोत्पत्तिपूर्वकालरूप एव प्रागभावः । एवं चरमक्षणसम्बन्ध एव नाशः । तस्योत्तरकालमेव नाशादनित्यत्वम् । अत एव घटो भविष्यति नष्टो घट इति प्रतीतिः । न हि नाशोस्ति प्रागभावोस्तीति कश्चित्प्रत्येति । अतो नाशप्रागभावौ न स्त इति वदन्ति ।

वस्तुतः सिद्धसुखविषयकप्रवृत्त्यभावादसिद्धसुखज्ञानार्थमरण्यस्थदण्डादौ प्रवृत्तिजनकघटहेतुताग्रहार्थं शक्तिग्रहार्थं च सामान्यलक्षणावश्यकीति युक्तम् ॥

एवं ज्ञानलक्षणानङ्गीकारे ज्ञातस्य सुरभिचन्दनखण्डस्य चक्षुषा सुरभि चन्दनमिति ज्ञानं न स्यात् । सौरभांशे सौरभत्वांशे वा प्रत्यासत्तेरभावात् । अतस्तत्र तज्ज्ञानमेव प्रत्यासत्तिः ॥

न्यायविदस्तु योगजधर्मप्रत्यासत्तिं तृतीयामाहुः ॥ तद्योगिषु मानाभावेनासुन्दरम् । न चेतिहासपुराणादि मानम्, तस्यान्यतात्पर्यकत्वादिति दिक् ॥

इति गागाभट्टकृते भाट्टचिन्तामणौ प्रत्यक्षपरिच्छेदः ॥

अनुमानं तु "ज्ञातसम्बन्धस्यैकदेशदर्शनाद्देशान्तरे ऽसन्निकृष्टे बुद्धिः" इति भाष्ये उक्तम् । सामान्यरूपेण ज्ञातव्याप्तिकस्य व्यक्तिविशेषदर्शनजन्यं सन्दिग्धसाध्यवदधिकरणकमसन्निकृष्टसाध्यविषयकं निश्चयरूपं ज्ञानमनुमितिरित्यर्थः । व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयजन्यं ज्ञानमनुमितिरित्यर्थः ।

न चैवं पदजन्यपदार्थस्मरणवद्व्याप्यज्ञानेन व्यापकस्मृतिरिति वाच्यम् । व्यापकवत्पक्षस्यानुभवाभावेन व्यापकवत्पक्षस्मृतित्वासम्भवात्

नचांशे उपेक्षात्वानुपेक्षात्ववदांशिकं स्मृतित्वानुभवत्वमिति वाच्यम् । उपेक्षात्वानुपेक्षात्वयोरविरुद्धयोर्धर्मयोरेकानुभववृत्तित्वेपि विरुद्धयोः स्मृतित्वानुभवत्वयोरेकज्ञानवृत्तित्वासम्भवात् । अत एव चाक्षुषत्वमानसत्वयोर्विरोधेन वह्न्यंशे मानसत्वमपास्तम् । बहिर्विषये तस्यास्वातन्त्र्यात् पक्षचाक्षुषसामग्र्याः प्रतिबन्धकत्वाच्च ।

न च तथापि व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयजन्ये तदनुव्यवसाये तद्विशिष्टवैशिष्ट्यप्रत्यक्षे तत्सदृशज्ञानजन्योपमितौ विशिष्टशाब्दबोधे तत्स्मरणे चातिव्याप्तिरिति वाच्यम् । तादृशनिश्चयत्वेन हेतुत्वस्य विवक्षणात् । उक्तस्थलेषु अनुव्यवसाये विषय-

त्वेन विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनोपमितौ सादृश्यज्ञानत्वेन शाब्दबोधे चावान्तरवाक्यार्थज्ञानत्वेन स्मृतावनुभवत्वेन हेतुत्वात्। एवं भ्रमसंशयोत्तरप्रत्यक्षे विशेषदर्शनस्य भ्रमादिविरोधित्वेन हेतुत्वाद् धूमसंशयोत्तरैककोटिकप्रत्यक्षत्वस्यार्थसमाजसिद्धतया विशेषदर्शनजन्यत्वानङ्गीकाराद्वा नातिव्याप्तिः।

न चान्वयव्यतिरेकव्याप्त्योरननुगमेनैकोपादाने ऽपरत्राव्याप्तिरिति वाच्यम्। व्यभिचारज्ञानविरोधिज्ञानविषयत्वेन व्याप्तिज्ञानस्यानुगमात्। तेन व्यभिचारधीविरोधिधीविषयतावच्छेदकधर्मप्रकारकपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति तु फलितम्।

नैयायिकास्तु लाघवाद् व्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति वदन्ति। तत्परामर्शवादे निराकरिष्यते।

यद्वा अनुमितित्वजातिमती अनुमितिः। अनुमितित्वजातिस्तु अनुमिनोमीत्यनुभवसिद्धा। तत्करणमनुमानं तच्च भूतभाविलिङ्गेनानुमित्यनुत्पत्त्यापत्तेर्ज्ञानमेव, न तु ज्ञायमानो हेतुः।

अथ केयं व्याप्तिः। अत्र गौडमैथिलसर्वस्वम्। साध्यवदन्यावृत्तित्वं व्याप्तिः। वह्निमन्महानसान्यह्रदावृत्तित्वाद् धूमे लक्षणसमन्वयः। धूमवन्महानसान्यायोगोलकवृत्तित्वाद् धूमवान्वह्निरित्यसद्धेतौ च नातिव्याप्तिः अत्र साध्यतावच्छेदकसम्बन्धेन साध्यवान् बोध्यः। तेन समवायेन वह्निमद्वन्ह्यवयवान्यमहानसवृत्तित्वेपि धूमस्य नाव्याप्तिः। साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः। तेन यत्किञ्चिद्वह्निमदन्यवृत्तित्वेपि धूमस्य नाव्याप्तिः। वृत्तित्वाभावश्च वृत्तित्वत्वावच्छिन्नप्रतियोगिताकः। तेन धूमवदन्यजलावृत्तित्वेपि वह्नौ नातिव्याप्तिः। न चैवमीदृशव्याप्तिश्चेत्तस्य केवलान्वयिन्यसम्भवात्कथमनुमितिरिति वाच्यम्। इष्टापत्तेः। केवलान्वयिव्यतिरेकिहेत्वोः पञ्चरूपोपपन्नत्वाभावेनानुमापकत्वाभावात्। एवं च केवलान्वयिव्यतिरेक्यनुमानमेव नेति।

यद्वा हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः। अत्र प्रसिद्धानुमाने घटाभावमादाय लक्षणसमन्वयः। व्यभिचारिण्ययोगोलकवृत्तिधूमाभावमादाय नातिव्याप्तिः। अत एव महानसीयवन्ह्यभावं वह्निघटोभयाभावमादाय नाव्याप्तिः। तत्र महानसीयवह्नित्वस्य वह्निघटोभयत्वस्य च प्रतियोगितावच्छेदकत्वेन वह्नित्वस्य प्रतियोगितानवच्छेदकत्वात्।

दण्डिमान् दण्डिसंयोगादित्यादौ रूपत्वव्याप्यजातिमत्त्वान् पृथिवी-

त्वादित्यादौ च स्वाश्रयसंयुक्तत्वादिसम्बन्धेन दण्डत्वादिकमेव साध्यतावच्छेदकम् । तस्य प्रतियोगितानवच्छेदकत्वान्नाव्याप्तिः ।

हेत्वधिकरणं च हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकविशिष्टाधिकरणं बोध्यम् । तेन वह्निमान् धूमादित्यादौ समवायेन धूमावयववृत्त्यभावप्रतियोगितावच्छेदकत्वेपि वह्नित्वस्य, द्रव्यं विशिष्टसत्त्वादित्यादौ च शुद्धसत्त्वाधिकरणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि द्रव्यत्वस्य नाव्याप्तिः ।

अभावश्च हेत्वधिकरणावच्छेदेन प्रतियोगिव्यधिकरणः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणश्च बोध्यः । तेन संयोगी द्रव्यत्वात्कपिसंयोगी एतत्त्वादित्यादौ नाव्याप्तिः । न वा संयोगी सत्त्वाद्विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिः ।

प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसम्बन्धेन, तेन ज्ञानवान्सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया ज्ञानाधिकरणत्वेपि न क्षतिः ।

ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्य चिदनधिकरणत्वं, तत्सामान्यस्य, यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम् ।

आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिरपि कपिसंयोगी भवति तदनधिकरणं च वृक्ष इति ।

द्वितीये प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् ।

न च वन्हिमान् धूमादित्यादौ घटाभावादेः स्वात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेस्तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाप्रसिद्धिरिति वाच्यम् ।

घटाभावे यो वन्ह्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वन्हिरपि प्रतियोगी तदधिकरणं च पर्वतादिरिति क्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात् ।

यदि तु घटाभावादौ वन्ह्यभावादिर्भिन्न इत्युच्यते तथापि धूमाभावान् वन्ह्यभावादित्यादावव्याप्तिः । तत्र साध्यतावच्छेदकसम्बन्धः स्वरूपसम्बन्धस्तेन सम्बन्धेन सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति ।

तृतीये तु कपिसंयोगाभाववनात्मत्वादित्यादौ अव्याप्तिः। आत्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्य च गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं तदवच्छिन्नानधिकरणत्वं च हेत्वधिकरणस्यात्मन इति चेन्नैवम्।

यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्।

ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः। हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणत्वेन प्रतियोग्यधिकरणत्वसत्त्वात्।

अत्र केचित्—महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः महाकालस्य घटाधारत्वेपि महाकालभेदविशिष्टघटानाधारत्वान्महाकाले महाकालभेदाभावात्।

यद्वा प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वयत्सम्बन्धावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं व्यापकसामानाधिकरण्यं च व्याप्तिः। अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायानधिकरणान्तं हेत्वधिकरणविशेषणम्।

यद्वा हेतुसामानाधिकरण्यान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वावच्छिन्नवृत्तित्वं व्याप्तिः, अन्योन्याभावस्य व्याप्यवृत्तित्वादत्र न प्रतियोगिव्यधिकरणत्वादिनिवेश इति लाघवमिति जीर्णाः।

तस्याप्यव्याप्यवृत्तित्वात्तथैव प्रतीतेरस्त्येव तद्विवक्षेति नव्याः।

अत्राचार्याः—व्यापकसामानाधिकरण्यं न व्याप्तिः। किं तु व्यापकसम्बन्धमात्रम्। तेनाधश्छायादेरुपरि सवितरि, कृत्तिकोदयस्य रोहिण्युदये हेतुत्वोपपत्तिरित्याहुः।

न चैवं व्यतिरेकव्याप्तौ कथं व्याप्तिपदप्रयोग इति वाच्यम्। अनुमितिकारणीभूतज्ञानविषयव्याप्तेर्लक्ष्यतया व्यतिरेकव्याप्तौ व्याप्तिपदप्रयोगाभावेपि बाधकाभावात्।

वस्तुतो व्यभिचारधीविरोधिधीविषयधर्मविशिष्टहेतुतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतेति युक्तम्। तेनानुमानत्रैविध्यमुपपन्नम्। पञ्चरूपत्वनियमस्त्वविवक्षित इति।

तादृशव्याप्तिग्रहे व्यभिचाराग्रहः सहचारग्रहश्च हेतुः। भूयोदर्शनं तु न हेतुः। व्यभिचारास्मरणे सकृद्दर्शनेनापि व्याप्तिग्रहात्। भूयोद-

र्शनं तु क्वचिद् व्यभिचारशङ्कानिवर्त्तकम्। क्वचित्तर्कः। व्याप्यारोपेण व्यापकारोपद्वारानिष्टप्रसञ्जनं तर्कः। तथाहि वह्निविरहेऽपि धूमः स्यादित्याशङ्का कार्यकारणभावप्रतिसन्धानान्निवर्त्तते। तत्राप्यहेतुको भवत्वित्याशङ्का तु धूमार्थं वह्नेर्नियमत उपादाने प्रवृत्तिर्न स्यादिति व्याघातेन निरसनीया। यत्र स्वत एव शङ्का नावतरति न तत्र तर्कापेक्षेति दिक्॥

व्याप्तिग्रहश्च सकलधूमे सामान्यलक्षणप्रत्यासत्त्या, सा च निरूपिता प्राक्। तदनङ्गीकारे तु महानसीयधूमे धूमत्वप्रकारकव्याप्तिग्रहात् पर्वतीयधूमे धूमत्वप्रकारकव्याप्तिस्मरणोपपत्तिः।

उपाधिज्ञानेन च व्याप्तिग्रहप्रतिबन्धः। स च यद्धर्मावच्छिन्नसाध्यव्यापकस्तद्धर्मावच्छिन्नसाधनाव्यापकः। भवति धूमवान् वह्नेरित्यत्र धूमत्वावच्छिन्नधूमव्यापकं तत्साधनवह्नेरव्यापकमार्द्रेन्धनम्। स श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वं मित्रातनयत्वाव्यापकम्। वायुश्चाक्षुषः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र द्रव्यत्वावच्छिन्नचाक्षुषत्वव्यापकमुद्भूतरूपवत्त्वं तदवच्छिन्न हेतोरव्यापकं च। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं जन्यत्वावच्छिन्नसाध्यव्यापकं साधनाव्यापकं च। एवं यत्र तादृशो धर्मो नास्ति तत्र साध्याधिकरणतदनधिकरणान्यतरत्वरूपधर्मो बोध्य इति।

अयञ्च स्वव्यभिचारेण साधने साध्यव्यभिचारज्ञापनेन व्याप्तिग्रहप्रतिबन्धकः। वह्निरनुष्णः कृतकत्वादित्यत्र वह्नीतरत्वमुपाधिः। अयमेव बाधोन्नीत इत्युच्यते प्रसिद्धानुमाने पर्वतेतरत्वं नोपाधिः। साध्यव्यापकत्वाग्राहकमानाभावात्, अयं च बाधानुन्नीतः। सन्दिग्धपक्षेतरत्वं तु नोपाधिः, सम्प्रदायादिति केचित्।

अन्ये तु उपाधेः सत्प्रतिपक्षोत्थापनेन दूषकता। वह्निना धूमसाधने आर्द्रेन्धनाभावेन तदभावः साध्यते। इत्थं करका पृथिवी कठिनसंयोगवत्त्वादित्यत्र साधनव्यापकमप्यनुष्णाशीतस्पर्शवत्त्वमुपाधिरित्याहुः॥

पक्षत्वं च असत्यां सिद्धौ सत्यां वाऽसत्यामनुमित्सायाम् उभयासत्त्वे वा ऽनुमितेरुदयादनुमित्साविरहविशिष्टायाः सिद्धेरभावः।

अनुमित्सा च यादृशयादृशेच्छासत्त्वे ऽनुमितिः सा सा विवक्षिता। तेन प्रत्यक्षभिन्नं वह्निज्ञानं जायतामालोकेन वह्निज्ञानं जायतामित्यादीच्छासंग्रहः।

अत्रायं निष्कर्षः। तत्साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टतत्प

क्षतावच्छेदकविशिष्टभिन्नाविषयिकाऽनुमितित्वभिन्नप्रमितिविभाजक-धर्माविषयकतल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारकत्वे सति तदन्यलिङ्गतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारिका तल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति तल्लिङ्गतावच्छेदकाविरुद्धधर्मविशिष्टलिङ्गकानुमितित्वावच्छिन्नानुद्देशियका तद्विशिष्टलिङ्गकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिङ्गकत्वाप्रकारिका तल्लिङ्गकालान्यकालाविषयिणी या तदन्यानुमितिः सा तद्विरहविशिष्टसिद्ध्यभावः पक्षतेत्यर्थः।

अत्र तत्साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टतत्पक्षतावच्छेदकविशिष्टभिन्नाविषयिकेतिकरणात्पर्वते वन्ह्यनुमितिर्जायतां, प्रत्यक्षातिरिक्तं ज्ञानं जायतां, पर्वते वह्निप्रत्यक्षं तद्व्याप्यपरामर्शः विषयान्तरे चानुमितिसामग्र्यभावस्तत्र यत्किञ्चिज् ज्ञानं जायतामितीच्छादीनां संग्रहः। अनुमितित्वभिन्नप्रमितिविभाजकधर्माविषयकेतिकरणात् अनुमितौ प्रत्यक्षत्वभ्रमदशायां पर्वतो वह्निमानिति प्रत्यक्षं जायतामितीच्छायाः न संग्रहः। तल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारकत्वे सति तदन्यलिङ्गकतावच्छेदकावच्छिन्नलिङ्गकत्वाप्रकारिकेति करणात् धूमत्वावच्छेदेन व्याप्यत्वपरामर्शदशायां द्रव्यत्वावच्छेदेन द्रव्यत्वावच्छिन्नलिङ्गकानुमितीच्छाया न संग्रहः। तल्लिङ्गतावच्छेदकावच्छिन्नलिङ्गकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति तल्लिङ्गतावच्छेदकविरुद्धधर्मविशिष्टलिङ्गकानुमितित्वावच्छिन्नानुद्देशियकेतिकरणात् धूमेनालोकेन च वन्ह्यनुमितिर्जायतामितीच्छाया न संग्रहः। यत्र द्रव्यत्वस्य लिङ्गतावच्छेदकत्वानुल्लेखिनी द्रव्येण वह्निमनुमिनुयामितीच्छा तस्याः संग्रहश्च। तद्विशिष्टलिङ्गकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिङ्गकत्वाप्रकारिकेति करणाद् यत्र आलोकत्वस्यावच्छेदकत्वानवगाहिनी आलोकेन वन्हिमनुमिनुयामितीच्छा तस्या न संग्रहः। तल्लिङ्गकालान्यकालाविषयिणीतिकरणात् पूर्वकालीनपर्वतीयधूमेन वन्ह्यनुमितिर्जायतामितीच्छाया न संग्रहः॥

गौडप्रलापैः स्वकपोलकल्पितैरिच्छासमारब्धमृषार्थकार्यैः।
वृथैव कालक्षपणं विचिन्त्य चिन्तामयोपेक्षि खपुष्पतुल्या॥

परामर्शश्च यदि पक्षविशेष्यकस्तदा तद्विशेष्यिकैवानुमितिः। हेतुविशेष्यके तु साध्यविशेष्यिकेति मणिकृत्।

उभयविधेनापि पक्षविशेष्यिकैवेति नव्याः।

अत्र धूमलिङ्गपर्वतपक्षकवह्निविधेयकानुमितिं प्रति धूमपरामर्शस्य

हेतुत्वं, धूमलिङ्गकत्वं स्वाव्यवहितोत्तरत्वसम्बन्धेन धूमज्ञानवत्त्वम्, अव्यवहितोत्तरत्वं च धूमज्ञानाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणत्वरूपम्। तेनापेक्षाबुद्ध्यात्मकपरामर्शसंग्रहः। एवं तत्तत्परामर्शानां कारणतेति।

ननु सर्वेषु परामर्शेष्वनुमितिकारणतावच्छेदकतया परामर्शत्वं जातिः किमिति नाभ्युपेयते। चाक्षुषत्वादिना सङ्कर इति चेत्, तर्हि तस्यां जातौ मानसत्वव्याप्यताङ्गीकार्या, चाक्षुषपरामर्शानन्तरं जायमानायामनुमितौ व्यभिचारवारणस्य मध्ये मानसपरामर्शकल्पनेन सम्भवात्। न च चाक्षुषसामग्र्या मानसप्रतिबन्धकत्वेन तदानीं मानसोत्पादासम्भव इति वाच्यम्। फलबलेन चक्षुर्योगाभावेन चाक्षुषसामग्र्याभावस्य सत्त्वात्।

ननु परामर्शत्वं स्मृतित्वव्याप्यम्। चाक्षुषादिपरामर्शोत्तरोत्पद्यमानानुमितिस्थले भवत इव स्मरणरूपपरामर्शकल्पनान्न क्षतिः। एवं च स्मरणस्य संशयात्मकत्वाभावेन संशयानन्तरमनुमित्युत्पादनासम्भवात्। विशेषतः परामर्शकारणतायां निश्चयत्वस्याप्रवेशेनातिलाघवमिति चेत्, चाक्षुषादिपरामर्शोत्तरोत्पद्यमानानुमितिस्थले स्मरणात्मकपरामर्शकल्पने तज्जनकसंस्कारकल्पने चातिगौरवापत्तेः। अनुमितिजनकतावच्छेदकजातेः संशयात्मकमानसव्यावृत्तत्वकल्पनेन संशयात्मकपरामर्शादनुमित्यापादनासम्भवेन विशेषहेतुतायां निश्चयत्वाप्रवेशस्य तुल्यत्वात्। समूहालम्बनात्मकपरामर्शोत्तरमेकानुमितौ तद्व्याप्यवत्तापरामर्शान्तरकल्पनेन समूहालम्बनात्मकपरामर्शेऽनुमितिजनकतावच्छेदकजातिर्न कल्प्यते। अतो न तत्र द्वितीयानुमितिः तस्मात् परामर्शत्वं जातिरिति चेत्।

अत्र केचित्। उक्तनयेनेष्टहेतुताज्ञानादौ प्रवृत्तिजनकतावच्छेदकवैजात्यस्यापि मानसत्वव्याप्यत्वेन सिद्ध्येष्टसाधनत्वादिपरामर्शविशेष प्रवृत्तिजनकतावच्छेदकवैजात्येन सङ्करप्रसङ्गात्। न च प्रवृत्तिजनकतावच्छेदकवैजात्यं चाक्षुषत्वव्याप्यत्वमिति वाच्यम्। परामर्शत्वस्य चाक्षुषत्वादिव्याप्यत्वेन विनिगमनाविरहात्। अतो न परामर्शत्वं जातिरित्याहुः॥

अत्र गौतमीयाः। वह्न्याद्यनुमितौ वह्निव्याप्यालोकवान्पर्वत इत्यादिविशिष्टपरामर्शस्यैव हेतुत्वं, न त्वालोको वह्निव्याप्य आलोकवान्पर्वत इति ज्ञानद्वयस्य, गौरवात्। यत्र च ज्ञानद्वयादनुमितिस्तत्र विशिष्टज्ञानकल्पनान्न व्यभिचार इत्याहुः॥

मीमांसकास्तु वह्निव्याप्यधूमवान् पर्वत इति विशिष्टपरामर्शस्य हेतुत्ववादिनये व्याप्त्यंशे निश्चयत्वं निवेश्य, धूमांशेपि निश्चयत्वं निवेशनीयम्। तथा च निश्चयत्वस्य तदभावाप्रकारकत्वरूपबहुतरपदार्थघटितत्वेन तेषां परस्परविशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यम्। ज्ञानद्वयवादिनये तु ज्ञानस्य भिन्नतया निश्चयत्वप्रवेशेपि न मिथो विनिगमनाविरहस्तत्र लाघवमित्याहुः॥

न च परामर्शवादिनये व्याप्त्यवच्छिन्ना या हेतुनिष्ठप्रकारता तन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन हेतुत्वकल्पनेन व्याप्त्यंशे निश्चयत्वानिवेशेन नोपदर्शितगौरवमिति वाच्यम्। वह्निव्याप्त्यंशे निश्चयत्वानिवेशे वह्निव्याप्यो धूम इति विशेषणतावच्छेदकप्रकारकनिर्णयकाले व्याप्त्यभावप्रकारकं ज्ञानं जायतामितीच्छासत्त्वे व्याप्त्यंशे संशयात्मकतथाविधविशिष्टवैशिष्ट्यबोधोत्पत्तौ बाधकाभावः। तथा च तादृशज्ञाने व्याप्त्यंशे निश्चयत्वनिवेशेन गौरवतादवस्थ्यात्।

न च तादृशज्ञानस्याहार्यत्वेन न तस्मादनुमित्यापत्तिः। आहार्यपरामर्शादनुमित्यापत्तिवारणार्थमनाहार्यत्वनिवेशस्यावश्यकत्वादिति वाच्यम्। अनुमितिजनकतावच्छेदककोटावनाहार्यत्वस्यानुगतस्याशक्यनिर्वचनत्वेन तत्तद्व्यक्तिविश्रान्ततया तथाविधतद्व्यक्तित्वावच्छिन्नभेदकूटस्यानुमितिजनकतावच्छेदककोटौ निवेशमपेक्ष्य व्याप्त्यंशे निश्चयत्वस्यैव तर्कसहत्वात, तथा च गौरवं तदवस्थमिति दिक्।

ज्ञायमानं लिङ्गमनुमानमिति केचित।

भूतभाविलिङ्गाभ्यामनुमित्यजननापत्तेस्तज्ज्ञानमिति युक्तम्॥

तच्चानुमानं द्विविधं, स्वार्थं परार्थं च। परामर्शेन स्वस्यैव साध्यज्ञानजनकं स्वार्थम्। प्रतिज्ञाद्यवयवप्रयोगेण परस्य साध्यज्ञानजनकं परार्थम्।

अवयवत्वं चानुमानवाक्यैकदेशत्वम्। ते च प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः पञ्च।

साध्यविशिष्टपक्षप्रतिपादकवाक्यत्वं प्रतिज्ञात्वं, यथा 'पर्वतो वह्निमानि'ति।

तृतीयान्तपञ्चम्यन्तान्यतरानुमितिप्रयोजकवाक्यत्वं हेतुत्वं, यथा 'धूमवत्वादि'ति।

सदृष्टान्तव्याप्तिप्रतिपादकवाक्यत्वमुदाहरणत्वं, यथा 'यो धूमवान् सोऽग्निमान् यथा महानस' इति।

व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षप्रतिपादकवाक्यत्वमुपनयत्वं, यथा 'तथा चायमि'ति ।

व्याप्तिविशिष्टवैशिष्ट्यहेतुकसाध्यविशिष्टपक्षप्रतिपादकवाक्यत्व निगमनत्वं, यथा 'वह्निव्याप्यधूमवत्त्वाद् वह्निमानि'ति ।

उदाहरणं साधर्म्योदाहरणं वैधर्म्योदाहरणं चेति द्विविधम् । हेतुमदुद्देशेन साध्यवदुपादानमाद्यम् । साध्याभाववदुद्देशेन हेत्वभाववदुपादानं द्वितीयम् । तत्रैकेनैव गतार्थत्वान्न द्वयोरावश्यकतेति । एवं चावयववाक्यैरवान्तरवाक्यार्थज्ञाने जनिते धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो धूमव्यापकवह्निमन्महानससदृशो वह्निव्याप्यधूमवत्त्वहेतुकवह्निमदभिन्न इति महावाक्यार्थज्ञानात्परः साध्यं बुध्यते इत्यक्षपादीयाः ॥

प्रतिज्ञाहेतूदाहरणैरेव धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो वह्निव्याप्यधूमवन्महानससदृश इति वाक्यार्थज्ञानादनुमितिजननादुपयनिगमने व्यर्थे ।

न च पर्वते धूमवैशिष्ट्यज्ञानार्थमुपनयः । प्रतिज्ञाहेतुभ्यामेव सिद्धेः । निगमनप्रयोगस्तु सर्वथैव व्यर्थः । एवं चोपनयनिगमनेनावयवावेति ॥ यद्वोदाहरणप्रभृतिभिरेव साध्यसिद्धेः प्रतिज्ञाहेत्वोर्न किं चित्प्रयोजनमिति दिक् ॥

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानप्रकारो हेतुनिष्ठदोषो हेत्वाभासः । भवति चासिद्धत्वानैकान्तिकत्वबाधकत्वादिज्ञानाभावः प्रतिबन्धकाभावविधया ऽनुमितिकारणीभूतस्तत्प्रतियोगिप्रमाप्रकारत्वमासिद्धत्वादीनां तेन हेतुनिष्ठो दोषो हेत्वाभासः । यादृशविशिष्टविषयत्वेन यथार्थज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वमिति यावत्

यद्वा तादृशप्रमाविषयत्वम् । तेन दुष्टो हेतुर्हेत्वाभासः । धूमो वह्निव्यभिचारीत्यादिभ्रमवारणाय यथार्थेति । उपाधिवारणाय कारणेति उपाधिज्ञानस्य साक्षात्प्रतिबन्धकत्वाभावेन तदभावस्यानुमितिप्रयोजकतया हेतुत्वाभावात् । ते त्रयोऽसिद्धानैकान्तिकबाधकाः । तत्रासिद्धिःस्वरूपासिद्धिः सम्बन्धासिद्धिर्व्यतिरेकासिद्धिराश्रयासिद्धिर्व्याप्यत्वासिद्धिश्चेति पञ्चधा ॥

हेत्वप्रसिद्धिः स्वरूपासिद्धिः । बुद्धो धर्माधर्मवेदी सर्वज्ञत्वादिति । अत्र सर्वज्ञत्व हेतुरप्रसिद्धः । पक्षे व्याप्यत्वेनाभिमतस्याभाव स्वरूपासिद्धिरित्यक्षपादीयमते त्वीश्वरे प्रसिद्धिसत्त्वे बुद्धे तदभावादक्षतिः ।

पक्षे व्याप्यत्वाभिमतस्य हेतुतावच्छेदकसम्बन्धेनाभावः सम्बन्धासिद्धिः । वह्निरदाहकः शीतत्वादिति ।

पक्षतावच्छेदकहेत्वोरभेदे व्यतिरेकासिद्धिः। गोशब्दः सास्नादिमद्वचनो गोशब्दत्वात्। अयमसाधारणानैकान्तिक इत्यक्षपादीयाः। इदमेव पक्षमात्रवृत्तित्वमसाधारणस्य। अत्र साध्यवत्साध्याभावसाधकतया ऽनुमितिप्रतिबन्धो दूषकताबीजम्।

पक्षाप्रसिद्धिराश्रयासिद्धिः। अकाशो नित्यो निरवयवद्रव्यत्वादिति। सौत्रान्तिकमाकाशाभाववादिनं प्रत्याश्रयासिद्धिः। पक्षतावच्छेदकाप्रसिद्धिरपि सा। काञ्चनमयपर्वतो वह्निमानिति।

पक्षैकदेशे हेतोरवृत्तित्वं व्याप्यत्वासिद्धिः। यथा वायुराकाशश्चानित्यो मूर्त्तत्वादिति। साध्ये साध्यतावच्छेदकस्य, हेतौ हेतुतावच्छेदकस्याप्रसिद्धिर्व्याप्यत्वासिद्धिः। काञ्चनमयवह्निमान् काञ्चनमयधूमादिति।

एवं नीलधूमादित्यादावपि नीलधूमत्वस्य गुरुतया हेतुतानवच्छेदकत्वेन सापि व्याप्यत्वासिद्धिरित्यक्षपादीयाः।

साध्यसन्देहजनको हेतुरनैकान्तिकः। सन्देहजनकत्वं च साध्यतदभावसम्बन्धित्वज्ञानेन सत्प्रतिपक्षितत्वेन च। यथा नित्यः शब्दो ऽमूर्त्तत्वादिति। अत्रामूर्त्तत्वमनित्यक्रियादिसाधारणत्वात् साध्यसन्देहं जनयति। एवं वायुरप्रत्यक्षो ऽरूपिद्रव्यत्वात्। वायुः प्रत्यक्षो महत्त्वे सत्युद्भूतस्पर्शवत्त्वात्। अत्रोभयोः समबलत्वात्साध्यसन्देहजनकतेति। अत्र साध्यतदभावव्याप्यताज्ञानात्परस्परानुमितिप्रतिबन्धो न संशयाकारानुमितिरित्यक्षपादीयाः।

अत्राहुः स्थाणुत्वपुरुषत्वव्याप्यवत्ताज्ञाने प्रत्यक्षरूपसंशयवत्सत्प्रपक्षस्थलेपि संशयाकारानुमितिरस्तु। यत्रैककोटिव्याप्यदर्शनं प्रबलं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः। फलबलेन चाधिकसमबलभावः कल्प्य इति॥

अत्र नव्याः—तदभाववत्ताज्ञानस्येव तदभावव्याप्यवत्ताज्ञानस्यापि लौकिकसन्निकर्षाजन्यज्ञानत्वमेव प्रतिबध्यतावच्छेदकं तेन न संशयाकारानुमितिरित्याहुः॥

बाधकस्तु साध्याभावसाधकः। अयं विरुद्ध इत्यक्षपादीयाः। यथा शब्दो नित्यः कृतकत्वादिति। अत्र कृतकत्वमनित्यत्वव्याप्यं नित्यत्वं बाधते। अयं साध्यसामान्यविपर्ययसाधक इत्युच्यते इति दिक्॥

तदिदनुमानं न धर्मप्रमितिजनकं व्याप्त्याभावेन व्याप्त्यग्रहादिति॥

अत्र नैयायिकाः। एवमनुमाननिरूपणस्य जगन्निर्मातृपुरुषधौरेयसिद्धिः प्रयोजनम्। तथाहि। सिद्धसाधनाभिया जन्यकृत्यजन्यं द्व्यणुकं पक्षीकृत्य सकर्तकं कार्यत्वादित्यनुमानेन तत्सिद्धिरित्याहुः।

तदापातरमणीयम्-धर्मवद्वेदमात्रगम्यत्वेन तदावेदकानुमानासम्भवात् । तथाहि । उक्तानुमानस्याकर्तृकत्वसाधकेन शरीराजन्यत्वेन सत्प्रतिपक्षितत्वात् । यदि चात्र शरीरविशेषणस्य स्वरूपासिद्धिवारकतया व्यर्थविशेषणत्वेन नित्यत्वोपाधिकतया व्यभिचारित्वेन च सत्प्रतिपक्षासम्भव इति विभाव्यते,तदा भवत्पक्षमेव पक्षीकृत्य अशरीरमात्रकर्तृकत्वाभाववद्वस्तुत्वादिति सत्प्रतिपक्षः ।

न चात्रापि नित्यत्वमुपाधिः । देहाङ्कुरादावेवाशरीरमात्रकर्तृकत्वसन्देहेन घटादौ तदभावस्यासन्दिग्धतया साध्यव्यापकत्वाभावात् कार्यत्वहेतोश्चाशरीरमात्रकर्तृकत्वाभावसाधकतया साधारणानैकान्तिकत्वं च बोध्यम् । अतो वेद एवेश्वरसिद्धौ प्रमाणं नान्यदिति दिक् ॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ ईश्वरवादः ॥

नन्वेवं वन्हिर्दाहानुकूलाद्दिष्टातीन्द्रियधर्मसमवायी, दाहजनकत्वाद्, अदृष्टवदात्मवदित्यनुमानस्यानुकूलतर्काभावेनाप्रयोजकत्वादुत्तेजकाभावविशिष्टमण्यादिप्रतिबन्धकाभावस्यैव दाहजनकतया मण्यादिसमवधानमनाश्यतयाऽपि शक्तिकल्पनस्यानुपपत्तेस्तद्बोधकवेदाभावाच्च शक्तिरपि न सिध्येदिति चेन्न—

तृणारणिमणीनां व्यभिचारेण वन्हित्वावच्छिन्नजनकत्वग्रहानुपपत्त्या कार्यनिष्ठवैजात्यकल्पनापूर्वकहेतुहेतुमद्भावत्रयकल्पनमपेक्ष्य तृणादिनिष्ठजनकत्वावच्छेदकसहजशक्त्यङ्गीकारेणैकहेतुहेतुमद्भावकल्पनालाघवतर्कसहकृततृणादिपक्षकवह्निजनकत्वहेतुकतादृशधर्मानुमानस्य तत्र मानत्वात् । एवं वैकल्पिकव्रीहियवयोरपि हेतुताग्रहे लाघवं, व्यभिचारवारणं च ।

न च प्रदेयप्रकृतित्वेनोभयोर्हेतुत्वाज्जनकतावच्छेदकशक्त्यभावेऽपि न व्यभिचार इति वाच्यम् । व्रीहिनिष्ठकारणताग्रहे प्रदेयप्रकृतित्वग्रहस्तद्ग्रहे च तद्ग्रह इत्यन्योन्याश्रयात् ।

नाप्याग्नेयत्वव्याप्यवैजात्यस्य कार्यतावच्छेदकत्वकल्पनेन व्यभिचारपरिहारः । तादृशजातौ मानाभावात् । व्रीहिजन्यतावच्छेदकतयैव तत्कल्पने विकल्पो दत्तजलाञ्जलिः स्यात् । शक्तेश्च प्रत्येकपर्याप्ततया न समुच्चयापत्तिः । अन्यथाऽन्यतराभावविशिष्टान्यतरस्योभयाभावविशिष्टव्रीह्यादेर्वा हेतुत्वकल्पने गौरवापत्तिः व्यभिचारश्च । अतो जनकतावच्छेदकतया सहजशक्तिस्तावदावश्यकी ।

एवमाधेयशक्तिरपि प्रोक्षणादिजन्या व्रीहिनिष्ठा। अन्यथा प्रोक्षणादिजन्यापूर्वस्यात्मनिष्ठतया व्रीहीणां प्रोक्षणकर्मत्वानुपपत्तिः। अदृष्टवदात्मसंयोगेनादृष्टवत्तया कर्मत्वोपपत्तौ घटादीनामपि तत्कर्मत्वापत्तिः।

तेन व्रीहिजन्यापूर्वजनिकाधेयशक्तिरप्यावश्यकी। तयोश्चायमेव भेदो यत्सहजशक्तिर्जनकतावच्छेदिका, आधेयशक्तिर्जनिका जन्या चेति।

न च प्रोक्षणजन्यशक्तिमद्व्रीहित्वेनापूर्वजनकतया हेतुतावच्छेदकत्वं सम्भवति। तादृशशक्तिमद्यवजन्यतदपूर्वे व्यभिचारात्। शक्तिव्रीहित्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण हेतुहेतुमद्भावद्वयकल्पनं तथा यवत्वेऽपीति तच्चतुष्ककल्पनेऽतिगौरवापत्तिः।

एवं सर्पविषमन्त्रोच्चारणजन्यपरशरीरनिष्ठाधेया शक्तिर्जीवनजनिका विषबाधापहारजनिका वा, प्रतिष्ठादिजन्या च पाषाणनिष्ठा पूजाहेतुश्चाण्डालादिस्पर्शनाश्याऽप्यावश्यकीति।

पदशक्तिस्तूभयसिद्धा। तच्छाब्दबोधजनकपदत्वहेतुकानुमानगम्या, वृद्धैस्तत्र प्रयुज्यमानत्वहेतुकानुमानगम्या वा। परं तु सेश्वरेच्छारूपाऽतिरिक्ता वेत्यावयोर्विवादः। तत्रेश्वरेच्छावदीश्वरसंयोगस्य गुणरूपपदेऽसम्भवात्तत्तत्स्वरूपाणां सम्बन्धत्वकल्पनमपेक्ष्यैकसमवायस्योचितत्वात् पदानामर्थानामनित्यत्वेपि नानुपपत्तिः।

वस्तुतस्तु पदानां नित्यत्वाज्जात्यादिरूपाणामर्थानां च तथात्वाच्छक्तिरपि नित्येति तत्सम्बन्धस्य सुतरां नित्यतेति नानुपपत्तिलेश इति दिक्॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ शक्तिवादः॥

नन्वेवं कारणताऽप्यतिरिक्ता स्यात्। तन्न तावत्कार्याभावव्यापकाभावप्रतियोगित्वम्। ईश्वरतज्ज्ञानेच्छादावव्याप्तेः। अत एव न कार्यव्यापकत्वम्। व्याप्तेरनन्तपदार्थगर्भतया गौरवात्। नापि कार्योत्पत्तिप्रतिबन्धकाभावप्रतियोगित्वम्। उत्तेजकेऽव्याप्तेरिति चेन्न।

तस्यानन्यथासिद्धनियतपूर्ववर्त्तित्वरूपतया तदभिव्यञ्ज्यधर्मान्तरकल्पने मानाभावात्। अत्र दैवादागते हेतुत्ववारणाय नियतेति। तद्घटे तद्रासभस्य हेतुत्ववारणायानन्यथासिद्धेति॥

वस्तुतस्तु नियतपदं व्यर्थम्। तच्चान्यथासिद्धत्रैविध्यराहित्यम्। गृहीतस्वतन्त्रान्वयव्यतिरेकाननुविधानावच्छेदकधर्मत्वमाद्यम्। अन्यनिरूपितपूर्ववर्त्तित्वग्रहहेतुककार्यपूर्ववर्त्तित्वग्रहविषयत्वं द्वितीयम्। क्लृ-

प्तान्वयव्यतिरेकानुविधानसाहित्यं तृतीयम् । अत्राक्लृप्तान्वयव्यतिरेकानुविधायिन इति विवक्षणीयम् । तेन न कारणान्तरस्यान्यथासिद्धिः । ईश्वरज्ञानादिसंग्रहश्च । तस्योपादानप्रत्यक्षतया स्वतन्त्रान्वयव्यतिरेकानुविधानात् ।

तच्च कारणं द्विविधं, स्वरूपयोग्यं फलोपहितं चेति । सहकार्यन्तराभावावच्छिन्नजनकत्वाभाववैशिष्ट्यमाद्यम् । सहकार्यन्तरसाहित्यं द्वितीयम् । अत एव नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियम इति प्रसिद्धिः । एवं च क्लृप्तकार्यपूर्वकालदेशसम्बन्धस्यैव कारणतया नाक्लृप्तकारणत्वरूपपदार्थान्तरतत्प्रागभावध्वंसादिकल्पनम् ॥

प्रयोजकत्वं चान्वयव्यतिरेकवत्त्वे सति नियतपूर्ववृत्तित्वमात्रमिति दिक् ॥

प्रसङ्गात्सृष्टिप्रलयौ चिन्त्येते ॥

अत्र नैयायिकवैशेषिकौ । त्रिविधं वस्तुजातं, संप्रतिपन्नचेतनकर्तृकं यथा घटादि, सम्प्रतिपन्नचेतनाकर्तृकं व्योमादि, विप्रतिपन्नचेतनकर्तृकं महीरुहाङ्कुरादि । तत्र तृतीयं सावयवत्वेन सिद्धकार्यत्वकं पक्षीकृत्य बुद्धिमत्कर्तृकं कार्यत्वात्पटवदिति ईश्वरं कर्त्तारमनुमापयति । तस्य च परमाणवः समवायिकारणं, तत्संयोगश्चासमवायिकारणं, क्षेत्रज्ञपदवाच्या जीवात्मानो धर्माधर्मौ च निमित्तकारणम् । सर्गकाले पुनरीश्वरेच्छामदृष्टं च निमित्तमासाद्य परमाणुषु कर्माण्युत्पद्यन्ते । ततो मिथः संयुक्तैः परमाणुभिर्द्व्यणुकादिक्रमेण पृथिव्याद्यवयविचतुष्टयमारभ्यते ।

न च परमाणूनां निरवयवत्वादव्याप्यवृत्तिः परमाणुसंयोगो न सम्भवतीति वाच्यम् । तत्र व्याप्यवृत्तिसंयोगस्याङ्गीकारात् । तत्तद्देशस्यावच्छेदकत्वसम्भवेनाव्याप्यवृत्तिसंयोगस्यापि परमाणौ नानुपपत्तिः । निमित्तभूतादृष्टवैचित्र्यादीश्वरेच्छाजन्यक्रियावैचित्र्यवशाच्च जरायुजाण्डजोद्भिज्जस्वेदजभेदं शरीरमारभन्त, इत्यूचतुः ॥

इदमेव युक्तमस्मन्मतं च । परं त्वेतावान् विशेषः । इच्छायाः कार्यमात्रजनकत्वे न किं चिन्मानमस्ति । न चात्मनिष्ठप्रयत्नोत्पादनं विनेच्छायाः कार्यजनकत्वम् । अचेतननिष्ठक्रियादिजनकत्वं च नानुभूतपूर्वम् । अतस्तादृशहेतुहेतुमद्भावकल्पनेनात्यन्तगौरवापत्तिः । आवश्यकादृष्टहेतुकतयाऽन्यथासिद्धिश्च । अतो धर्माधर्मयोरेव विजातीयक्रियाजनकत्वं, नेश्वरेच्छाप्रयत्नादीनामिति । तेनेश्वरेच्छायान्तस्याः कार्यजनकत्वे च "स ऐक्षत बहु स्यां प्रजायेये"ति श्रुतिरेव मानम् । तत्र

च "आत्मन आकाशः सम्भूत" इत्यादाविवक्षितिरेदृष्टे लाक्षणिक इत्यलं पल्लवितेन ॥

ननु प्रलये किं मानमिति चेन्न—

कालकपालान्यवृत्तिप्रागभावः कार्यद्रव्यानाधारकार्याधिकारणवृत्तिः, अभावत्वाद्, आत्मावृत्त्यन्योन्याभाववद्, इत्यनुमानेन, घटः कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगी, भावकार्यत्वात्, शब्दवद्, इत्यनुमानेन च खण्डप्रलयस्य,

पटः, अदृष्टासमानकालीनध्वंसप्रतियोगी, भावकार्यत्वाद्, मुक्त्यव्यवहितप्राक्कालीनज्ञानवद्,

बुद्धिः, प्रागभावासमानकालीनध्वंसप्रतियोगिनी भावकार्यत्वाद्, मुक्त्यव्यवहितप्राक्कालीनादृष्टवत्,

सुखं, गन्धानाधारसमयवृत्तिध्वंसप्रतियोगि, जन्यगुणत्वात्, संस्काराजनकानुभववद्, आकाशवदिति व्यतिरेकिणा,

एककालीनाः सर्वे परमाणवः, समग्रोपादेयप्रबन्धशून्याः; आरम्भकत्वाद्, नष्टपवनारम्भकत्वाद्, नष्टपवनारम्भकपरमाणुवद्,

दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवत् इत्याचार्योपदर्शितानुमानेन च महाप्रलयस्य च सिद्धेः। एवं च नन्दान्तं क्षत्रियकुलमित्यादिपौराणव्यवहारोपपत्तिरित्याहुः ॥

अत्र जैमिनीयाः—उक्तानुमानेन "धाता यथापूर्वमकल्पयदि"त्यादिमन्त्रलिङ्गेनावान्तरप्रलयसिद्धावपि महाप्रलये नास्ति प्रमाणम्। उक्तानुमानानामुपाधिग्रस्तत्वात्। तथाहि। अमूर्त्तमात्रवृत्त्यभावत्वस्योपाधित्वात्। उक्तः पक्षः, कार्यद्रव्याधाराधारः, मूर्त्तमात्रवृत्त्यभावत्वात्, तन्तुनिष्ठपटप्रागभाववदिति सत्प्रतिपक्षाच्च। एवं द्वितीयतृतीययोरमूर्त्तमात्रवृत्तिभावत्वमुपाधिः। एवं महाप्रलयानुमाने, उक्ताः परमाणवः, समग्रोपादेयप्रबन्धवन्तः, प्रागभाववत्वात्, कपालवदिति सत्प्रतिपक्षः।

आचार्यानुमानं तु "धाता यथापूर्वमकल्पयदि"ति श्रुतिविरोधात्,

अचन्द्रार्कग्रहा भूमिः कदाचित्तु भविष्यति।
अपौरवा तु पृथिवी कदापि न भविष्यति" ॥

इति हरिवंशरूपव्याससमृतिविरुद्धत्वाद्; यावत्तैलं तावद्व्याख्यानमिति दृष्टान्तप्रसिद्धतैलाभावादिरूपोपाधिविस्मरणाच्चानाचार्यानुमानमेव। अन्यथा नरशिरःकपालं, शुचि, प्राण्यङ्गत्वात्, शङ्खवदि-

त्यनुमानस्यापि प्रामाण्यापत्तेः । एवमन्येष्वप्यनुमानेषु दूषणान्यूह्यानीति दिक् ॥

वेदान्तिनस्तु "सर्वं खल्विदं ब्रह्म, नेह नानास्ति किं चेनत्य" द्वैतवादश्रुतिभिः 'सदात्मकं जगदादावासीत् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इत्यादिब्रह्मोपादानत्वावेदकश्रुते "रिन्द्रो मायाभिः पुरुरूप ईयत" इति भेदावगमस्य मायारूपाविद्यानिबन्धनत्वश्रुतेश्च सदेव व्योमादिरूपेण परिणतमिति चिदेकरसस्य च ब्रह्मणो जडरूपेण परिणामोऽनेकत्वं च न वास्तवं. किं त्वविद्योपाधिकं. स्वप्नप्रपञ्चवत्प्रत्यक्षविरोधिश्रुतिजन्यं ज्ञानं चन्द्रतारकापरिमाणबोधकवाक्यवत् प्रत्यक्षबाधेनोपपन्नम् । एवं च "लोकास्तं परादुरन्यत्रात्मनो लोकान् यः पश्यति, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती"त्यादयो भेदज्ञाननिन्दार्थवादा उपपद्यन्ते तेन प्रपञ्चो ऽविद्योपाधिको ऽपारमार्थिकः । अत एव सदसद्विलक्षण इत्याहुः ॥

तत्र किमिदमपारमार्थिकत्वं मिथ्यात्वमिति चेत्, किमिदं मिथ्यात्वम् ।

न तावच्छशशृङ्गादिवदत्यन्तासत्त्वन्तत् । अबाधितप्रत्यक्षादिविषयप्रपञ्चे तदभावात् ।

नापि ज्ञानबाध्यत्वमज्ञानजन्यत्वं वा । घटादेर्ज्ञानबाध्यत्वाभावाद् अज्ञानस्य जनकत्वे ऽबाधितमानाभावेनाज्ञानजन्यत्वासम्भवाच्च ।

न त्वागमेन तद्बोधः । मिथ्याभूतप्रपञ्चान्तर्गतागमेन प्रत्यक्षदृष्टप्रपञ्चे मिथ्यात्वबोधासम्भवात् । अन्यथा वेदबोध्ययागस्वर्गसाध्यसाधनभावज्ञाने मिथ्यात्वबोधप्रसङ्गात् । इष्टापत्तौ स्वर्गसाध्यसाधनभावज्ञानेन ब्रह्मज्ञाने मिथ्यात्वबोधापत्तिः । आगमजन्यत्वाविशेषात् ।

नाप्यनिर्वाच्यत्वं तत । अनिर्वाच्यपदार्थस्य लोके ऽसम्भवात् प्रपञ्चस्यापि निर्वचनीयत्वेनानिर्वचनीयत्वाभावाच्च । किं चैवं श्रुतिबोध्यप्रपञ्चमिथ्यात्वेपि मिथ्यात्वप्रसङ्गः । तदङ्गीकारे सिद्धं प्रपञ्चस्यामिथ्यात्वमिति दिक् ।

इदमत्र वेदान्तिनामाकूतम् । चैत्रस्य शुक्त्यज्ञानमित्यादौ चैत्रनिष्ठशुक्तिज्ञानस्याभाव इति न बोधः, प्रतियोग्यप्रसिद्धेः, किं तु चैत्रनिष्ठं शुक्त्यज्ञानमिति तदर्थः । तेनाज्ञानं भावरूपः पदार्थः । तस्य च शुक्तिरजतहेतुत्वं लाघवाद्, न तु तज्ज्ञाने, गौरवात् । किं च तत्र रजतं पश्यामीति लौकिकसाक्षात्कारो ऽनुभवसिद्धः । तत्र लौकिकसन्निकर्षस्य विषयस्य च हेतुतेति तत्र रजतोत्पत्तिरावश्यकी ।

एतेन तत्र रजतत्वमेव विषयः, ज्ञानलक्षणा चालौकिकसन्निकर्ष इत्यपास्तम् ।

अज्ञानं च जीवानां न ब्रह्मणः । एवं चाधिष्ठानाज्ञानस्य शुक्तिरजतादौ हेतुत्ववन्निष्प्रपञ्चब्रह्माज्ञानस्य जीवसम्बन्धिनः प्रपञ्चहेतुत्वमिति । इदमेव मिथ्यात्वं सदसद्विलक्षणत्वं चेति पूर्वमतोपपत्तिरिति, नेदमपि युक्तम् ।

अधिष्ठानज्ञानेपि शंखपीतिमोत्पत्तेरधिष्ठानाज्ञानस्योत्पादकत्वायोगात् । न च तत्र दोषस्य हेतुत्वेन दोषाजन्यरजताद्युत्पत्तावधिष्ठानाज्ञानस्य हेतुत्वमिति वाच्यम् । तर्हि परमाण्वाद्युपादानाजन्यस्वाप्नादिप्रपञ्च एवाधिष्ठानाज्ञानस्य हेतुत्वमस्तु, न प्रपञ्चमात्रे । किं च चन्द्रतारकापरिमाणशङ्खपीतिमादीनामधिष्ठानज्ञाने सत्यपि कथमुत्पत्तिः । भवतां विशेषदर्शने सत्यपि भ्रान्तेरिव दोषवशादिति चेत् । तर्ह्यविद्यातिरिक्तस्यापि प्रपञ्चहेतुत्वापत्त्या गतमज्ञानकारणत्वनियमेन ॥

यत्तु रजतं पश्यामीति लौकिकसाक्षात्कारे विषयस्य लौकिकसन्निकर्षस्य च हेतुत्वसिद्धये रजतोत्पत्त्यङ्गीकार इति, तदपि पुरोवर्त्यंशे लौकिकत्वेन रजतत्वांशे अलौकिकत्वेन दोषजन्यत्वाङ्गीकारेण परास्तम् ।

यत्तु रजतज्ञानत्वस्य कार्यतावच्छेदकत्वमपेक्ष्य रजतत्वस्यैव कार्यतावच्छेदकत्वे लाघवमिति, तदपि अज्ञानस्य कारणत्वकल्पनमपेक्ष्य लघुभूतमेव । न चैवमधिष्ठानज्ञानेपि भ्रमापत्तिः । लौकिकतदभावसाक्षात्कारस्य तद्वत्ताज्ञानं प्रति प्रतिबन्धकत्वात् । "मायां तु प्रकृतिं विद्या"दित्यादिश्रुतेरपि स्वाप्नसृष्टिविषयत्वेन मायापदस्य दोषपरत्वेन वा व्याख्यानादिति संक्षेपः ॥

केचित्तु परमात्मैव स्वेच्छया परमार्थत एव व्योमादि जनयति "सदेव सौम्येदमग्र आसीत्, तदैच्छत्, बहुस्यां प्रजायेय" इति, तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इति, पुरुष एवेदं, नेह नानास्ति किं चनेत्यादिश्रुतयोमुमेवार्थं प्रकटयन्ति ।

अत्र ह्याद्यश्रुतिद्वयेनात्मनस्तद्रूपत्वेन प्रागवस्थितस्य बीजस्येव हेतुत्वं व्योमादीनां च वृक्षस्येव तत्कार्यत्वमुक्तम् । अपरश्रुतिद्वयेन धर्मिभेदाभाव उक्तः । नानाशाखस्य वृक्षस्यानेकत्वेन ज्ञातस्यैकबोधवत् यानि तु "आत्मैवैकः सत्यः, इन्द्रो मायाभिः पुरुरूप ईयत" इत्यादिनिष्प्रपञ्चस्य मिथ्यात्ववादसत्यत्ववादभ्रान्तिवादमायावादबोधकानि, तान्यस्यानित्यत्वमेव प्रतिपादयन्ति । अपशवो वा अन्ये गोअश्वेभ्य

इतिवत् । एतेषामपि मुमुक्षूणामुत्साहजननार्थतया वैराग्यजननार्थतया च प्रपञ्चासत्यत्वात्मपरमार्थसत्यत्वप्रतिपादकतयार्थवादत्वस्य तुल्यत्वात् । विस्पष्टं चैतद् "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"ति श्रुतौ । मृत्पिण्डभावेन सकलतद्विकारशरावघटादिज्ञानमिवात्मज्ञानेन तज्जन्यसकलप्रपञ्चज्ञानमित्यर्थः । यद्यपि व्यासरूपेण न ज्ञानं तथापि समासरूपेणेत्युपपत्तिः । तच्च प्रपञ्चस्य सत्यत्वे उपपद्यते । नहि सद्रूपज्ञानेनासत्यस्य ज्ञानं, शशविषाणादिज्ञानप्रसङ्गात् । अतः सत्यत्वमेव प्रपञ्चस्य युक्तमित्याहुः ॥

निरीश्वरसाङ्ख्यास्तु प्रकृतिरचेतना सत्त्वरजस्तमोगुणात्मिका प्रधानशब्दवाच्या चेतनात्मनामुपभोगाय महदादिविशेषप्रपञ्चरूपेण परिणमतीत्याहुः ॥

सेश्वरसाङ्ख्यास्तु प्रकृतिरेवाविद्यास्मितारागद्वेषाभिनिवेशक्लेशकर्मविपाकाशयैरपरामृष्टं सर्वव्यापिनं पुरुषशब्दवाच्यमीश्वरमधिष्ठाय महदहङ्कारपञ्चतन्मात्रादिक्रमेण जगत्सृजति । बीजमिव संस्कृतं क्षेत्रमधिष्ठायाङ्कुरादिक्रमेण वृक्षादि । तस्मात्प्रकृत्युपादाना सृष्टिरीश्वरभिन्नक्षेत्रज्ञपदवाच्यजीवभोग्या । प्रकृतेरैक्येऽपि भोक्तृणां भेदात्प्रपञ्चवैचित्र्योपपत्तिः । औपनिषदास्त्वैकात्म्यवादाः सादृश्यपरत्वेन व्याख्येयाः । एवं नानात्वनिषेधाश्च । एतदभिप्रायेणैव—

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" ॥

इति ।

"इन्द्रो मायाभिः पुरुरूप ईयत" इति च ।

मुक्तात्मनामीश्वरेण सहैकत्ववादास्तेऽप्यत्यन्तसाम्येन वैलक्षण्याभावेन वोपपादनीयाः ।

"यदा पश्यः पश्यति रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" ॥

इति श्रुत्या परमसाम्योक्तेः ।

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

इति भगवद्वाक्येनापि साम्योक्तेः ।

न च

"ममैवांशो जीवलोके जीवभूतः सनातनः"

इति भगवद्वचनस्य,

"भेदस्य जनके ज्ञाने नाशमात्यन्तिकं गते ।

आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति" ॥

इति पुराणवचनस्य चानुपपत्तिः । तयोः स्वामिभृत्यभावबोधकत्वेनोपपत्तेः । एवं च—

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"

"उपद्रष्टा ऽनुमन्ता च कर्त्ता भोक्ता महेश्वरः ।

परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः" ॥

इति भेददर्शनमुपपद्यते । तस्मात्प्रकृत्युपादानोयं प्रपञ्च इत्याहुः ॥

तदपि न—प्रकृतेरेकरूपतया हेतुवैलक्षण्याभावेन नरपश्वादिरूपकार्यवैलक्षण्यानुपपत्तेः । क्षेत्रज्ञादृष्टवशाद्वैलक्षण्यमित्यप्यदृष्टस्य कार्यवर्गान्तः पातितया प्रकृतौ विलीनत्वेनाकारणत्वाद्वक्तुमशक्यम् । कुतो वा प्रकृत्या महदादिविकारारम्भः । ईश्वरेच्छयेति चेत्, तस्यापास्तसमस्तकामस्येच्छाभावात् । किं च प्रलये प्रकृतिमात्रस्यात्मनां च निर्विशेषाणामवस्थितत्वाद्धर्माधर्मयोश्चान्तःकरणधर्मतया तदानीमभावात् पूर्वजन्मनि कृताश्वमेधानां कृतमहापातकानां च विशेषो न स्यात् ।

न चासतः शशविषाणादेरुत्पत्तिनाशयोरदर्शनान्नियतोत्पत्तिदर्शनाच्चोत्पत्तिनाशयोराविर्भावतिरोभावरूपतया शक्त्यात्मनावस्थितधर्माधर्मवशेन वैचित्र्योपपत्तिरिति वाच्यम् । मृत्पिण्डकपालावस्थयोर्घटसत्त्वस्यानुपलब्धिबाधितत्वात् । "नासतो विद्यते भाव" इति तु "न त्वेवाहं जातु नास" मिति नित्यत्वप्रतिपादनोपक्रमादात्ममात्रस्यानुत्पत्तिविनाशधर्मत्वप्रतिपादकं, न सर्वस्य कार्यजातस्य । अस्तु वा कारणात्मना ऽवस्थानं तथापि मृदात्मना ऽवस्थितघटादिनोदकाहरणासम्भववत्प्रकृत्यात्मना ऽवस्थितधर्माधर्माभ्यामपि न वैचित्र्यसम्भवः । यदि तु सृष्टिप्रलयपरम्परया ऽनादित्वं शब्दानामनाद्यर्थसम्बद्धानां वेदानां नित्यतां चाश्रित्य—

"सर्वेषां चैवं नामानि कर्माणि च पृथक्पृथक् ॥

वेदशब्देभ्य एवादौ पृथगर्थाश्च निर्ममे"

इति वचनानुरोधादेककर्तृका तुल्यनामव्यवहारकवस्तूत्पत्तिरङ्गीक्रियते ॥

"अष्टाशीतिसहस्राणि सम्प्रदायप्रवर्त्तकाः"

इतिवचनानुरोधेन वा ऽनेककर्तृका तादृशसृष्टिरङ्गीक्रियते । तत्रापि प्रकृतेरुपादानत्वासम्भवाद् अनुपादाननिर्माणासम्भवात्सोपादानत्वसिद्धिरिति संक्षेपः ॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ सृष्टिप्रलयविचारः ।

ननु सर्वमिदं शरीरेन्द्रियातिरिक्तजीवात्मसद्भावे स्यात्तत्रैव मानं न पश्यामः । न चाहं जानामीति प्रत्यक्षं तत्र मानं, तस्याहं गौर इत्यादिवच्छरीरादिविषयकत्वेनाप्युपपत्तेरिति चेत्—

अत्र जीर्णाः—शरीरान्तर्गतवायोरूर्ध्वाधोगमनानुकूलप्रयत्नाश्रयतया सुखाद्याश्रयतया वा तत्सिद्धिः । तेषामयावच्छरीरभावित्वेन तद्धर्मत्वासम्भवात् । कार्यद्रव्यवृत्तिविशेषगुणानां पाकादिना विरोधिगुणान्तरोत्पत्त्या द्रव्यनाशेन वा नाश्यत्वमिति नियमः । उक्तयत्नस्य सुखादीनां च मृतावस्थायामुक्तनाशकत्रयाभावेन नाशानुपपत्तेर्न शरीरगुणत्वं सम्भवति । एवं ज्ञानेच्छादीनामप्ययावच्छरीरभावित्वेन न शारीरगुणत्वम् । किं चावयविविशेषगुणानामवयवगुणपूर्वकत्वनियमेन ज्ञानादीनां शरीरावयवगुणत्वाभावेन न तदुत्पत्तिसम्भवः । अतः सुखादिगुणितया शरीरादिभिन्नात्मसिद्धिः ।

न च तेषामिन्द्रियगुणत्वम् । इन्द्रियनाशेन संस्कारनाशे स्मरणानुपपत्तेः । नापि मनोगुणत्वं, तस्याणुतया तद्गुणप्रत्यक्षानुपपत्त्या ज्ञानादीनामप्रत्यक्षत्वप्रसङ्गात् । मनसो विभुत्वनये तु तद्गुणत्वे ज्ञानादीनां करणाभावात्प्रत्यक्षानुपपत्तिस्तुल्या । तस्मात्तदाश्रयतया ऽऽत्मसिद्धिः ।

किञ्च स्वर्गकामादिश्रुत्यापि देहातिरिक्तात्मसिद्धिः । तथाहि स्वर्गकामादिश्रुतयः कर्मजन्यफलभोक्तारं शरीरातिरिक्तं कर्त्तारमाक्षिपन्ति । "अविनाशी वा अरे ऽयमात्मा" इत्यादय उपनिषदोऽपि तमेवार्थं द्रढयन्ति । अतो ऽहंप्रत्ययवेद्यः शरीरातिरिक्त आत्मेति । न च तस्याहंप्रत्ययगम्यत्वमनुपपन्नं, ज्ञातृत्वज्ञेयत्वयोर्विरोधात्, एकस्यां क्रियायामेकस्य कर्तृत्वकर्मत्वानुपपत्तेरिति वाच्यम् । स्वात्मनि क्रियाविरोधस्य दूषकताबीजभावेनादूषकत्वात् न च परसमवेतक्रियाजन्यफलभागित्वस्य कर्मत्वतया कर्मसंज्ञायास्तद्विभक्तेश्चासाधुतापत्तिर्दूषकताबीजमिति वाच्यम् । तादृशकर्मत्वाभावेपि तद्विभक्तेः "आत्मा ज्ञातव्य, आत्मानं वेद, आत्मानमुपासीत" इत्यादिलौकिकवैदिकप्रयोगेणैव साधुत्वात् । यथा चलतिगच्छत्योरेकार्थत्वेपि सकर्मत्वाकर्मकत्वे एवं ज्ञातुर्ज्ञानजन्यप्राकट्यरूपफलवत्तया ज्ञानकर्मत्वे बाधकाभावात् । "स मानसीन आत्मा जनानाम्" इत्यादिश्रुतिवशाच्च मानसाहंप्रत्ययवेद्य आत्मा सिद्ध इत्याहुः ।

वेदान्तिनस्तु सुखेच्छादीनां मनोगुणत्वस्य श्रुतिसिद्धतया निर्गुणज्ञानस्वरूप एवात्मा, तस्य च निष्प्रकारकमेवोपनिषज्जन्यप्रत्यक्षं मोक्षसाधनमित्याहुः ॥

कः पुनर्मोक्षः। अत्र केचित् संस्काराजनकानुभवध्वंसो मुक्तिः।
केचित्तु दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मुक्तिः।
दुःखमयसंसारबीजमिथ्याज्ञानध्वंसो मुक्तिरित्यपरे ॥
शरीरेन्द्रियबुद्ध्यादितन्निदानधर्माधर्मध्वंस इत्यन्ये।
आत्यन्तिकदुःखप्रागभावो मोक्ष इति गुरवः॥
संस्काराजनकभोगविषयदुःखध्वंस इति केचित् ॥

समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसो मुक्तिरिति मणिकृत् ॥

प्रपञ्चसम्बन्धविलयो मुक्तिरिति वेदान्तिनः। प्रपञ्चसम्बन्धो बन्धः। तस्यात्यन्तिको विलयो मोक्षः। तथाहि। भोगायतनभोगसाधनभोगविषयाणां शरीरेन्द्रियाणां सम्बन्धादात्मा बद्ध इत्युच्यते। एतत्कारणधर्माधर्मपरिक्षयादेतेषामात्यन्तिको विलयः पूर्वनाशपरानुत्पादस्वरूपः। न चैवमपुरुषार्थत्वापत्तिः। सुखवद् दुःखानुत्पादस्यापि पुरुषार्थत्वात्। तत्सम्बन्धविलयपूर्वकनित्यानन्दरूपात्माभिव्यक्तेर्मुक्तित्वाङ्गीकाराद्वा। तस्य सुखस्य नित्यतया धर्मजन्यत्वाभावात्। आत्मनश्च सुखात्मकत्वे मुक्तावस्थायां तन्नित्यत्वे वा "आनन्दं ब्रह्मणो रूपं, न स पुनरावर्त्तत" इत्यादिश्रुतयो मानम्। यत्तु "अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत" इति मुक्तस्य सुखाभाववचनं, तत्प्रपञ्चसुखाभिप्रायम्।

ननु मनःशरीराद्यभावात्कथं तत्रानन्दानुभवः। न च तस्यानन्दस्य स्वप्रकाशत्वम्। संसारावस्थायां तादृशस्याननुभवात्। न च तदानीमभिभवान्न तादृगनुभव इति वाच्यम्। स्वप्रकाशस्याभिभवासम्भवादिति चेत्—

तस्यानन्दस्य "अत्रायं पुरुषः स्वयंज्योतिः" इति श्रुतिसिद्धस्वप्रकाशतयाऽऽत्मरूपानन्दानुभवस्य लोकसिद्धकारणान्तरानपेक्षत्वात्। तदुक्तम्—

निजं यच्चात्मचैतन्यमानन्दश्चेष्यते च यः।
यच्च नित्यविभुत्वादि तेनात्मा नैवमुच्यते ॥
इति। अतो नित्यसुखाभिव्यक्तिर्मुक्तिरित्याहुः ॥

तन्न—"विज्ञातारं केन विजानीयाद्, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इति च मोक्षकाले ज्ञानाभावप्रतिपादकश्रुतिविरुद्धत्वात्। आत्मनश्च न विज्ञानसुखादिरूपत्वम्। "आनन्दं ब्रह्मणो विद्वान्, स एको ब्रह्मण आनन्दः" इति श्रुत्या भेदप्रतीतेः। मम न किमपि सुखं, केवलं दुःखमेवेत्यनुभवात्। "ता एताः प्रजा अहरहर्ब्रह्मलोकं यन्ति, अहर-

इदागच्छन्ति" इति सुषुप्तिमुक्त्योः सादृश्यप्रतिपादकश्रुत्याऽऽनन्दात्मकत्वनिषेधाच्च । सुषुप्त्यवस्थायामानन्दानुभवाभावात् । अतो न नित्यसुखाभिव्यक्तिर्मुक्तिः । तस्मात्प्रपञ्चस्य सर्वथा विलयो मुक्तिः ।

स च दुःखाभावरूपत्वात् पुरुषार्थः । तेन सुखदुःखोपभोगाभावो मोक्ष इति फलितम् । तथा च श्रुतिः । "प्रियाप्रिये न स्पृशत" इति । न चैवमानन्दश्रुतिविरोधः । "मन आनन्दम् इतिश्रुतेर्मनस आनन्दधर्मत्वात्तदानीं तु "अमनस्कम्" इति श्रुत्या मनोऽभावेन "विज्ञातारमरेकेन विजानीयात्" इति श्रुत्या च तदानीमानन्दानुभवनिषेधात् । "अलं वा अरे इदं विज्ञानात्" इति तु शक्तिमात्रपरम् । किं चानन्दप्रियाभाववचनयोर्विरोधे प्रमाणान्तरोपपत्तिभ्यामानन्दवचसो दुःखाभावपरत्वं परिकल्प्य तत्परिहारः । उभयत्रापि सामान्योपादानात् । अत उक्तरीत्यैव विरोधपरिहार इत्यात्यन्तिकदुःखाभाव एव मोक्ष इति ।

न चैवं सुखस्यापि नानुपादेयत्वमिति पुमर्थत्वम् । मधुविषभोजनदुःखवत्सुखस्यापि बहुतरदुःखानुबद्धत्वेन हेयत्वात् ।

न चैवमपि वर्त्तमानदुःखानां स्वभावेन विरोधिगुणान्तरोत्पत्त्या वा नाशादागन्तूनां प्रतियोग्यभावादतीतानामतीतत्वादेव नाशासम्भवान्न मोक्षः साध्यः स्यादिति वाच्यम् । दुःखहेतुधर्माधर्मोच्छेदस्य पुंव्यापारसाध्यत्वात् । तथाहि । सञ्चितानां प्रारब्धानां चादृष्टानां भोगात्मज्ञाननैमित्तिकप्रायश्चित्तानुष्ठानेन नाशात्काम्यानुष्ठानजन्यानां तदननुष्ठानेनानुत्पादाद्विहितानुष्ठाननिषिद्धाकारणाभ्यां प्रत्यवायपरिहाराच्च सुखदुःखजनकधर्माधर्मनाशात्पूर्वशरीरनाशे मुक्तो भवति ।

अत एव ज्ञानकर्मणोः समुच्चयेन जनकता । ज्ञानेन सञ्चितानामुत्पन्नधर्माधर्माणां नाशः । नित्यकर्मभिश्च तदनुत्पत्तिः । अन्यथा नित्याकरणजन्यप्रत्यवायेन शरीरोत्पत्तिप्रसङ्गात् । तस्मादुभयोरपि शरीरोत्पत्त्यभावसम्पादकतया मोक्षजनकता । प्रारब्धकर्मणां तु न कर्मभिर्न ज्ञाने नाशः । किं तु भोगनेति ।

न च

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन"

इति ज्ञानस्यैव शरीरोत्पत्त्यभावसम्पादकतया मोक्षजनकत्वमस्तु, किं कर्मणेति वाच्यम् । ज्ञानवतोऽपि विहिताननुष्ठाननिषिद्धाचरणाभ्यां प्रत्यवायोत्पत्तेः । तेन ज्ञानकर्मणोः समुच्चयेन जनकत्वम् । तत्राप्युपनिषज्जन्यात्मज्ञानं दृष्टोपयोगित्वात् क्रत्वर्थम् ।

उपासनात्मकं तु दृष्टोपयोगाभावात् "सर्वान्कामानवाप्नोति, न स पुनरावर्त्तते" इत्यादिवाक्यशेषाच्चाभ्युदयफलकं निःश्रेयसफलकं चेति विवेकः। अतः सिद्धो ज्ञानकर्मसमुच्चय इति संक्षेपः॥ तदुक्तम्।

"सत्येन लभ्यस्तपसा ह्येष आत्मा
सम्यग् ज्ञानेन ब्रह्मचर्येण वा" इति॥
"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥

तमभ्यर्च्य, तं ज्ञात्वेत्यर्थः॥

तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते॥
उभाभ्यामिव पक्षाभ्यां यथा खे पक्षिणां गतिः।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम्"॥

इति ब्रह्मप्राप्तिर्मुक्तिरिति जीर्णाः॥

नव्यास्तु "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यते अयनाय" इति श्रुत्या "न कर्मणा न प्रजया" इति श्रुत्या च मोक्षे ज्ञानातिरिक्तसाधननिषेधात् तीर्थस्नानमहादानकाशिमरणादिकर्मणां ज्ञानद्वारैव मोक्षजनकत्वाच्च ज्ञानमेव साक्षान्मोक्षजनकम्। कर्म तु ज्ञानजनकान्तःकरणशुद्धिजनकम्।

न च तमेवेत्यात्मातिरिक्तविषयकज्ञानस्य मोक्षजनकत्वपरिसंख्येति वाच्यम्। ज्ञानस्य मोक्षजनकत्वेन नियतप्राप्त्यभावात्परिसंख्यानुपपत्तेः। वाक्यान्तरप्राप्तपरिसंख्यायां तत्तद्वाक्यानां नान्यः पन्थेति निषेधस्य चानुपपत्तिः।

एतेनोपनिषज्जन्यज्ञानातिरिक्तभाषाग्रन्थादिजन्यज्ञानपरिसंख्येति परास्तम्। अध्ययनविधिनैव तत्सिद्धेः।

न चैवमुपनिषदध्ययनजन्यतत्त्वज्ञानस्य त्रैवर्णिकेष्वेव सम्भवाच्छूद्रादीनां मुक्तिर्न स्यादिति वाच्यम्। तेषामपि "श्रावयेच्चतुरो वर्णान्" इति पुराणश्रवणविधिना तज्जन्यार्थज्ञानसत्त्वान्मुक्तिसिद्धेः। अतोऽयं ज्ञानस्य मोक्षसाधनत्वविधिः। नान्यः पन्थेति तदतिरिक्तकर्मणः साक्षात्साधनत्वनिषेधः। "न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयाद्" इतिवत्। एतन्निषेधवशादेव कर्मणां मोक्षसाधनत्वबोधकश्रुतयः परम्परासाधनत्वपराः।

अत एव "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति श्रुतेरविद्यारूपकर्मणो मृत्युतरणशब्दलक्षिताज्ञाननाशस्यात्मज्ञानद्वा-

रकत्वबोधकश्रुतिरपि सङ्गच्छते ।

न कर्मणेत्यादिश्रुतिरपि परम्परया मोक्षसाधने संन्याससादृश्यनिषेधनद्वारा संन्यासप्राशस्त्यबोधिका कर्मणां परम्परया साधनत्वं बोधयति न साक्षात् एवं "तमेव वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इति श्रुतिरपि कर्मणां ज्ञानार्थत्वमेव बोधयति न साक्षान्मोक्षार्थत्वमिति ।

न चैवं ज्ञानेन सञ्चितकर्मविनाशेपि शरीरजनकनित्याकरणजन्याधर्मविनाशायोगान्मोक्षो न स्यादिति वाच्यम् । तस्य सञ्चितविनाशकत्ववदधर्मानुत्पादकत्वस्याप्यङ्गीकारात् । उत्पन्ननाशाङ्गीकाराद्वा ।

न चैवं वेदान्ताध्ययनजन्यतत्त्वज्ञानोत्तरं मुक्तिः स्यादिति वाच्यम् । प्रारब्धस्य प्रतिबन्धकत्वात् ।

न चैवं सञ्चितानां प्रायश्चित्तेन प्रारब्धानां भोगेन नाशान्नित्यकर्मभिश्चानुत्पादात्तत्त्वज्ञानस्यानुपयोग इति वाच्यम् । सुखभोगयोग्यदेहजनकधर्मविनाशद्वारा तस्य मोक्षोपयोगित्वादिति जीर्णाः ॥

अन्ये तु तत्त्वज्ञानस्य सञ्चितनाशकत्ववत्प्रारब्धनाशकत्वमपि । तत्त्वज्ञानव्यक्तिविशेषस्यैव मोक्षजनकतया तदुत्तरमेव मुक्तिः । जीवन्मुक्तादिव्यवहारस्तु शरीररूपदुःखसत्त्वेन बाधाद् भाक्त इत्याहुः ॥

इत्यनुमाननिरूपणम् ॥

अथोपमानं निरूप्यते ॥

उपमानं पूर्वदृष्टेऽर्थे स्मर्यमाणे दृश्यमानार्थसादृश्यज्ञानम् । दृश्यमानगवयनिरूपितसादृश्यप्रकारकगोविशेष्यकप्रमा उपमितिः । तत्करणं गवयपिण्डदर्शनमित्यर्थः । एवं चारण्यकवाक्यार्थज्ञानवतोऽरण्ये गवयदर्शनं तत्करणं, तत्सादृश्यविशिष्टो गौरिति ज्ञानं प्रमा, वाक्यार्थस्मरणमवान्तरव्यापार इति ।

न चेदं सादृश्यप्रत्यक्षम् । अर्थान्तरयोगिभिर्धर्मैरर्थान्तरस्य तादृशयोगरूपसादृश्यस्य व्यासज्यवृत्तितया यावदाश्रयप्रत्यक्षाभावेन तदयोगात् । नानुमानम्—उपमिनोमीत्यनुव्यवसायेनानुमितिवैलक्षण्यप्रतीतेः । नापि शाब्दम्—पदज्ञानाद्यभावादिति । अत इदं मानान्तरम् । एवं च प्रत्यक्षसौर्यविधिसादृश्यस्याग्नेयविधावुपमित्योपस्थिताग्नेयविधिविहितेतिकर्त्तव्यताया अपेक्षितायाः सौर्याङ्गत्वबोधः फलमिति जीर्णाः ॥

नव्यास्तु नैतन्नियतम् । उपमानस्य शक्तिग्राहकत्वानापत्तेः । एतादृशसादृश्यज्ञानस्यातिदेशवाक्यार्थज्ञानाजन्यत्वाच्च । अतो गोसादृश्यविशिष्टपिण्डदर्शनं करणम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । अयं गवयपदवाच्यः, गवयो गवयपदवाच्य इति वा संज्ञासंज्ञिसम्बन्धज्ञानं प्रमेत्याहुः ॥

इत्युपमानम् ॥

अथार्थापत्तिः ॥

अर्थापत्तिः प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्योपपादकार्थान्तरकल्पनम् । यथा देवदत्तनिष्ठं दिने भोजनाभावः पीनत्वं च प्रत्यक्षदृष्टं स्वोपपादकं रात्रिभोजनं कल्पयति । तथा विश्वजिद्यागकरणकभावनाविषयकप्रवर्तना विधिप्रमितेष्टोद्देश्यकत्वं विना ऽनुपपद्यमाना स्वर्गाद्युद्देश्यकत्वं कल्पयति । अत्र दिनभोजनाभावविशिष्टपीनत्वज्ञानं न करणं, येनानुमानान्तर्भावः शङ्क्येत । किं तु भोजनाभावपीनत्वयोः समानाधिकरण्यरूपसम्बन्धानुपपत्तिज्ञानम् । रात्रिभोजनज्ञानं प्रमा । उपपादकत्वज्ञानमवान्तरव्यापारः । एवं जीवतो देवदत्तस्य गृहे ऽदर्शनेनादृष्टबहिर्भावकल्पना । तेन नानुमानान्तर्गतिरिति जीर्णाः ॥

वस्तुतस्तु नानुमिनोमि नोपमिनोमि न शाब्दयामि किं त्वर्थापयामीत्यनुभवादेव मानान्तरत्वं युक्तम् । इदमेव सहजशक्तावाधेयशक्तौ च मानम् । तथाहि—बीजत्वावच्छेदेनाङ्कुरजनकत्वे गृहीते मूषिकाघ्रातेषु तदर्शनेन कारणत्वसन्देहे मूषिकाघ्राणनाश्या व्रीहिनिष्ठा कारणशक्तिः कल्प्यते । एवं योगजन्यं स्वर्गजनकमपूर्वं कल्प्यत इति जीर्णाः ॥

इत्यर्थापत्तिः ॥

एवमनुपलब्धिरभावग्राहकं मानान्तरम् । न चाभावस्य केवलाधिकरणात्मतया प्रत्यक्षेण ग्रह इति वाच्यम् । तस्याधिकरणात्मकत्वे भूतले घटाभाव इत्याधाराधेयभावप्रतीत्यनुपपत्तेः । किं च घटो नास्ति नायं पट इत्यादिव्यवहारस्य सघटे प्रसङ्गान्न भूतलमात्रं विषयः । घटविविक्तस्य विषयत्वे ऽभावातिरिक्तस्य विवेकस्यासम्भवात्सिद्धमभावेन । तद्ग्राहकं च योग्यानुपलब्धिर्मानान्तरम् । तथाहि—अभावो नेन्द्रियग्राह्यः । सन्निकर्षाभावात् । न च विशेषणत्वादिः सन्निकर्षः । तस्य प्रत्येकवृत्तितयोभयनिष्ठत्वाभावेन सन्निकर्षत्वायोगात् ।

न च तत्राभावस्मरणम्। पूर्वं तदनुभवाभावात् । एवं च तस्यानुपलब्धिरूपप्रमाणान्तरवेद्यत्वम्। योग्यानुपलब्धिश्च दर्शनयोग्यस्यादर्शनं दर्शनाभाव इति यावत्। तेन घटाभावादिज्ञानं दर्शनाभावेन प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकेन यदि घटः स्यात्तदा दृश्येतेत्याकारकेण घटाभावो ज्ञायते। योग्यता च योग्यप्रतियोगिकत्वयोग्याधिकरणकत्वादिरूपा तत्तदभावग्रहे नानैव । अतः सिद्धमभावग्राहकमनुपलब्धिरूपं मानान्तरम्। अत्र प्रतियोगिप्रत्यक्षाभावः करणम्। अनुमितिरवान्तरव्यापारः। अभावज्ञानं फलम्। अर्थापत्तौ तु ज्ञानं करणमनुपपत्तिज्ञानमवान्तरव्यापारः। उपपादकज्ञानं फलमित्यनयोर्भेदमाहुः।

अतः षट् प्रमाणानि।

वस्तुतस्त्वर्थापत्त्यनुपलब्ध्योरन्योन्यभेदमनुमानाच्च भेदं नाकलयामः।

यत्तु सहस्रसङ्ख्यान्तर्गतशतसंख्याप्रमाकरणं सम्भवाख्यम्प्रमाणं तदनुमानान्तर्गतं, वटे वैश्रवणमिति चैतिह्यं न प्रमितिकरणं, तत्त्वेऽप्यागमान्तर्गतम्।

श्वो मे भ्राता ऽऽगन्तेति प्रतिभाख्यमनिश्चायकत्वान्न मानम्।

तेनर्षीणां प्रतिभया धर्माधर्मप्रमेति परास्तम्।

लोकप्रसिद्धिः प्रत्यक्षान्तर्गतैव।

अतः षडेव प्रमाणानि।

'राम षड् युक्तयो लोके याभिः सर्वोऽनुदृश्यते' इति रामायणाच्चेति संक्षेपः॥

इत्यभाववादः॥

अथ शब्दः॥

"शाब्दं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्"॥

इति भाष्यं–शब्दज्ञानजन्यमसन्निकृष्टार्थविषयकं यथार्थज्ञानं शाब्दप्रमा, तत्करणीभूतशब्दः प्रमाणमित्यर्थः। शब्दानुव्यवसायेऽतिव्याप्तिवारणाय द्वितीयम्। अनुमित्यादावतिव्याप्तिवारणायाद्यम्। एव वाक्यश्रवणानन्तरं पदोपस्थितपदार्थानां संसर्गविषयिणी प्रमितिः प्रत्यक्षादिविलक्षणा जायते, तत्करणं शब्दस्तज्ज्ञानं वा प्रमाणान्तरम्।

अन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीः शाब्दप्रमा । तत्करणं शब्दः प्रमाणमिति जानकीनाथः । प्रत्यक्षानुमितिस्मृतीनां वारणाय सत्यन्तम् । असम्भववारणाय अनुभवत्वाव्यापकेति जातिविशेषणम् । उपमितिवारणाय शून्यान्तम् । घटादिवारणाय धीपदम् ।

स्वकरणकशाब्दधीप्रकारप्रकारकप्रमाजन्यः शब्दः प्रमाणशब्द इति मणिकृत् ।

वाक्यं चैकार्थकपदसमूहः । एकार्थत्वं चानेकमुख्यविशेष्यराहित्यम् । न त्वेकाख्यातवत्त्वम् । तेनाख्यातभेदेऽपि यत्रैकाख्यातार्थेऽन्याख्यातार्थः प्रकारो यथा पश्य मृगो धावतीत्यादौ तत्रैकवाक्यत्वम् ।

नन्विदं पदोपस्थितपदार्थानां संसर्गावगाहिमानसप्रत्यक्षमस्त्विति चेत्––न तत्र मनः सन्निकर्षाभावात् । उपनीतभानेपि ज्ञातस्यैव विषयतयाऽज्ञातसम्बन्धस्योपनीतभानासम्भवाच्च । किं च शाब्दसामग्री चाक्षुषादिप्रतिबन्धिका मानसे तु चाक्षुषादिसामग्री प्रतिबन्धिकेति सर्वसम्मतम् । एवं च शाब्दत्वस्य मानसत्वव्याप्यताङ्गीकारे भिन्नविषयकचाक्षुषसामग्रीकाले शाब्दबोधो न स्यात् तत्र चाक्षुषसामग्रीमानसयोः प्रतिबध्यप्रतिबन्धकभावेष्वनन्तेषु शाब्दान्यत्वप्रवेशे गौरवं स्यात् ॥

वैशेषिकास्तु शब्दोऽनुमानान्तर्गतः । घटमानयेत्यादिपदानि तात्पर्यविषयभूतपदार्थनिरूपिततात्पर्यविषयसंसर्गप्रमापूर्वकाणि परस्परान्वयतात्पर्यकत्वे सति योग्यत्वात् पदान्तरवत् । आकाङ्क्षासत्त्योस्तु तात्पर्यज्ञानार्थमेवापेक्षा ।

यद्वा पदैरुपस्थितेषु घटादिपदार्थेषु—

कर्मत्वमाधेयतासंसर्गेण घटवत् तेन संसर्गेण घटे बाधाभावरूपयोग्यतावत्त्वात् ,

एते पदार्था मिथस्तात्पर्यविषयसंसर्गवन्तः, आकाङ्क्षादिमत्पदस्मारितत्वात् ।

इदं वाक्यं संसृष्टार्थज्ञापकम् आप्तवाक्यत्वात् ,

इत्याद्यनुमानमुद्रयैव शब्दस्यार्थप्रत्यायकत्वसम्भवेन पृथक् प्रामाण्यकल्पनाऽयुक्ता ।

न चैतादृशसंसर्गज्ञानात्कथं प्रवृत्तिः । इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयाविशेष्यकज्ञानस्य प्रवृत्तिहेतुत्वादुक्तस्य तथाविधत्वाभावादिति वाच्यम् । इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानस्यैव

प्रवृत्तिहेतुत्वात् । इष्टतावच्छेदकसंसर्गप्रकारकस्यापि वैशिष्ट्यावगाहिज्ञानत्वात् । अस्मिन् गृहे सुवर्णसर्पसम्बन्धोऽस्तीति ज्ञानादपि प्रवृत्तिनिवृत्त्यनुभवाच्चार्थपक्षकानुमाने दोषाभावाच्चेत्याहुः ॥

अत्र केचित् । पदपक्षकानुमानस्य संसर्गप्रकारकत्वनियमाद्रजतप्रकारकज्ञानार्थं शब्दप्रामाण्याङ्गीकार आवश्यकः । नहि रजतवद्भूतलमिति शब्दश्रवणोत्तरं संसर्गप्रकारकमेव ज्ञानं जायते इति नियमः । रजतादिप्रकारकानुभवस्यापि सत्त्वात् । अर्थपक्षकानुमाने च योग्यताया हेतुतया लिङ्गस्य निश्चितस्यैव निश्चायकतया योग्यतासंशये ऽनुमानानुपपत्त्या प्रवृत्त्याद्यनुपपत्तिः । शाब्दबोधे तु संशयसाधारणयोग्यताज्ञानस्य हेतुत्वाद् नानुपपत्तिरित्याहुः ।

वस्तुतो वक्तुः प्रतारकत्वादिशङ्कायां शाब्दबोधवारणाय योग्यतानिश्चयस्यैव शाब्दबोधे हेतुतेति नोभयोः पक्षयोर्विशेषः ।

पक्षधरास्तु घटमानय घटः कर्मत्वमानयनमित्यादिस्वरूपयोग्यतदयोग्ययोर्विशेषो न स्यात् । अनुमानस्योभयत्र सम्भवात् । अतो व्याप्त्यादिज्ञानसापेक्षत्वतदनपेक्षत्वकृतबोधविलम्बाविलम्बाभ्यां विभक्त्यादिसमभिव्याहृतशब्दस्य मानान्तरत्वम् । किं च एकपदार्थप्रकारकापरपदार्थविशेष्यकभानं शब्दादेव नानुमानात् । अयं पदार्थो ऽपरपदार्थवानित्यनुमानेपि विपरीतक्रियाकर्मभावमादायार्थान्तरत्वापत्तेः । तात्पर्यविषयसंसर्गवानित्यनुमाने तु संसर्गस्य प्रकारतापत्तिः । न च तादृशज्ञानस्य मानसत्वम् । शब्दातिरिक्तस्य मनःसहकारिणो ऽभावात् । किं चौदनं पचत्योदनः पच्यत इत्यत्र पाकौदनयोर्विशेष्यत्वनियमः शब्दप्रामाण्यं विनानुपपन्नः तस्माच्छब्दः प्रमाणमित्याहुः ॥

एवं शाब्दयामीत्यनुभवोपि सङ्गच्छते । न चानुमितिप्रमातः शाब्दप्रमाया भेदे यत्रैकस्मिन्विषयेऽनुमितिसामग्री शाब्दसामग्री च तत्रानुमितिवारणाय शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवमिति वाच्यम् । फलमुखत्वेनादोषत्वात् । किं च शाब्दप्रमाया अनुमितित्वे सिद्धिसत्त्वे शाब्दबोधो न स्यात् । शाब्दान्यानुमितित्वस्य सिद्धिप्रतिबध्यतावच्छेदकत्वकल्पने गौरवम् । किं [illegible]नुमितिशाब्दसामग्रीसत्त्वे सिद्ध्यभावदशायामनुमितिकारणीभूतस्य सिद्ध्यभावस्य सत्त्वेन तत्र शाब्दानुमित्युभयापत्तिस्तद्वारणाय शाब्दान्यानुमितौ शाब्दसामग्र्याः प्रतिबन्धकत्वं वाच्यं तत्र शाब्दान्यत्वनिवेशे गौरवमिति दिक् ।

तत्सिद्धं शब्दस्य विजातीयप्रमितिजनकतया प्रामाण्यम् ।

तत्र वाक्येनान्वयानुभवजनने आकाङ्क्षायोग्यतासत्तिज्ञानं सहकारि। घटः कर्मत्वमित्यादेर्निराकाङ्क्षतया स्वरूपायोग्याद् अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादेर्जनितान्वयबोधेन निराकाङ्क्षाद् वह्निना सिञ्चतीत्यादेरयोग्याद् गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादेरनासन्नाच्च शाब्दबोधानुदयात्।

आकाङ्क्षा च पदनिष्ठा तत्पदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वरूपा। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राजपदस्य पुत्रेण सह जनितान्वयबोधस्य न पुरुषसाकाङ्क्षत्वम्। घटः कर्मत्वमित्यादेरभेदान्वयबोधे साकाङ्क्षत्वेपि भेदान्वयबोधे न साकाङ्क्षत्वम्, लाक्षणिकगङ्गादिपदस्याप्यनुभावकत्वस्वीकारात्। तत्रापि साकाङ्क्षत्वम्। यदि च लाक्षणिकस्य नानुभावकत्वं तदा तीरोपस्थापकपदव्यतिरेक प्रयुक्तान्वयाननुभावकत्वरूपाकाङ्क्षात्राप्यङ्गीकार्या। एवं श्रुतपदेऽध्याहृतपदनिरूपिताकाङ्क्षापि बोध्या। यत्र सर्वाणि पदानि लाक्षणिकानि तादृशवाक्याद् न बोधः।

अन्ये तु यत्पदोपस्थाप्यस्य येन विना नान्वयबोधविषयत्वं तस्य तेनाकाङ्क्षा सा चार्थनिष्ठा तेन लाक्षणिकेऽध्याहारस्थले च नानुपपत्तिरित्याहुः।

वाक्यैकवाक्यतास्थले तु तद्व्यतिरेकप्रत्युक्तकार्याजनकत्वमाकाङ्क्षा। एवं चार्थवादविधिवाक्ययोरन्यतरव्यतिरेकप्रयुक्तप्रवृत्त्यजनकत्वेनाकाङ्क्षा। एवं प्रधानविध्यर्थप्रधानस्याङ्गविध्यर्थाङ्गं विना फलाजनकत्वरूपाकाङ्क्षा।

अन्ये तु पदव्यतिरेकप्रयुक्तो वक्तुस्तात्पर्यविषयसंसर्गावगमप्रागभाव आकाङ्क्षा। घटः कर्मत्वमानयनं कृतिरित्यादावयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादिजनितान्वयबोधे च संसर्गावगमाप्रसिद्ध्या तत्प्रागभावाभावान्निराकाङ्क्षत्वमित्याहुः।

न चैवं सर्वत्राकाङ्क्षाया अभावरूपतया स्वरूपसत्या एव जनकत्वादाकाङ्क्षाभ्रमेण शाब्दबोध इति व्यवहारोच्छेदापत्तिरिति वाच्यम्। अन्वयानुभवाभावे तत्पदव्यतिरेकप्रयुक्तत्वभ्रमसम्भवात्। घटः कर्मत्वमित्यादौ तत्पदव्यतिरेकाभावभ्रमेण शाब्दबोधसम्भवः। जनितान्वयबोधे स्वजनितबोधत्वभ्रम इति दिक्॥

योग्यता च अन्वयप्रयोजकधर्मवत्त्वम्। अस्ति च पयसा सिञ्चतीत्यत्र सेकान्वयप्रयोजकधर्मजलत्वस्य पयसि सत्त्वाद्योग्यता, न तु वह्निना सिञ्चतीत्यत्र।

के चित्तु बाधाभावो योग्यता, सा च तात्पर्यविषयीभूतपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावः । वर्त्तते चैतद् घटपदार्थसंसर्गे निष्ठत्वे कर्मत्वनिष्ठात्यन्ताभावप्रतियोगित्वाभावः । अपरपदार्थनिष्ठात्यन्ताभावश्च प्रतियोगिव्यधिकरणो बोध्यः । तेन घटवद्भूतलमित्यत्र घटसंयोगे भूतलनिष्ठाभावप्रतियोगित्वे ऽपि न क्षतिः ।

एकपदार्थतावच्छेदके तात्पर्यविषयापरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावो वा योग्यता । तेन समुद्रजलनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य सेककरणतात्वे सत्त्वेपि पयोन्तरस्य तात्पर्यविषयत्वान्न योग्यताहानिः, समुद्रजलाभिप्राये त्वयोग्यमेव । एवं शक्ततावच्छेदकभेदेनैकपदबोध्ययोः पचतीत्यादौ कृतिवर्त्तमानत्वयोर्योग्यता । पदार्थेपि स्थितौ क्वचित्संशयरूपस्य क्व चिन्निश्चयरूपस्य सम्भवात् । अत्र च वह्निना सिञ्चतीत्यादौ शाब्दबोधवारणाय योग्यता हेतुः । सा च न स्वरूपसती हेतुः, तद्भ्रमेण शाब्दबोधोदयात्, अतस्तज्ज्ञानं हेतुः । तच्च संशयनिश्चयसाधारणम् । न चात्यन्तान्योन्याभावगर्भयोग्यतयोर्नैकरूपेण हेतुत्वं सम्भवतीति वाच्यम् । अयोग्यताग्रहविरोधित्वेन हेतुत्वात् । होतव्यमग्निहोत्रं न होतव्यमिति, शब्दो नित्यो न वेति वाक्यायोग्यतासंशयादपि शाब्दबोध इष्ट एव । यद्वा तदभावशाब्दसामग्र्यास्तद्वत्ताशाब्दे प्रतिबन्धकत्वं कल्प्यते, अतस्तत्र पदार्थस्मृतिमात्रं न शाब्दबोध इति दिक् ॥

वस्तुतस्तु न योग्यताज्ञानस्य कारणता किं तु वह्निना सिञ्चेदित्यादौ बोधादर्शनेनायोग्यतानिश्चयः प्रतिबन्धकः । सा चानुमित्यादिसाधारण्येनैव क्लृप्तप्रतिबन्धकीभूतबाधज्ञानत्वादिनैव शाब्दबोधे ऽपि प्रतिबन्धकम् । किं च योग्यतायाः सर्वत्रैक्यासम्भवाद्विशिष्य हेतुत्वे तत्तद्वाक्यजन्यशाब्दबोधाप्रसिद्ध्या हेतुत्वकल्पनं न सम्भवति । अतो न योग्यताज्ञानं कारणं किं त्वगृहीताप्रामाण्यकतद्धर्मितावच्छेदकतद्धर्मावच्छिन्नतदभावनिश्चयत्वेन प्रतिबन्धकता, तद्धर्मावच्छिन्नांशे दोषविशेषाजन्यतल्लौकिकप्रत्यक्षनिश्चयान्याहार्येतरतद्धर्मितावच्छेदकतद्धर्मावच्छिन्नविशिष्टबुद्धित्वेन प्रतिबध्यतेति रीत्या अयोग्यतानिश्चयः प्रतिबन्धकस्तदभावः कारणमित्याहुः ॥

आलङ्कारिकास्तु न शाब्दबोधे योग्यताज्ञानं हेतुः नाप्ययोग्यतानिश्चयः प्रतिबन्धकस्तत्सत्त्वेपि चन्द्रो मुखमित्यादिरूपकादिबोधोदयात् 'एष वन्ध्यासुतो याति खपुष्पकृतशेखर' इत्यादिश्लोकार्थशाब्दबोधेन चमत्कारातिशयानुभवाच्च । न च तत्र पदार्थस्मरणमात्रं न शाब्दबोध

इति वाच्यम्। घटमानयेत्यादावपि तथा वक्तुं शक्यतया शाब्दबोधमात्रोच्छेदापत्तिः, किं तु बाधनिश्चयस्य शाब्दभिन्नमेव प्रतिबध्यम्। न चैवं प्रवृत्त्याद्यापत्तिः। प्राक्तनबाधेन अप्रामाण्यशङ्काया एव जायमानज्ञाने जननादप्रामाण्यशङ्काशून्यज्ञानस्य प्रवृत्तिं प्रति हेतुतया तदभावेन प्रवृत्त्यापादनासम्भवात्। तदुक्तं खण्डने 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इत्याहुः।

वस्तुतस्तु एवं सत्ययोग्यवाक्योच्छेदापत्तेः। चन्द्रो मुखमित्यादिवाक्येन पामराणां बोधानुत्पादादालङ्कारिकाणामेव बोधोदयाच्च वासनाविशेष एवोत्तेजको वाच्यः, एवं चोत्तेजकाभावविशिष्टबाधनिश्चयाभावस्य शाब्दबोधे हेतुत्वं युक्तमित्ययोग्यतानिश्चयस्य प्रतिबन्धकत्वं युक्तमुत्पश्यामः॥

आसत्तिस्तु अव्यवधानेनान्वप्रतियोग्युपस्थितिः। अव्यवधानं च प्रकृतान्वयाबोधाननुकूलक्षणेन। अननुकूलत्वं च प्रकृतान्वयबोधाननुकूलोपस्थित्यधिकरणत्वं, तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ नासत्तिः। अत एवान्तरालिकानुकूलपदार्थोपस्थितेर्न व्यवधायकत्वम्। श्लोकादौ त्वासत्तिभ्रमेण शाब्दबाध इति केचित्।

अन्ये तु अन्वयप्रतियोग्युपस्थापकपदाव्यवधानमासत्तिः श्लोकादौ तु योजनावाक्यादेव शाब्दबोध इत्याहुः॥

तात्पर्यं तु तत्प्रतीतीच्छया वक्त्रानुसंहितत्वम्। तत्र पदार्थतात्पर्यनिश्चयः संसर्गतात्पर्यनिश्चयश्च तादृशशाब्दबोधे हेतुः। तत्सन्देहे शाब्दबोधानुदयात्। तात्पर्यभ्रमे चाहार्यशाब्दबोधोदयात्। शुकवाक्ये वेदवाक्ये चेश्वरतात्पर्यग्रहेण शाब्दबोधोऽध्यापकतात्पर्यग्रहेण वा। न च प्रकरणादिकमेव तत्तच्छाब्दबोधे हेतुर्न तु तात्पर्यज्ञानमिति वाच्यम्। अननुगतप्रकरणादिज्ञानानां हेतुत्वे गौरवात्।

केचित्तु तात्पर्यज्ञानं लाक्षणिकनानार्थस्थलीयशाब्दे हेतुर्न तु शाब्दबोधमात्रे, गौरवात्। एवं च सैन्धवपदजन्यनानार्थोपस्थितिकालीनतत्पदजन्यलवणादिशाब्दबोधे तात्पर्यज्ञानं कारणम्। न चैवं गौरवं, सर्वशाब्दे तत्तच्छाब्दत्वावच्छिन्ने तत्तत्तात्पर्यज्ञानानामनन्तकार्यकारणभावापेक्षया लघुत्वादित्याहुः।

परे तु तात्पर्यज्ञानस्य न हेतुत्वं सम्भवति। तज्ज्ञानासम्भवात्। आवश्यकप्रकरणसमभिव्याहारादिना तज्ज्ञानसम्भवे तद्धेतोरिति न्यायेन तस्य वैयर्थ्यात्। अतो वेदवाक्यार्थबोधे लौकिकलाक्षणिकनानार्थस्थलीयशाब्दबोधे च न तात्पर्यज्ञानं हेतुरित्याहुः।

अत्रेदं बोध्यम् । पदार्थोपस्थितिमात्रं न हेतुः पचतीत्यादौ प्रत्यक्षदृष्टकलापादेरपि शाब्दबोधापत्तेः । नापि पदजन्यपदार्थोपस्थितिः, पदोपस्थितस्वाश्रयाकाशादेरपि शाब्दबोधापत्तेः । अतो वृत्त्या पदजन्यपदार्थोपस्थितिर्हेतुः ।

अन्ये तु न पदजन्यपदार्थोपस्थितिर्हेतुः, किं तु पदार्थोपस्थितिमात्रम् । आकाशादेः शाब्दबोधस्याकाङ्क्षायोग्यत्वाभावेनैव वारणात् । न च तथापि प्रत्यक्षगम्यकलापादेरपि पचतीत्यादौ शाब्दबोधापत्तिः । तात्पर्याभावात् । तत्सत्त्वे शाब्दबोधस्येष्टत्वात् । न चैवं घटः कर्मत्वमित्यादिपदजन्यपदार्थोपस्थितौ शाब्दबोधापत्तिः । तादृशसमभिव्याहारविशिष्टपदजन्यपदार्थोपस्थितेरेव हेतुत्वाङ्गीकारात् । अत एव वाचकपदानुपस्थितस्यापि क्रमस्य विधानमुपपद्यत इत्याहुः ।

नन्वस्तु शाब्दबोधे आकाङ्क्षादिज्ञानानां कारणता तथापि युगपत् तावत्पदज्ञानानां तावत्पदार्थस्मृतीनां चासम्भवात् कथं वाक्यार्थबोध इति चेन्न—क्रमोच्चारितपदजन्यपदार्थक्रमिकोपस्थित्युत्तरं सर्वेषां पदानां समूहालम्बनरूपमानसोपस्थितिः ततः समूहालम्बनरूपतत्पदार्थोपस्थितौ तदन्वयबोधोत्पत्तिः । न च पदसमूहालम्बनं विनार्थोपस्थितिरेव कल्प्यतामिति वाच्यम् । तस्याः पदजन्यत्वाभावेन क्लृप्तकार्यकारणभावबाधापत्तेः । अतः पदसमूहालम्बनमावश्यकम् ।

वस्तुतस्तु जन्यत्वापेक्षया अनन्यथासिद्धत्वस्याप्रवेशेन प्रयोज्यत्वस्य लघुतया पदजन्यपदार्थोपस्थितेर्न हेतुत्वं किन्तु पदप्रयोज्यपदार्थोपस्थितेरेव । तथा सति पदसमूहालम्बनं नावश्यकमिति युक्तम् । पदार्थानां च खले कपोतन्यायेनान्वयबोधः । तदुक्तम्—

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति ॥ इति ।

क्वचित्तु राजपुरप्रवेशन्यायेनान्वयबोधः । यत्र खण्डवाक्यार्थबोधोत्तरं महावाक्यार्थबोधः । यत्र वा दण्डी कुण्डली छत्री चैत्र इत्यादौ विशिष्टस्य वैशिष्ट्यबोधे तात्पर्यं, तत्र । तदुक्तम्—

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

इति संप्रदायः ।

खण्डवाक्यार्थबोधोत्तरं चरमपदस्मृतिस्तत्पदार्थस्मृतिस्तत्रार्थस्मृतिकाले खण्डवाक्यार्थबोधनाशाच्चरमपदस्मृतिरेव तावत्पदविषयिणी । चरमार्थस्मृतिः तावदर्थविषयिणी ततोऽन्वयबोध इति नव्याः ।

ननु पदजन्यपदार्थोपस्थितिः शाब्दबोधहेतुः; अन्यथा पचतीत्यादितः प्रत्यक्षदृष्टकलापादेरप्यन्वयबोधापत्तेरित्युक्तम् । एवं सति द्वारमित्यादौ शाब्दबोधो न स्यात् क्रियावाचकपदाभावादिति चेन्न—अनुषङ्गाध्याहारादिनान्वयबोधात् ।

एतेन विश्वजिता यजेतेत्यत्र स्वर्गकाम इति वा स्वर्गार्थमिति वा, सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्यादौ प्राकृताग्न्यन्वाधानादीतिकर्तव्यतावाचकस्याग्नेयवदितिपदस्य, प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति सर्वेभ्यो दर्शपूर्णमासावित्यादौ विधिपदस्य, सौर्यादिविकृतावातिदेशिकमन्त्रे ऽर्थलोपेन निवृत्ताग्निपदके सूर्यादिपदस्य, चाध्याहारादीति व्याख्यातम् ।

स्वस्थानस्थितस्य पुनरनुसन्धानमावृत्तिः ।

नेदीयस्थानान्तरस्थस्यानुसन्धानमनुषङ्गः ।

दवीयस्थानान्तरस्थस्यानुसन्धानमनुवृत्तिः ।

सा च सिंहावलोकितमण्डूकप्लुतिगङ्गास्रोतोवदिति त्रिधा ।

आवृत्त्यनुषङ्गानुवृत्त्यसाधारणलक्षणं श्रुतपदस्यानुसन्धानम् ।

अश्रुतपदस्यानुसन्धानमध्याहारः । स च सर्वापेक्षया जघन्य इति ।

गुरवस्तु तद्विषयकशाब्दे पदजन्यतदुपस्थितेर्न हेतुत्वं किं तु तत्तदन्वयबोधे पदजन्यतत्तदन्वयप्रतियोग्युपस्थितित्वेन हेतुत्वम् । उक्तस्थले त्वर्थाध्याहारेणैवान्वयबोध इत्याहुः ।

तेषामयमाशयः कार्यवाचकपदासमभिव्याहृतवाक्यानां मूकत्वाच्छाब्दबोधमात्रे कार्यवाचकपदज्ञानमर्थोपस्थितिश्च हेतुः । आकाङ्क्षाभावान्नोपस्थितस्याकाशादेर्बोधः । उपस्थितकलापादेराकाङ्क्षायां बोधस्त्विष्ट एव । एवं च तत्तच्छाब्दबोधे तत्तत्पदार्थोपस्थितित्वेन हेतुतेति लाघवम् । मतान्तरे तु तत्तत्पदज्ञानस्य तत्तत्पदजन्योपस्थितेश्च हेतुत्वकल्पने हेतुहेतुमद्भावकल्पनागौरवमिति ।

अत्राहुः असाधुपदेनार्थप्रत्ययाभावात्साधुपदज्ञानमपि शाब्दबोधे हेतुः । साधुत्वं चानादिवृत्तिप्रमाप्रयोज्यार्थप्रतिपादकत्वम् । तेन भाषाशब्देष्वनादिशक्त्यभावाच्छक्यार्थाभावेन लक्षणाया असम्भवान्न साधुत्वम् । लाक्षणिकगङ्गापदे च न क्षतिः । आधुनिकसङ्केतितडित्थादिपदेषु पाणिनिसङ्केतितवृद्धिटिघुभादिपदेषु च पिता नाम कुर्यादिति विधिना पुत्रत्वनामत्वोपाधिना व्याकृता वागुद्यत इति विधिना व्याकरणोपाधिना चानादिवृत्तिप्रमासम्भवात्साधुत्वम् । वृत्तिभ्रमेणार्थप्रत्यायकत्वमसाधुत्वम् । तद्यथा—भाषाशब्दानां प्रयोगभ्रमयोः करणापाट-

वशक्तिभ्रमाभ्यामुपपत्तेः शक्त्यभावादेव वृत्त्यन्तरस्य चासम्भवाच्च वृत्तिप्रमेति न साधुत्वम् ।

राणकस्तु[१] पौरुषेयसङ्केतविरहविशिष्टत्वं साधुत्वम् । व्याकरणसङ्केतितानामसाधुत्वमिष्टमेवेत्याह ।

तन्न—टिपदोत्तरं विभक्त्यनुत्पत्तिप्रसङ्गात् ।

टिघुभादिशब्दानामुभयबहिर्भूतत्वमिति केचित् ।

अदृष्टजनकतावच्छेदको व्याकरणाभिव्यङ्ग्यो जातिविशेष एव साधुत्वमित्यपि कश्चित् । तदुक्तम् ।

> अनपभ्रष्टतानादिर्यद्वाभ्युदययोग्यता ।
> व्याक्रिया व्यञ्जनीया सा जातिः कापिहि साधुता ॥
> यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः ।
> कथं नु तासां साधुत्वं नैव ताः साधवो मताः ।
> अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता ।
> हस्तचेष्टा यथा लोके तथा सङ्केतिता इमाः ॥
> ततश्चासां नाभ्युदयः प्रत्यवायोपि वा भवेत् ।
> लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलम् ॥ इति ।

वस्तुतः साधुत्वज्ञानं न कारणं नाप्यसाधुत्वज्ञानं प्रतिबन्धकं, किंतु तादृशसमभिव्याहारस्य तादृशाकाङ्क्षाया वा हेतुत्वात् , नोक्तातिप्रसङ्ग इति युक्तम् । पदज्ञानस्य च द्वैधी करणता । चरमपदस्य सर्वपदस्मृतिहेतुसंस्कारोद्बोधकतया लाक्षणिकस्य च शक्यपदस्मृतिहेतुसंस्कारोद्बोधकतया स्वार्थोपस्थितिद्वारा च अन्येषां तु स्वार्थोपस्थितिद्वारैवेति । तत्रोद्बोधकविधया यत्पदज्ञानजन्यत्वं पदार्थोपस्थिति द्वारा च यत्पदज्ञानजन्यत्वं शाब्दबोधनिष्ठं तदन्यतरसम्बन्धेन पदज्ञानविशिष्टघटोपस्थितित्वादिना घटादिशाब्दे हेतुत्वम् । लाक्षणिकपदस्यानुभावकत्वाभावात् तत्स्मृतशक्यपदस्यैव शाब्दबोधहेतुत्वादिति केचित् ।

पदं चानुपूर्वीविशिष्टतद्वर्णसमुदायः । आनुपूर्वी च शक्ततावच्छेदिका । सा च टप्रागभावविशिष्टघत्वरूपा घनाशविशिष्टटत्वरूपा वा । वर्णानां नित्यत्वे तु अव्यवहितोत्तरत्वसम्बन्धेन घज्ञानविशिष्टज्ञानविषयटत्वादिरूपा ।

सुप्तिङन्तं पदमिति वैयाकरणाः ।

शक्तं पदमिति तु युक्तम् । इदं तु बोध्यम । पदज्ञानस्य घटशाब्दे केन रूपेण हेतुत्वम्—न तावत्पदज्ञानत्वेन, व्यभिचारात् । नापि घट

पदज्ञानत्वेन, कलशपदादपि घटशाब्दे व्यभिचारात्। किं तु घटशक्त-पदज्ञानत्वेन, न तु वृत्तिमत्पदज्ञानत्वेन, वृत्तित्वस्य शक्तिलक्षणान्य-तरगर्भतया गौरवात्। तेन लाक्षणिकस्याननुभावकत्वम्। अत एव यत्र सर्वाणि लाक्षणिकानि तद्वाक्यं मूकमेव। गङ्गायां घोष इत्यादौ तु यत्किञ्चिच्छक्तपदमादायान्वयानुभव इति सम्प्रदायः।

वस्तुतो वृत्तिमत्पदज्ञानत्वेन घटपदज्ञानत्वेन घटस्मारकपदज्ञानत्वे-नान्ततः शाब्दत्वावच्छिन्ने पदज्ञानत्वेनैव वा हेतुत्वं, तत्पदजन्यपदा-र्थोपस्थितिरूपव्यापाराभावेन न व्यभिचारः। तेन लाक्षणिकस्याप्य-नुभावकत्वं युक्तमिति दिक्॥

ननु शक्तपदज्ञानत्वेन हेतुतेत्युक्तं, तत्र केयं शक्ति रिति चेत्।

अव्यवधानेन शब्दजन्यप्रतीत्यनुकूला वृत्तिः शक्तिः। अव्यवहित-त्वञ्चार्थान्तरप्रतीत्यद्वारकत्वम्। इदं च लक्षणावारणाय, तादृशचेष्टा वारणाय चावशिष्टम्।

सा चास्मात्पदादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छेति न्यायविदः।

पदार्थान्तरमिति मीमांसकाः। अस्या एव सङ्केत इति व्यवहारः। साक्षाच्छब्दजन्यार्थप्रमितिसहकारिज्ञानविषयत्वं वा।

वैयाकरणास्तु बोधकत्वमेव शक्तिः। एव लाक्षणिकाद्यर्थे ऽपि शक्ति रेव। अत एव सर्वे सर्वार्थवाचका इत्याहुः॥

शक्तिग्रहश्च व्याकरणादिना। तदुक्तम्

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

अनुमानोपमानशब्दा एव शक्तिग्राहकाः। व्यवहारप्रसिद्धसामा-नाधिकरण्यविवरणानामनुमानान्तर्भावः। व्याकरणवाक्यशेषकोशानां शाब्दान्तर्भाव इति नव्याः।

व्याकरणात् तृतीयादेः करणत्वकर्तृत्वादौ शक्तिग्रहः।

उपमानेन उपमितिरूपः शक्तिग्रहः।

कोशो वैजयन्त्यादिः।

आप्तवाक्यं घटो घटपदवाच्य इत्यादि। अत्र च आप्तवाक्यत्वेन न शक्तिग्रहहेतुता किं तु वाक्यत्वेन, लाघवात्। एव च—

यन्न दुःखेन सम्भिन्नं च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥

इत्यादिवाक्येन शक्तिग्रहः।

व्यवहारः प्रयोज्यवृद्धप्रयोजकवृद्धव्यवहारः। तथाहि—प्रयोजक-

वाक्यश्रवणानन्तरं प्रयोज्यवृद्धप्रवृत्तिमुपलभमानो बालः प्रयोज्यवृद्धस्य तज्ज्ञानं ज्ञाने च शब्दस्यैव हेतुतां तदन्यथानुपपत्त्या च शक्तिं परिकल्पयन्नावापोद्वापाभ्यां तत्तत्पदस्य तत्र तत्रार्थे शक्तिमवधारयति । तदनन्तरं व्याकरणोपमानकोशाप्तवाक्यविवरणवाक्यशेषप्रसिद्धपदसामानाधिकरण्यैर्यथायोगं शक्तिमवधारयतीति दिक् ॥

लक्षणा, गौणी च अपरा पदवृत्तिः । तत्र सादृश्यान्यशक्यसम्बन्धेनाशक्योपस्थितिर्लक्षणा । सादृश्यरूपशक्यसम्बन्धेनाशक्योपस्थितिर्गौणीति केचित् ।

तन्न—वृत्तेरुपस्थितिहेतुत्वेनोपस्थितिरूपत्वानुपपत्तेः । अतः स्वशक्यसम्बन्धवत्त्वं लक्षणा । तस्याश्च पदनिष्ठत्वं स्वाश्रयसम्बन्धिवाचकत्वसम्बन्धेन । यथा गङ्गायां घोष इत्यादौ गङ्गापदशक्यप्रवाहसम्बन्धो लक्षणा । तज्ज्ञानकार्यतावच्छेदकं च गङ्गासम्बन्धवत्तीरत्वप्रकारकतीरविशेष्यकशाब्दत्वम् । गङ्गासम्बन्धस्य सम्बन्धत्वेन भानं संयोगत्वादिना वा, गङ्गासम्बन्धितीरे घोषो गङ्गासंयुक्ततीरे घोष इत्युभयविधानुभवात् । एवं सिंहो देवदत्त इत्यत्रापि परम्परासम्बन्धेन सिंहसम्बन्धी देवदत्त इति बोधे लक्षणैव । अभिधेयाविनाभूतइत्यस्याप्यभिधेयसम्बन्धत्वेन यत्र प्रकारः, तत्र वृत्तिर्लक्षणेत्यर्थः । यदा तु सिंहनिष्ठक्रौर्यसजातीयक्रौर्यवत्त्वेन देवदत्तप्रतीतिस्तदा गौणीति वक्ष्यते । न चैवं तीरत्वमात्रप्रकारको बोधः कथं स्यादिति वाच्यम् । नदीतीरे समुद्रतीरे वेति सन्देहापत्त्या तादृशबोधस्यालीकत्वात् । न चैवं सर्वत्र गङ्गासम्बन्धिनीति बोधादजहल्लक्षणापत्तिः । शक्यलक्ष्योभयस्य क्रियान्वयित्वेऽजहल्लक्षणाङ्गीकारादिति सम्प्रदायः ।

वस्तुतो गङ्गापदात्तीरत्वमात्रप्रकारको बोधः । तीरत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन गङ्गापदजन्यशाब्दे समवायेन गङ्गासंयोगवत्त्वज्ञानस्य हेतुत्वकल्पनया न संशयाद्यापत्तिरिति युक्तम् ।

सा च लक्षणा द्वेधा, ऽजहत्स्वार्था, जहत्स्वार्था च । स्वशक्यार्थविशेष्यकान्वयबोधप्रयोजिका, अजहत्स्वार्था । यथा यष्टीः प्रवेशयेत्यादौ । अत्र शक्यार्थस्यापि क्रियान्वयात् । इयमेवोपादानलक्षणेत्यालङ्कारिकाः । स्वशक्यार्थाविशेष्यकान्वयबोधप्रयोजिका जहत्स्वार्था, गङ्गायां घोष इत्यादौ । लक्षितलक्षणाया अत्रैवान्तर्भावः । स्ववाच्यपदघटकवर्णद्वयघटितपदवाच्यत्वरूपसम्बन्धस्यैव द्विरेफादिपदे लक्षितलक्षणात्वात् । एतेन द्विरेफपदेन भ्रमरपदं लक्ष्यते । तेन शक्त्या भ्रमरबोध

इत्यपास्तम् । द्विरेफपदोत्तरविभक्त्यर्थस्यानन्वयापत्तेः ।

तत्त्वमसीत्यादौ जहदजहल्लक्षणा च तृतीयेति वेदान्तिनः ।

लक्ष्यतावच्छेदके च न लक्षणेति प्राञ्चः । गोत्वविशिष्टशाब्दे गोत्वविशिष्टशक्तिग्रहस्य हेतुत्ववत्, तद्विशिष्टशाब्दे तद्विशिष्टवृत्तिज्ञानस्य हेतुत्वात्तत्रापि लक्षणा युक्तेति नव्याः ।

लक्षणाबीजं शक्यार्थान्वयानुपपत्तिः न तु तात्पर्यानुपपत्तिः । वेदे तदसम्भवात् । यष्टीः प्रवेशयेत्यादौ तु प्रवेशनपदस्य भोजनप्रयोजनकप्रवेशनपरत्वग्रहादन्वयानुपपत्तिरेव ।

वस्तुतो मुख्यार्थानुपपत्तिज्ञानं मुख्यार्थबोधे प्रतिबन्धकं न लक्ष्यार्थबोधकारणं, लाक्षणिकस्थले गङ्गापदेन तीरपदस्मृतिस्तेन तीरस्मृतिरिति प्राञ्चः । तन्न गङ्गापदात्तीरानुपस्थितौ तत्र विभक्त्यर्थान्वयो न स्यात् । अतस्तीरोपस्थापकत्वेपि नानुभावकत्वं, तीरान्वयबोधे तीरान्वयप्रतियोगिशक्तपदज्ञानत्वेन हेतुताङ्गीकरणात् । शक्तपदान्तरादेव तीरान्वयानुभवस्य युक्तत्वात् । सर्वलाक्षणिकस्थले तु न बोध इति दिक् ॥

अथ केयं गौणी नाम । सादृश्यरूपशक्यसम्बन्धो गौणी, तेन लक्षणान्तर्गतिरिति नैयायिकाः ।

केचित्तु लक्ष्यमाणगुणयोगनिमित्तवृत्तित्वं गौणत्वम् । सिंहो देवदत्त इत्यत्र सिंहपदलक्षितसिंहगुणक्रौर्यादिसम्बन्धनिमित्ता अपरात्र वृत्तिरित्याहुः ।

तन्न-सिंहनिष्ठक्रौर्यादीनां देवदत्ते असम्भवात् ।

यदपि प्रसिद्धार्थत्यागेनाप्रसिद्धगुणवाचित्वं तत्त्वम् । सिंहपदेन प्रसिद्धार्थसिंहत्वत्यागेन देवदत्तनिष्ठक्रौर्यादि शक्त्योच्यते । समानाधिकरण्यं च मत्वर्थलक्षणयोपपद्यतइति ।

तदपि न—प्रसिद्धार्थत्यागस्य तात्पर्यग्रहाधीनतया वेदे तदसम्भवात् ।

एतेन समुदायवाचिन एकदेशे वृत्तिर्गौणी सिंहशब्दो न जातिमात्रवाचकः किं तु जातिव्यक्त्याकृतिक्रौर्यादिगुणसमुदायवाचकः । अन्यथा शक्तसिंहादिशब्दे देवदत्तपदसामानाधिकरण्यानुपपत्तेः । एवं च समुदायवृत्तिन एकदेशार्थलक्षणया देवदत्तपदसामानाधिकरण्यमित्यपास्तम् ।

तात्पर्यग्रहं विना तज्ज्ञानस्यासम्भवात् ।

आरोपितार्थवृत्तित्वं गौणत्वं, सिंहो देवदत्त इति प्रयोक्ता सिंहत्वादि देवदत्ते आरोप्य वाक्यं प्रयुङ्क्ते, बोद्धा च तथैव प्रतिपद्यते । आरोपश्चा-

हार्यो बोध्यः । एवं चालङ्कारिकाणां चन्द्रो मुखमित्यादावारोपेण गौण-बोधः । परं त्वयमारोप आलङ्कारिकैर्वासनाविशेषजन्यत्वोत्प्रेक्षित आहार्य इत्युच्यते । अत एव शुक्तिरजते न गौणत्वं, तदारोपस्य कारणदोषजन्यत्वेन आहार्यत्वाभावादित्यपरे ।

तन्न—आरोपकपुरुषाभावेन वेदे तदसम्भवात् । किं च खपुष्पं भवत्सिद्धान्त इत्यादावननुभूतपूर्वतयारोपासम्भवाद् गौणत्वानुपपत्तिः

अथ तत्र विशकलितप्रसिद्धभवदाकाशाधिकरणत्वरूपसंसर्गस्यारोपेणाकाशाधिकरणकवृक्षादौ वर्त्तमानं पुष्पं खपुष्पपदार्थमङ्गीकृत्य तत्तादात्म्यारोपेण सिद्धान्ते गौणतेत्युच्यते । तदा आरोपितसंसर्गरूपार्थवृत्तितया खपुष्पे खपुष्पशब्दस्य गौणत्वापत्तिः । अतो गौणत्वनिरुक्तिरशक्येति चेत्,

न स्वशक्यसम्बन्धिगुणसजातीयगुणवृत्तित्वं गौणत्वं, शक्यसम्बन्धश्च एकार्थवृत्तित्वसमवेतत्वादिः । एवं सिंहो माणवक इत्यादिवाक्यजन्ये सिंहत्वैकार्थसमवेतक्रौर्यादिसजातीयगुणवत्प्रकारके गुणप्रकारके वा माणवकादिविशेष्यके शाब्दे सिंहपदजन्यगुणवदुपस्थितेर्गुणोपस्थितेर्वा हेतुत्वम् । तत्र च सिंहपदेनैकसम्बन्धिज्ञानादपरसम्बन्धिस्मरणमिति रीत्या सिंहगुणतत्सजातीयगुणानां लक्षणयोपस्थितिः । एवं 'योषा वाव गौतमाग्निः' इत्यादावग्निशब्दो योषायां गौणः, एवं खपुष्पं सिद्धान्त इत्यादौ खपुष्पसमासार्थस्यालीकत्वस्य सिद्धान्ते सम्बन्धाद् गौणता खपुष्पं नास्तीत्यत्र तु नास्तिपदमनुवादः ।

अतः स्वशक्यसम्बन्धिगुणसजातीयगुणवदुपस्थितिहेतुवृत्तिगौणीति सिद्धम् । एवंविधगौणत्वाङ्गीकारे च शक्यार्थत्यागाभावेन न वेदाप्रामाण्यापत्तिलेशोऽपि । अत एव यजमानः प्रस्तर इत्यादौ यजमानप्रस्तरयोर्यागकारणत्वरूपगुणयोगेन यजमानपदं प्रस्तरे गौणमतो भिन्ना लक्षणातो गौणी । उपपादयिष्यते च तन्निमित्तानि तत्सिद्ध्यादीनीति दिक् ॥

तच्च पदं चतुर्विधम् । रूढं, यौगिकं, योगरूढं, यौगिकरूढं, च । समुदायशक्त्याऽर्थप्रत्यायकत्वं रूढत्वम् । अवयवशक्त्यार्थप्रत्यायकत्वं यौगिकत्वम् । समुदायशक्त्या अवयवशक्त्या चैकार्थप्रत्यायकत्वं योगरूढत्वम् । तथैव भिन्नार्थप्रत्यायकत्वं यौगिकरूढत्वम् । यथा घटः, चित्रगुः, पङ्कजं, मण्डप, इत्यादिशब्देषु । पङ्कजपदात् पङ्कजनिकर्तृत्वपद्मत्वोभयप्रकारकोपस्थितेरानुभविकत्वात् । अन्यथा पङ्कजपदात् भेकादिबोधोऽपि स्यात् । अतो योगरूढिरावश्यकी ।

अत्र केचित्-पङ्कजादिपदानां यौगिकत्वमेव पङ्कजपदादवयवशक्त्या पद्मविशेष्यकपङ्कजनिकर्तृत्वमात्रप्रकारकबोधेन पद्मत्वप्रकारकबोधाभावात्। न चैवं पङ्कजपदात् कुमुदभेकादिविशेष्यकपङ्कजनिकर्तृत्वप्रकारकबोधापत्तिरिति वाच्यम्। पूर्वतरप्रयोगत्वप्रकारज्ञानस्य तत्पदजन्यशाब्दबोधे हेतुत्वाङ्गीकारात्। यद्वा पङ्कजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन पङ्कजपदावयवशक्तिग्रहजन्यशाब्दबोधं प्रति-समवायसम्बन्धेन पद्मत्वस्य, पद्ममात्रवृत्तिविषयताया वा पद्ममात्रवृत्तिविषयतासम्बन्धेन ज्ञानस्यैव वा हेतुताङ्गीकारान्नाक्तोतिप्रसङ्गो न वा भूतभाविपद्मबाधानुपपत्तिरित्याहुः॥

क्वचित् कुमुदादौ प्रयोगस्तु लाक्षणिकः। यद्यपि योगरूढ्यङ्गीकारेऽपि इयं लक्षणा तुल्या तथापि शक्यतावच्छेदकाननुप्रविष्टधर्मेण लक्षणापेक्षया तदनुप्रविष्टधर्मेण लक्षणा लघीयसी। लाघवं च तेन रूपेणान्वयमात्रकल्पनं न तु स्मरणमपीति।

एवं यौगिकरूढं मण्डपादिपदम् योगेन रूढ्या च भिन्नार्थप्रत्यायकत्वात् योगापेक्षया रुढः प्राबल्यमप्येतद्विषयमेव। अत एव रथकारादिवाक्ये सौधन्वनापरपर्यायऋभुरूपजात्यन्तरग्रहणमेव सिद्धान्तयिष्यतइति दिक्॥

उक्तरूपपदज्ञानकरणको वाक्यार्थो द्विविधः। भेदरूपः, संसर्गरूपश्च। राज्ञः पुरुष इत्यादावराजसम्बन्धिभिन्नः पुरुष इति बोधादिति केचित्।

सर्वत्र संबन्ध एव वाक्यार्थं, उक्तरूपापोहस्य प्राचुर्येण भानाभावात्। अपोहस्याप्रसिद्धेश्च। अतः संसर्गः एव वाक्यार्थः। स च घटमानयेत्यादौ घटकर्मकत्वादिरूपविशेषणविशिष्टं, विशेष्यमेव वाक्यार्थ इत्याचार्याः।

तस्य च विशिष्टवैशिष्ट्यरूपवाक्यार्थस्य भानं चतुर्विधम्॥

"भावनैव हि वाक्यार्थः स्वकारकविशेषिता।
विधिस्त्वं श्रौतमार्थं वा भावनाकारकाश्रयम्"॥

इति वार्त्तिकात्। विशिष्टस्य वैशिष्ट्यरूपमेकं, विशेष्ये विशेषणं तत्र च विशेषणान्तरमित्यपरं, यथा नीलदण्डवान् पुरुष इति। एकविशिष्टे अपरवैशिष्ट्यमिति तृतीयम्। दण्डी देवदत्तः कुण्डलीति, एकत्र द्वयमिति चतुर्थम्। यथा दण्डी कुण्डली देवदत्त इति।

चतुर्विधेऽपि वाक्यार्थे वाक्यस्य शक्तिरिति वैयाकरणाः।

कार्यान्विताभिधानाङ्गीकारेण कार्यान्वयरूपेण वाक्यार्थे शक्तिरिति गुरवः ।

इतरान्विताभिधानाङ्गीकारेणान्वयरूपे वाक्यार्थे शक्तिरिति वेदान्तिनः ।

वैयाकरणानां वाक्यार्थो विशेष्य इतरयोस्तु विशेषणभूत इति भेदः ।

संसर्गमर्यादया वाक्यार्थभानमिति गौतमीयाः ।

वाक्यार्थे लक्षणेति सिद्धान्तः ।

तत्र वैयाकरणास्तावत्—भवति भूयात् बभूव रामः रामानित्यादौ श्रूयमाणतिकारविसर्गादीनां वाचकता न तु भूधातुलकारसुबाद्युपस्थापनद्वाराऽर्थप्रत्यायकत्वम् । आदेशिनां वाचकत्वकल्पने आदेशानां तदुपस्थापकत्वकल्पने गौरवात् । व्याकरणभेदेनादेशिनामननुगमाच्च । अन्यथा वृषभो वृष इत्यादावप्यन्यतरेणान्यतरस्मरणेनैकत्रैव शक्त्यापत्तेः । अतः श्रूमाणानुपूर्वीविशिष्टा वर्णा वाचका न तु धात्वाद्युपस्थापका इति वर्णस्फोटः ।

एवं हरिणा हरये रामात् हरेरित्यादौ पदादेशविभागाभावात्कस्यचिदंशस्य द्रव्यवाचकत्वं कस्य चित्करणत्वादिवाचकत्वमिति नियन्तुमशक्यत्वात् सम्पूर्णस्यैव करणत्वादिविशिष्टहरिवाचितेति पदस्फोटः ।

एवं कृष्णेहि रक्षैनमित्यादौ वाक्येऽशविभागाभावादेकारघटितानुपूर्वीकस्यागमनवाचकस्यात्र सत्त्वे मानाभावाद्वाक्यस्यैव विशिष्टार्थे शक्तिरिति वाक्यस्फोटः ।

स द्विविधः सखण्डवाक्यस्फोटो,ऽखण्डवाक्यस्फोटश्च । आद्यो द्विधा । पदरूपखण्डवाक्यस्फोटो, वर्णरूपखण्डवाक्यस्फोटश्च । तथाहि—विष्णोवेत्यादिवाक्येषु आकाङ्क्षादिसहकृततत्तत्पदस्मारितपदार्थानां संसर्गरूपवाक्यार्थावगमेपि तस्य शाब्दत्वसिद्धये वाक्यस्य शक्तिः कल्प्यते । सैव वाक्यस्फोटः । सा चाज्ञातैव स्वरूपेण हेतुः अन्वितशक्तिवादिमते अन्वयांशशक्तिवत् । हरिद्रायां नद्यां घोष इति वाक्यइवान्वयाव्यवहितपूर्वक्षणे तदवगमो वा कल्प्यते । यद्वा हरेऽवेत्यादौ पदविभागानिर्णयाद्वर्णत्रयात्मकवाक्यस्य सम्बोध्यहरिकर्तृकरक्षणे शक्तिरूपः स्फोटः । तदा वर्णरूपखण्डवाक्यस्फोटः । अस्याश्च व्यवहारकाले ग्रहः । न चैवं वाक्यस्य पदवत्स्मारकत्वापत्त्याऽननुभावकत्वापत्तिः । अनुभवत्वस्य प्रत्यक्षमात्रवृत्तितयेष्टत्वात् । यथार्थज्ञानजनकत्वस्यैव वाक्यप्रमाणत्वात् । आकाङ्क्षादिसह-

कृतपदार्थस्मरणजन्यार्थज्ञानजनकत्वस्यैवानधिगतार्थगमकतया प्रामाण्याविघातः । यद्वा वाक्ये बोधकत्वातिरिक्तः सम्बन्धो न शक्तिः, मानाभावात् । हस्तिपकादौ तु तस्य मानान्तरगम्यत्वाद्युक्तं तेन तत्स्मरणम् । अतो न स्मारकत्वापत्तिलेशोपि । एवं चाकाङ्क्षादिज्ञानस्य हेतुत्वाभावात्तात्पर्यज्ञानस्यैव हेतुतया कार्यकारणभावकल्पनालाघवम् ।

यद्वा घटमानयेत्यादिवाक्येषु ध्वनिधर्मैस्तारत्वमन्दत्वादिभिरिव घटत्वादिध्वनिधर्मैरेव एकशब्दो वर्णरूपोऽभिव्यज्यत । स एव वाक्यस्फोटः ।

एवं पदस्फोटेपि द्वैविध्यमुन्नेयम् । एवं च एकं पदमेकं वाक्यं महत्पदं महद्वाक्यं शब्दात् प्रत्येमीत्याद्यनुभवोपपत्तिः । वर्णानामनेकत्वेन महत्त्वाभावेन च तदनुपपत्तेरित्याहुः ॥

परे तु यथा बलवता प्रेरित इषुरेकेनैव वेगाख्यव्यापारेण वर्मच्छेदमुरोभेदं प्राणहरणं च शत्रोः करोत्येवं शब्द एकेनाभिधाव्यापारेण पदार्थस्मृतिं वाक्यार्थानुभवं च करोतीति यत्परः शब्दः स शब्दार्थ इति वाक्यार्थे शक्तिमाहुः ।

तदयुक्तम् पूर्वो धावतीत्यत्र परस्य, पुत्रस्ते जात इत्यादिषु हर्षादीनां, गच्छसि चेदित्यादौ मा गा इति निषेधस्य, च वाक्यार्थतापत्तेः । अत एव तादृशार्थप्रत्ययाय व्यञ्जनैवाङ्गीकृता । तच्च व्यञ्जनानिरूपणे स्पष्टमिति दिक् ।

केचित्तु वाक्यार्थे तात्पर्याख्यं वाक्यस्य वृत्त्यन्तरमाहुः ॥

प्राभाकारास्तु कार्यान्विते पदानां शक्तिः । तथाहि पदेषु स्मारिका, अनुभाविका चेति शक्तिद्वयं तत्र स्मारिका जातौ । अनुभाविका कार्यान्विते । एवं च घटादिपदानि घटत्वादिजातिस्मरणद्वारा घटादेः कार्यान्वयानुभवजनकानि । तथाहि । सर्वत्र व्यवहारेणैव शक्तिग्रहः, प्रयोज्यवृद्धस्य प्रयोजकवाक्यश्रवणानन्तरं गोकर्मकानयनचेष्टया तादृशकृतीच्छानुमानद्वारा स्वप्रवृत्तौ कार्यताज्ञानस्य हेतुत्वदर्शनात्कार्यताज्ञानमनुमाय, पदानां कार्यताज्ञानहेतुत्वमवधार्य, तस्यासति वृत्त्यन्तरे तदर्थशक्तिं विनानुपपन्नतया, कार्यान्वये अनुभाविकां शक्तिमवधारयति । कार्यं चापूर्वमेवेति यत्र कार्यवाचकपदाभावस्तत्र न वाक्यार्थबोधः, किन्तु पदार्थस्मरणमात्रम् । लिङादियुक्तलौकिकवाक्यस्य च लक्षणयाऽऽनयनादिरूपकार्यान्वितबोधकत्वमित्याहुः ।

वेदान्तिनस्तु इतरान्वित एव शक्तिग्रहो न तु कार्यान्विते । तथाहि

प्रयोजकवाक्यस्य आनयनकर्मत्वविशिष्टगोरूपेऽर्थे, शक्तिमवधार्यावापोद्वापाभ्यां, गवादिपदस्य गोत्वादौ शक्तिमवधारयन्नाद्यव्युत्पत्तिगृहीतान्वयांशे शक्तिमत्यजन्नितरान्विते एव शक्तिमवधारयति । एवं चान्वयेऽपि शक्तिरित्याहुः ।

नैयायिकास्तु समभिव्याहारेण वाक्यार्थबोध इति घटानयनविशिष्टसंसर्गज्ञाने तादृशानुपूर्वीज्ञानस्य हेतुतामात्रकल्पने लाघवात् । शाब्दत्वं च न शब्दवृत्तिविषयत्वं किं तु शब्दजन्यप्रतीतिविषयत्वं तेन वृत्त्यविषयस्याप्यन्वयस्य शाब्दत्वोपपत्तिरित्याहुः ।

सिद्धान्तस्तु वाक्यस्य वाक्यार्थे लक्षणा । न च शक्याभावात् कथं लक्षणेति वाच्यम् । बोध्यसम्बन्धस्यैव लक्षणात्वात् । घटमानयेत्यादिवाक्ये घटानयनसामान्यबोधेऽपि तद्विशेषबोधस्य लक्षणां विनानुपपत्तेः । नहि घटानयनसामान्यं वाक्यार्थः ज्ञानेच्छाप्रवृत्तीनां समानप्रकारकत्वसमानविशेष्यकत्वेन हेतुहेतुमद्भावाद्विशेषविषयकेच्छाप्रवृत्त्यनुपपत्तेः । अतस्तद्विशेषरूपवाक्यार्थस्य लाक्षणिकत्वं युक्तमिति । स्फुटीकरिष्यते चैतत्तद्भूताधिकरणे ।

अवलोक्य जरन्निबन्धजातमणिमन्यानि तदीयटिप्पणानि ।
अनवाप्य मुदं ततो मुदर्थे लिखितोऽयं निजकल्पितो विशेषः ॥१॥

अथ प्रवर्तकज्ञानं विचार्यते ।

ननु किमत्र विचार्यते, इष्टसाधनत्वकृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वज्ञानानां प्रवृत्तिहेतुत्वस्य क्लृप्तत्वादिति चेत्—

अत्र गुरवः स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्यैव चिकीर्षाद्वारा प्रवृत्तिहेतुत्वं, नेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वज्ञानयोरपि । अन्यथा हेतुहेतुमद्भावत्रयकल्पनागौरवात् ।

तथाहि कार्यताज्ञानं द्विविधं, मयेदं कर्तुं शक्यतइत्येवं रूपमेकं, ममेदमवश्यं कार्यमित्येवरूपं द्वितीयम् । तत्राद्यं पदार्थनिष्ठयोग्यतागम्यमिति न प्रवृत्तिं प्रति हेतुः । द्वितीयं तु स्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वज्ञानजन्यमिति चिकीर्षाद्वारा प्रवृत्तिं प्रति हेतुः । इदमेव स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वं, स्वं नियोज्यः, तद्विशेषणं काम्ये फलकामना, नित्ये शुचितत्कालजीवित्वादीति स्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वज्ञानजन्यकार्यतज्ञानस्य चिकीर्षाद्वारा प्रवर्त्तकत्वं सिद्धं भवति । अत एवेष्टसाधनत्वेनाज्ञाते मध्वन्नभोजनेऽतिष्टसाधनत्वेन

ज्ञाते विषभोजने बलवदनिष्टानुबन्धित्वेन ज्ञाते मधुविषसम्पृक्तान्नभोजने न प्रवृत्त्यापत्तिः । न च तत्र मध्वन्नभोजनजन्यं सुखं भवत्वितीच्छया तदापत्तिः । विषासम्पृक्तमध्वन्नभोजनसुखत्वेनैवेच्छागोचरीभावात् । नापि जीवकर्तृकत्वलिङ्गककार्यताज्ञानेन विषभक्षणे प्रवृत्त्यापत्तिः । न वा काम्ये शैचादिलिङ्गककार्यताज्ञानात्प्रवृत्त्यापत्तिः । एतेन भावियौवराज्ये तृप्तस्य भोजने च प्रवृत्त्यापत्तिर्निरस्ता ।

के चित्तु इदानीन्तनमत्कृतिसाध्यताज्ञानं हेतुस्तच्चेदानीन्तनमदिष्टसाधनत्वज्ञानाधीनमिति तदभावान्न प्रवृत्तिरित्याहुः ॥

तन्न—तदनुकूलकृत्यभावे ऽपि यदि मया क्रियते तदेदं भविष्यतीत्येतादृशकृतिसाध्यत्वज्ञानस्य तदानीमपि सत्त्वात् ।

एवं चेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वशुचितत्कालजीवित्वज्ञानजन्यानां कार्यताज्ञानानां कार्यताज्ञानत्वेनानुगतानां प्रवृत्तौ हेतुत्वमिति लाघवम् । इष्टसाधनत्वज्ञानादीनां प्रवृत्तिं प्रति हेतुत्वे तु हेतुहेतुमद्भावत्रयकल्पनागौरवम् । न चेष्टसाधनत्वादिज्ञानानां कार्यताज्ञानहेतुत्वकल्पने तद्धेतोरेवास्त्विति न्यायात् प्रवृत्तिं प्रति तेषामेव कारणत्वं युक्तम् । शाब्दबोधे तात्पर्यज्ञानस्येव प्रवृत्तौ कार्यताज्ञानस्य लाघवेन हेतुत्वात्, तद्धेतुप्रकरणादीनां शाब्द बोधहेतुत्वाभाववत् कार्यताज्ञानजनकेष्टसाधनत्वज्ञानादीनामपि तद्धेतुत्वकल्पनायोगात् । तस्मात्कार्यताज्ञानमेव प्रवर्तकं कार्यत्वमेव विध्यर्थः ॥

अथ कार्यत्वं विध्यर्थमङ्गीकृत्य तन्मते वाक्यार्थबोधप्रकारः । लोके तृप्तिकामः पचेदित्यादौ प्रत्ययार्थकार्यत्वस्य प्रकृत्यर्थपाके ऽन्वयवत्स्वर्गकामो यजेत शुचिः सन्ध्यामुपासीतेत्यादिवैदिकविधौ प्रत्ययार्थकार्यत्वस्य न प्रकृत्यर्थयागाद्यन्वयः सम्भवति । प्रकृत्यर्थाप्रतीतयोग्यताकत्वात् । तथाहि यागादिक्रियायां कार्यत्वान्वये नियोज्यान्वयो हेतुः । नियोज्यविशिष्टायामेव पाकादिक्रियायां कार्यत्वान्वयदर्शनात् । अन्वयप्रयोजकरूपवत्त्वस्य तन्मते योग्यत्वात् । नियोज्यस्य च प्रकृते स्वर्गकामस्य नियोज्यत्वेन स्वर्गफलकामनाप्रयुक्तकार्यताज्ञानविषयत्वेन सम्बन्धेन यागादिक्रियायामन्वये स्वर्गसाधनत्वं स्वर्गसाधनत्वेन ज्ञायमानत्वं वा योग्यता । तच्च न सम्भवति साक्षात्स्वर्गसाधनत्वस्य बाधात्, परम्परया तत्साधनत्वस्य परम्पराघटकापूर्वज्ञानं विना दुर्ज्ञेयत्वात् तथा च यागे नियोज्यान्वयासंभवान्न कार्यत्वान्वय इति ।

अथ शुचिः सन्ध्यामुपासीतेत्यादौ नित्ये यथेष्टसाधनत्वज्ञानं विनापि शुचिनियोज्यकं सन्ध्यावन्दनविषयकं कार्यमिति बोधस्तथा स्वर्ग-

कामनियोज्यको यागः कार्यं इति बोधः स्यादिति चेन्न प्रकृते कामनाविशिष्टस्य नियोज्यत्वेन नित्यविधितो विशेषात् ।

न च कामनोपलक्षणमस्त्वात्ममात्रमेवोपलक्ष्यं, काम्यसाधनतालिङ्गककार्यताज्ञानस्य प्रवर्त्तकत्वेन नातिप्रसङ्ग इति वाच्यम् । तर्हि स्वर्गकाम इत्यस्य वैफल्यापत्तेः । कामनाया उपलक्षणत्वे नित्य इव वेदाधीनकार्यताज्ञानान्निष्कामस्यापि प्रवृत्त्यापत्तेः । इष्टसम्बन्धे मानाभावादप्रवृत्त्यापत्तेश्च । नहि नित्यविधितः प्रकृते स्वर्गकामपदसमभिव्याहारादन्यो विशेषः । विशेषणत्वे हि विशिष्टस्य स्वप्रयोज्यकार्यताज्ञानवत्स्वरूपनियोज्यत्वेनान्वये तत्कामनाविषयसाधनत्वस्य योग्यतात्वात् स्वर्गकामपदैकवाक्यतानिर्वाहकप्रतीत्यनुपपत्त्या वाच्यमपूर्वं कामनाविशिष्टान्वयि सिद्धति ।

अत एव प्रधानविधावेवापूर्वाकाङ्क्षा न नित्यविधावाग्नेयादिविधौ च । ममेदं कार्यमिति बोधवत्स्वरूपनियोज्यत्वे च कामनाया विशेषणतया प्रयोजकत्वं कामिनो जनकत्वमिति विशिष्टप्रयोज्यत्वम् संबद्धत्वं च कर्तृत्वाधिकारित्वाभ्याम् । बोधे तूपलक्षणताऽनन्यगत्या न क्षतिकरी । प्राथमिकनियोज्यान्वये विशेषणतयैवेष्टसिद्धेः ।

एतेन राजास्वाराज्यकाम इत्यादौ राजत्वादिवद्विद्यमानत्वे सति व्यावर्त्तकत्वेन विशेषणत्वमप्यपास्तम् । कामनायामेव तत्कृतेरुदयात् । यदा कामना तदा तत्कृतिरिति रीत्या व्यावर्तकत्वासम्भवाच्च । अतो यागे कार्यत्वान्वये नियोज्यान्वयो योग्यता । तत्र चेष्टसाधनत्वेन ज्ञायमानत्वम् । (स्वर्गसाधनत्वस्य योग्यतात्वाभावात्) इति गुरुमतनिगर्वः ॥

अत्र काम्यसाधनत्वेपि तत्त्वेनाज्ञायमाने नियोज्यानन्वयात् काम्यसाधनत्वेन ज्ञायमानत्वमुक्तम् ।

यत्तु काम्यासाधनेपि तत्साधनत्वभ्रमान्नियोज्यान्वयादुपस्थितकाम्यसाधनत्वागृहीतासंसर्गकत्वमेव योग्यता, उपस्थित्यर्थमेवापूर्ववाच्यतासिद्धिरिति ।

तन्न त्वन्मते योग्यताविशिष्टज्ञानस्यैव शाब्दबोधे हेतुत्वादन्यथा ख्यात्यापत्तेः ।

एतेन तादृशज्ञानवतोपि नियोज्यस्य चिकीर्षाशून्यस्य न यागकृतिरिति न नियोज्यत्वं योग्यता, न वा चिकीर्षा, तद्वतोऽप्युपादानप्रत्यक्षविरहिणोऽसत्त्वादिति परास्तम् ।

अन्वयप्रयोजकत्वं हि नान्वितवृत्तित्वेन गृहीतत्वं, किंत्वनन्वितवृत्तित्वेनागृहीतत्वम् । तत्त्वं च यदा यस्य तत्त्वं तदा तस्य न योग्यता-

त्वं, किं तु विशिष्टनिष्ठतयोक्तनियोज्यत्वमेव, प्रयोजकतया तस्य विशिष्टनिष्ठत्वात्। चिकीर्षावत्त्वमपि तथेति चेत्—

सत्यम् किं तु तत्प्रयोजकत्वं तस्योक्तनियोज्यत्वद्वारकत्वेन गुर्विति तत्त्यागः। अत एव कृतिप्रयोजकत्वरूपकर्तृत्वत्यागः। कृतिसमवायित्वरूपकर्तृत्वं फलभोक्तृत्वरूपं चाधिकारित्वं न कामनायामिति न तयोर्विशिष्टनिष्ठत्वमिति प्रागेवोक्तम्।

वस्तुतस्तन्मतेऽन्यथाख्यात्यभावाद्यागो मत्कृतिसाध्य इति ज्ञानं कृतिशून्यस्य नास्त्येवेति न किञ्चिदेतत्।

ननु योग्यतान्वये योग्यतान्तरापेक्षायामनवस्थापत्तेर्नियोज्यान्वयरूपयोग्यतान्वये न योग्यतान्तरापेक्षेति चेत्—सत्यं नियोज्यत्वस्य योग्यतारूपस्य स्वर्गकामेऽन्वये योग्यतान्तरानपेक्षायामपि नियोज्यत्वेन रूपेण स्वर्गकामस्य पदार्थस्य धात्वर्थे यागेऽन्वये योग्यतान्तरस्यावश्यकत्वात्। घटे छिद्रेतरत्वस्यान्वये योग्यतान्तरानपेक्षायामपि छिद्रेतरत्वेन घटस्यान्वये योग्याहरणत्वस्याहरणे योग्यजलत्वस्य जले योग्यतात्वात्।

तथाहि यथा घटादिमात्रेणाहरणाद्यसम्भवात् घटे छिद्रेतरत्वमाहरणे योग्याहरणत्वं जले च योग्यजलत्वं योग्यता, तथा स्वर्गादिकामस्य ममेदं कार्यमिति ज्ञानशून्यस्य यागाद्यन्वयासम्भवात्स्वर्गकामे नियोज्यत्वं क्रियायां काम्यसाधनत्वेन ज्ञायमानत्वं योग्यता, नित्ये तु शौचादिमत्त्वमेव योग्यतेति बोध्यम्॥

अथापूर्वरूपकार्येऽपि न नियोज्यान्वयसम्भवः। अपूर्वस्य प्रागनुपस्थित्या तत्र काम्यसाधनत्वरूपयोग्यताज्ञानासम्भवादिति चेन्न विशिष्यापूर्वत्वेन ज्ञानासम्भवेऽपि कार्यत्वेन तस्य काम्यसाधनत्वज्ञानसम्भवेन नियोज्यान्वयसम्भवात्। ओदनत्वेन तृप्तिसाधनतया ज्ञाते ओदने तृप्तिकामान्वयवत् समानप्रकारकत्वेनैव योग्यताधियो नियोज्यान्वये हेतुत्वात्। अपूर्वलाभस्तु योग्यताबलात्। यागजन्यं कार्यं स्थायि प्रकृतकाम्यसाधनमित्यत्रापूर्वस्यैव विषयत्वाद्, यागजन्यस्य कार्यान्तरस्यातथात्वात्॥

एतेन साक्षात्साधनत्वान्वययोग्यतारूपं स्थायित्वं प्रागपूर्वानुपस्थित्याऽसम्भवीत्यपास्तम्। कार्यत्वावच्छिन्ने क्वचित् स्थायित्वज्ञानसम्भवात्। साक्षात्साधनत्वस्य नियोज्यान्वययोग्यतारूपस्य योग्यतात्वेनैवोपस्थितेस्तत्र योग्यतान्तरानपेक्षणाच्च। स्वर्गकामो यजेतेत्यादिवाक्यश्रवणे स्वर्गसाधनं स्थायि कार्यं सम्भवति स्वर्गकामान्वययोग्यं, यागस्त्वस्थायीत्यनुपपत्तिज्ञानादपूर्वं वाच्यं सिध्यतीत्यनुपपत्तिज्ञान-

मेव योग्यताज्ञानमित्यन्ये ॥

लिङ्‌व फलकरणत्वान्वितं स्वार्थमाहेति न्यायप्रदीपः ॥

प्रवृत्तिजनकशाब्दबोधक्रमस्तु नियोज्यस्वर्गकामीयं यागविषयकं स्वर्गसाधनं स्थायि कार्यं ममेति प्रथमो बोधः । स्वर्गकामे नियोज्यत्वं संसर्गतया प्रकारतया वा भासते । नियोज्यस्वर्गकामीयो यागः कार्य इति द्वितीयः । अन्यथाऽतीन्द्रियस्याफलस्य स्वतन्त्रकृत्यसाध्यतया यागकृतिसाध्यस्य यागे कार्यत्वान्वयबोधं विनाऽनुपपत्तेः । नियोज्यस्वर्गकामः स्वनियोज्यकस्वर्गसाधनत्वेन ज्ञायमानकार्यो यागानुकूलकृतिमानिति व्यापारवानिति वा तृतीयः । अन्यथा पूर्वप्रतीतकृतेराश्रयान्वयं विनाऽनुपपत्तेः । आख्यातवाच्यव्यापारसामान्यस्य कर्तृसाकाङ्क्षत्वात्प्रथमान्तपदोपस्थाप्येऽन्वयबोधनियमाच्च तदन्वयं विनाऽनुपपत्तेर्वा स्वर्गकामो यागजन्यफलभागिति चतुर्थो बोधः । अन्यथाऽनधिकारिणः कर्तृत्वानुपपत्तेः । मत्कृतिसाध्यो यागः अहं च कर्ताऽधिकारी चेति पञ्चम इति केचित् ॥

विवरणकारस्तु अत्र बोधत्रयमेवावश्यकं तावतैव प्रवृत्तिसिद्धेरित्याह ॥

निबन्धकारस्तु आद्यबोधद्वयोत्तरमहं स्वर्गकामः कर्ता भोक्ता चेति बोधात्प्रवृत्तिमाह ॥

इदं गुरुमतं तु मद्विहितसूत्रवृत्ता मया
विचार्य कुसुमाञ्जलौ बहु च दूषितं भूषितम् ।
अपेक्षितमथाप्युपेक्षितमिदङ्कठोरत्वतः
शिशुप्रतिविबोधनार्थकृतभाट्टचिन्तामणौ ॥

नैयायिकास्तु इष्टसाधनत्वकृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वज्ञानानामन्यतमाभावे चिकीर्षाऽजननात्सर्वेषां तज्जनकत्वमविवादम् । अन्यथा चन्द्रमण्डलादावपि चिकीर्षापत्तेः । एवं च प्रवृत्तिजनकलिङादीनां विनिगमनाविरहेण त्रितयेपि शक्तिः, पुष्पवन्तशब्दवच्च युगपदर्थत्रयबोधेनैका शक्तिः । शक्तित्रयेण वा युगपद्बोधः । अन्वयश्च तेषां धात्वर्थे । अतस्त्रितयमित्याहुः ॥

अत्रेदमवधेयम्—कृतिसाध्यत्वं न विधिवाच्यम् । कृतौ यागानुकूलत्वबोधेन समानसंवित्संवेद्यतया यागे कृतिसाध्यत्वस्यापि भानात् । एवमिष्टसाधनत्वमपि न वाच्यम् । तस्यापि यागस्वर्गयोः साध्यसाधनभावबोधेनैव भानात् । अनन्यलभ्यस्य च शब्दार्थत्वात् ।

न च तत्र तत्प्रकारकबोधार्थं शक्तिकल्पनम् इष्टत्वावच्छिन्नसाध्यतानिरूपितसाधनताज्ञानस्यैव प्रवर्तकत्वादिति वाच्यम् । स्वर्गकामपदेन तत्रे·

च्छाविषयत्वबोधाद् यागे तत्साधनत्वबोधेनैवेष्टसाधनत्वस्यापि बोधात् स्वर्गो ऽनिष्टं यागो वा ऽसाधनमिति बोधे स्वर्गकामादिपदार्थबोधाभावेनैव तद्वाक्यजन्यप्रवृत्त्यभावोपपत्तेः । एवं बलवदनिष्टाननुबन्धित्वमपि न वाच्यम् । अर्थवादेनैव तद्बोधात् । कलमायासादिरूपानिष्टे इष्टोत्पत्तिनान्तरीयकदुःखाधिकत्वाभावबोधनेनैव बलवदनिष्टाननुबन्धित्वस्य लाभात् । किं चेष्टसाधनकृतिसाध्यबलवदनिष्टाननुबन्धिज्योतिष्टोमाभिन्नयागानुकूलकृतिमान् स्वर्गकाम इति बोधे आख्यातार्थकृतेर्विशेष्यतया प्रकारतया च भाने वैरूप्यापत्तिरित्यादि दिक् ॥

अत्राभिधीयते—अभिधैव शब्दनिष्ठा प्रवर्तनारूपा विध्यर्थः । तथाहि—प्रवृत्तिर्द्वेधा स्वेच्छाधीना पराधीना च । तत्राद्यायामिष्टसाधनत्वादिधीः कारणम् । अन्त्यायां राजगुर्वादेराज्ञाप्रेरणादिधीः । अनिच्छन्तमपि राजा मां प्रवर्तयतीत्यनुभवात् । तेषां च प्रवृत्तौ प्रत्येकरूपेण न हेतुत्वं, व्यभिचाराद् गौरवाच्च । किं तु इच्छादिनिष्ठप्रवर्तनात्वप्रकारकज्ञानं हेतुः । तच्चायं मां प्रवर्तयति विधिर्मां प्रवर्तयतीत्याकारकम् ।

प्रवर्तना च प्रवर्तयितुः परप्रवृत्त्यनुकूलव्यापारविशेषः । स च चेतनस्य राजादेराज्ञादिः । वेदे वक्तुरभावादचेतनस्य वेदस्याभिधानियामकः कश्चिच्छब्दसमवेतो ऽलौकिकः । तथा राजाज्ञादिज्ञानाद्यथा प्रवृत्तिस्तथा विधेरभिधाज्ञानादिति । सैव लिङर्थः ।

सा च शब्दाश्रितत्वाच्छब्दशक्तिः । शब्दव्यापारत्वाच्च शब्दभावनेत्युच्यते । भावनापदस्य व्यापारवाचकत्वात् । अत एवाख्यातार्थो भावनापि व्यापार एव ।

नन्वुक्तयुक्त्या ऽभिधादिपदाभिधेयत्वादिना ज्ञानादप्रवृत्तेश्च प्रवर्तनात्वेनैवाभिधाज्ञानं प्रवृत्तिहेतुस्तेन तज्ज्ञानं च कथं स्यात् । किं चाभिधाया अचेतनवेदरूपकर्तृशक्तित्वेन तस्यां व्युत्पत्त्यसम्भवश्चेति चेन्न प्रवर्तनात्वविशिष्टे लिङ्त्वावच्छिन्नशक्तिस्वीकारात्तत एव तज्ज्ञानात्तथैव व्युत्पत्तेः । तथाहि स्तनपानार्थं रुदन्तं स्वं पश्यन्त्या मातुस्तन्यदानार्थं प्रवृत्तिमुपलभ्य तज्जनकं ज्ञानं जिज्ञासुः स्वरोदनेन स्वाभिप्रायरूपप्रवर्त्तनानुमानमेव मातुः परिशेषात्तथेति प्रतिसन्धत्ते, ततश्च प्रयोजकवृद्धवचनश्रवणजन्यप्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा तस्य तद्वाक्यजं प्रवर्त्तनाज्ञानमनुमिनोति । ततस्तस्य किं हेतुरिति जिज्ञासायां वाक्यमेव तथा ऽवधारयति । तत आवापोद्वापाभ्यां लिङस्तत्र शक्तिं गृह्णाति । तदुक्तम्—

अभिधाभावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः ॥

इति । अर्थात्मत्वमर्थविषयकत्वमर्थाश्रितत्वं वा । तथा चार्थनिष्ठत्वादर्थभावना फलोत्पत्त्यनुकूलकृतिनोदनादिव्यापाररूपा ऽऽख्यातत्वावच्छिन्नशक्त्या चेतनाचेतनकर्तृसाधरणी कर्तृशक्तिः । द्विविधापि भावना नियमतः कर्मकरणेतिकर्तव्यतारूपांशत्रयसाकाङ्क्षा तत्त्रितयसाकाङ्क्षत्वमेवोभयानुगतं भावनापदप्रवृत्तिनिमित्तम् । तत्र शब्दभावनाया अंशत्रयमाहुः ।

लिङो ऽभिधा सैव च शब्दभावना,
भाव्या च तस्याः पुरुषप्रवृत्तिः ।
सम्बन्धबोधः करणं, तदीय-
प्ररोचनं चाङ्गतयोपयुज्यते ॥

अस्यार्थः—लिङो ऽभिधानामकस्ववृत्तिः स्वशक्तिरवश्यं वाच्या । न च तत्र मानाभावः । व्यापारभिन्नस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारैवेति व्याप्तेः । चक्रभ्रमिजनकत्वस्य दण्डादौ स्वनिष्ठस्पन्दादिद्वारैव दृष्टत्वात् । तथा च लिङ्पदेनापि प्रवृत्त्यनुकूलेन स्वनिष्ठव्यापारो ऽवश्यं जननीय इति स एवाभिधात्मकः । व्यापारस्य व्यापारापेक्षायामनवस्था स्यादिति व्यापारभिन्नस्येति । व्यपारिणः स्वनिष्ठव्यापारार्जनेपि व्यापारपेक्षायामनवस्थापत्तेः परनिष्ठेति । शब्दे ज्ञानद्वारा प्रवृत्तिहेतुत्वात् सिद्धसाधनं स्यादिति शब्दनिष्ठाभिधासिद्ध्यर्थं स्वनिष्ठेति । किमित्याकाङ्क्षायां भाव्यमाह, भाव्या चेति । अर्थभावनैव शब्दभावनाभाव्येत्यर्थः । केनेत्याकाङ्क्षायां करणमाह । सम्बन्धबोध इति । अगृहीतलिङ्शक्तिकस्याप्रवृत्त्या सङ्केतग्रहस्य तत्सहकारित्वमित्याशयः । सङ्केतश्च तद्वाक्यघटकपदानां तत्तदर्थे, लिङश्च प्रवर्त्तनात्वादिविशिष्टे बोध्यः ॥

नन्विष्टसाधनताज्ञानं प्रवृत्तिमात्रे हेतुस्तथा च तद्विना प्रवर्तनामात्रज्ञानेपि कथं प्रवृत्तिरिति चेत्—सत्यम् स्वर्गकामो यजेतेत्यादौ प्रथमतो लिङ्पदार्थयोरर्थभावनाशब्दभावनयोरन्वयबोधः प्रवर्त्तनाविषयकृतिरित्याकारको जायते । एकपदोपात्ततया धात्वर्थापेक्षया प्रत्यासत्तितारतम्यात् । तदुक्तम्—

विधिभावनयोः श्रुत्या सङ्गतिः पूर्वमिष्यते ।

इति । प्रवर्त्तनात्वविशिष्टस्य च विषयतया ऽर्थभावनायामन्वये इष्टभावनात्वमिष्टं भावयति उत्पादयतीति व्युत्पत्त्येष्टसाधनत्वरूपं, यो-

न्यमा तस्य विध्यर्थोऽपि, क्रियागतमिष्टसाधनत्वं न विध्यर्थ इत्येतन्मते विशेषः अर्थभावनाया इष्टसाधनत्वं क्रियागतेष्टसाधनत्वं विना नेत्याक्षिप्तक्रियेष्टसाधनत्वधीरपीति प्रवृत्तिर्नानुपपन्नेति । तत्र आख्यातोपस्थितार्थभावना किं केन कथमित्यंशत्रयं क्रमेणापेक्षमाणा किमिष्टं कुर्यादित्याकाङ्क्षायां यागस्य कष्टत्वेन करणत्वेन चासाध्यतया यागे नान्वयं भावयेदिति । ततः किमिदन्तदन्यदित्याकाङ्क्षायां स्वर्गकामपदसमर्पितमसिद्धतया साधनापेक्षं स्वर्गमेवार्थभावनाभाव्यत्वेन स्वीकरोति । श्रुतिवृत्त्या हि पदार्थभूतस्य स्वर्गकामस्य भाव्यत्वमुच्यमानं विशेष्ये बाधे विशेषणे स्वर्गे पर्यवस्यति । तथा च यागेन स्वर्गं भावयेदिति फलितं, यागकरणिका स्वर्गफलिका प्रवृत्तिः प्रवर्त्तनाविषय इति बोधः। यत्र च समभिव्याहृतानुपस्थितं फलं तत्र प्रकरणादिना, तेषामप्यभावे ऽर्थवादेन विधिसापेक्षेण, तस्याप्यभावे विश्वजिन्न्यायेन फलविशेषः कल्प्यते ।

यद्यपि पुरुषप्रवृत्तिरूपभावनानिष्पाद्यो यागस्तत्र न करणं तथापि फलावच्छिन्नभावनायां विशेषणे करणत्वे करणत्वोपचार इति फलोद्देश्यकप्रवर्त्तककृतिविषयत्वमेवात्र करणत्वं, दण्डेन घटं करोतीत्यादौ लोकेऽपि हि तथैव करणत्वं । केनेत्यस्यापि किंविषयिणी कृतिः स्वर्गसाधनमित्यर्थः इत्यन्ये ।

अत्र यागकरणत्वविशिष्टे लक्षणेति प्राञ्चः ।

वस्तुतः करणत्वं यागस्य सम्बन्धो वाक्यार्थ एव ज्योतिष्टोमादेस्तत्राभेदेनान्वयो निराबाधः । इत्थं च कथं विनष्टेन यागेन स्वर्गो भाव्य इति प्रतीत्यवसानेन्तरापूर्वंकृत्वेति सम्बध्यते, ततः कथमपूर्वं यागेन कर्त्तव्यमित्यपूर्वभावनायामित्थंभावेन संयुज्यमानमितिकर्तव्यताजातमपूर्वप्रयुक्तमुच्यते । ततः प्रकारापेक्षायां समिधो यजतीत्यादिवाक्यैरिष्टविशेषापेक्षैः स्वाधिकारवाक्यैकवाक्यतया दर्शपूर्णमासभावना प्रयाजादिभावनोपेता ऽपूर्वं साधयतीत्यवगते प्रयाजादीनां तादर्थ्येन समन्वये पश्चादुपकारत्वं कल्प्यते ।

तदयं भट्टमते बोधक्रमः । स्वर्गकामानिष्ठा यागकरणिका स्वर्गफलिका प्रयाजादीतिकर्त्तव्यताका भावनेत्यर्थभावनाबोधः । विधिनिष्ठा शक्तिग्रहकरणिका स्तुत्यर्थवादोपकृता प्रवर्त्तनेति शब्दभावनाबोधः शक्तिकल्पनेन लक्षणया वोपपद्यते । ततो निरुक्तार्थभावना निरुक्तप्रवर्त्तनाविषय इत्येकवाक्यतया महावाक्यार्थबोधः । अत एव विध्युपरक्ता भावना लिङर्थ इति भट्टसिद्धान्तः । विधिः प्रवर्तना तदुपरक्ता

तद्विशिष्टार्थभावना लिङ्प्रतिपाद्येत्यर्थः । अर्थभावनाविशेषणत्वेनैव शब्दभावनाया अन्वयः । राजादिकृताज्ञादेस्तथैवान्वयात्, तदन्वयेन योग्यत्वेन प्रवर्त्तनायामपि बलवदनिष्टाननुबन्धीष्टसाधनत्वं लभ्यते । न सुरां पिबेदित्यादौ प्रतिषेधवाक्यार्थोऽपीत्थमेवोन्नेयः । एवमन्येऽप्य-न्वयबोधाः स्वयमूह्या इति ॥

अथ विधेर्भेदः । तत्र विधिस्त्रिविधः । अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्च ॥

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

अत्यन्ताप्राप्तविषयप्रापको विधिरपूर्वविधिः । यथा व्रीहीन्प्रोक्षति । अत्र प्रोक्षणमत्यन्ताप्राप्तम् ।

पक्षे प्राप्तस्याप्राप्तांशपूरणफलो विधिर्नियमविधिः । यथा व्रीहीन-वहन्तीति व्रीहीणां पुरोडशद्वारा यागसाधनत्वस्य तुषविमोकसाधनी-भूतावघातनखविदलनान्यतराक्षेपकतयाऽवघातस्य पक्षप्राप्तत्वात् ।

एकस्मिन्प्रधाने नियतप्राप्तस्याङ्गद्वयस्यैकस्मिन्नङ्गे नियतप्राप्तस्य प्रधानद्वयसम्बन्धस्य वाऽन्यतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः । यथा गृहमधीये आज्यभागौ यजतीति । इमामगृभ्णन् रशनामृतस्ये-त्यश्वाभिधानीमादत्त इति च । अत्रातिदेशेनाज्यभागतदितराङ्गयोर्गृ-हमेधीये मन्त्रे च मन्त्रलिङ्गेनाश्वगर्दभरशनादानसम्बन्धयोर्नियतप्राप्त तया तद्विधेरितरनिवृत्तिफलकत्वात् ।

न च विधीनामाक्षेपातिदेशलिङ्गानपेक्षप्रवृत्तिकतयाऽप्राप्तावघातादिप्रापकत्वेनापूर्वविधित्वमिति वाच्यम् । विधानवेलायां विधिमात्रस्यापूर्वविधित्वेऽपि फलतो नियमादिव्यपदेशात् ।

न चैवमपि नियमपरिसंख्याविध्योरितरनिवृत्तिफलकत्वस्यैवका-रेण विवरणस्य च तुल्यतया भेदो न स्यादिति वाच्यम् । अप्राप्तांशप्रा-प्तेर्विधेयावघातनिष्ठतया शीघ्रोपस्थितत्वेन लाघवेन च फलत्वसम्भवे लिङ्गोपस्थितिकया निष्पादिन्याश्च निवृत्तेः फलत्वायोगात् । मन्त्र-विधौ तु नियमस्य फलत्वासम्भवादितरनिवृत्तेरेव फलत्वमिति ।

नन्वेवमप्यपूर्वविधिलक्षणमग्निहोत्रं जुहुयात्स्वर्गकामः, अथातोऽग्नि-माग्निष्टोमेनानुयजतीतिविध्योरव्याप्तम् । एतद्विधिविषययोरग्निहोत्रचयन-योरुत्पत्तिविधिप्राप्तत्वात्(१) । न चोद्देश्यसम्बन्धित्वेनेत्यप्राप्तेर्विशेषण मिति वाच्यम् । तथापि तमुक्थ्येनेत्यादिविधावव्याप्तेः । उद्देश्योक्थ्या-

(१) 'य एवं विद्वानग्निं चिनुते' 'अग्निहोत्रं जुहोति' इत्याभ्यां प्राप्तत्वात् ।

दिसम्बन्धेनातिदेशतश्चयनादिप्राप्तेः ।

न चायं प्रकृतावुत्तरवेद्या सह विकल्पितस्य उक्थ्ये ऽतिदिष्टस्य नियमोऽङ्गान्तरपरिसंख्या वा, गौरवात् । उपपादितं चाप्राकरणिकस्यापि चयनस्य वाक्येन प्रकृतिभूतज्योतिष्टोमाङ्गत्वमिवोक्थ्याद्यङ्गत्वं, तस्य चायनाश्रितगुणकामप्राप्ति· फलमिति दशमे ।

न चोद्देश्यसम्बन्धित्वेन विधिविषयान्यर्यत्किंचित्प्राप्तिफलको· विधिरपूर्वविधिरिति लक्षणम् । द्वादशाहिकगावामयनिकऽग्य· नीकादिविध्यन्तर्गतयोरैन्द्रवायवाग्रं प्रथममहर्भवति अथ शुक्राग्रमिति विध्योरव्याप्तेः । रथन्तरबृहत्पृष्ठत्वेनैन्द्रवायवाग्रत्वादिप्राप्तेः सत्त्वादनै· मित्तिकत्वबोधनद्वारा तत्तद्विकृतौ वामदेव्यपृष्ठवति तत्प्राप्तिफलकत्वे· नापूर्वविधित्वात् ।

न च यत्किंचित्संबन्धित्वेन यस्य कस्य चिदप्राप्तस्य प्राप्ति फलको विधिरपूर्वविधिरिति वाच्यम् । अवघातनियमस्यापि विकृता वाज्यधर्मप्राप्तिफलकत्वेनातिव्याप्तेः । तावब्रूतामग्नषोमावाज्यस्यैव ना· वुपांशुयष्टव्यम् उपांशुयाजमन्तरा यजतीत्युपांशुयाजे कालविधावप्राप्त· स्वर्गसम्बन्धप्राप्तिफलके ऽव्याप्तेश्च । तत्रोद्देश्यान्यसम्बन्धित्वेन यत्किं· चित्प्राप्तिफलकत्वाभावात् । आपराग्निकहोमविधिसंदंशपठिते द्वे आ हवनीये जुहोतीति विधौ गार्हपत्यान्वाहार्यपचनाधिकरणकचतुः सं· ख्याकहोमान्तरत्वतदङ्गत्वव्यावृत्तप्राप्ताग्निहोत्रहोमाभ्यासत्वसिद्ध्या ते· षामभ्यासानामप्राप्तफलसम्बन्धप्राप्तिफलकत्वात् ।

न च विधेयसम्बन्धित्वेन यत्किंचित्प्राप्तिफलकत्वं विवक्षणीयम् । वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकाम इति विधौ सन्निध्याम्नातानामा· मनहोमार्थवादिकं ग्रामफलसम्बन्धव्यावृत्त्याङ्गत्वसिद्धिफलके ऽव्याप्तेः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधौ सर्वथाऽव्याप्तेश्चेति चेत् ।

अत्र पितृचरणाः उद्देश्यविधेयफलान्यतराणामनिर्धारितस्वविरो· धिप्राप्तिप्रयुक्तस्वाप्राप्तांशप्रापको विधिर्नियमः । अस्ति चेदं व्रीहीनव हन्तीत्युपायनियमे नियम्यावघातस्यानिश्चितस्वविरोधिनखविदलन प्राप्तिप्रयुक्तावघाताप्राप्त्यंशपूरकत्वात् । यज्जुह्वां गृह्णाति प्रयाजेभ्य· स्तत्, यदुपभृति प्रयाजानुयाजेभ्यस्तत् इत्युभयनियमे पुरोडाशं प्रथ· यतीति नियमे च । अत्र चोद्देश्यविधिविषययोः पाक्षिकत्वे सतीत्युक्तौ तमुक्थ्येनेति विधौ रथन्तरे प्रस्तूयमाने सम्मीलयेदित्यत्र चातिव्या· प्तिः । तद्वारणार्थमप्राप्त्यंशपूरणफलकेति । एवमपि सर्वेभ्यो दर्शपूर्ण· मासाविति विधेरप्राप्तस्वर्गान्यफलांशपूरणफलकत्वादातिव्याप्तिवारणया

स्वविरोधिप्राप्तिप्रयुक्तत्वमप्राप्तिविशेषणं, स्वर्गान्यफलप्राप्तेः प्रापकप्रमाणाभावप्रयुक्तत्वेन विरोधिप्राप्तिप्रयुक्तत्वाभावात् । एवमपि 'पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य' इति विधौ षडहांशतृतीयादिदिवसेषु बृहद्रथन्तरविरोधिवैरूपादिप्राप्तिप्रयुक्तस्वाप्राप्तिपूरणफलकत्वादतिव्याप्तिवारणाय निर्धारितत्वं स्वविरोधिप्राप्तेर्विशेषणम् । अत्र विरोधिप्राप्तेरनिर्धारितत्वान्नातिव्याप्तिः । न च हिरण्यगर्भः समवर्त्तताग्र इत्याघारमाघारयतीति नियमे ऽव्याप्तिरत्र पक्षप्राप्त्यभावादिति वाच्यम् । तस्यापूर्वविधित्वेनेष्टापत्तेः । न च नियमापूर्वस्य नियम्यजन्यत्वात्तत्र दृष्टार्थत्वान्नियमादृष्टकल्पनावश्यम्भावनियमापूर्वस्य हिरण्यगर्भमन्त्रस्य जनकतानवच्छेदकत्वान्नियमापूर्वजनकत्वाभावात् । एवमसमर्थमन्त्रविनियोगेषु 'उत्करे वाजिनमासादयति' 'परिधौ पशुं नियुञ्जीते'त्यादिष्वपूर्वविधित्वं द्रष्टव्यमिति दिक् ॥

परिसङ्ख्यात्वं च वैदिकप्रमाणेन केन चित्सम्बन्धेन द्वयोरेकसम्बन्धत्वे लिङ्गादिप्रमाणप्रकृतविध्यनुपपत्त्यन्तरेण समुच्चित्य नित्यप्राप्तयोरनुयोगितासम्बन्धेन इतरनिवृत्तिफलकनञाद्यसमभिव्याहृतविधित्वम् । वर्त्तते चेदमश्वाभिधानीमादत्ते इति शेषिपरिसङ्ख्यायाम् । शेषित्वसम्बन्धेनाश्वाभिधानीगर्दभाभिधान्योर्मन्त्रसम्बन्धित्वेन प्राप्तयोरितरनिवृत्तिफलकत्वात् 'इडान्ता प्रायणीया सन्तिष्ठत' इति शेषपरिसंख्यायां च 'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान्गृह्णीयादि'ति नियमान्तरपरिसंख्ययाञ्च । अस्य प्रकृतिविकृतिभूतानां रथन्तरसाम्नामरथन्तरसाम्नां चैन्द्रवायवाग्रतासम्बन्धित्वेन प्राप्तरथन्तरसामनिवृत्तिफलकत्वात् । 'वाग्वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते' इत्याश्रयान्तरपरिसंख्यायां च । 'अत्र ह्येवावपन्ति ह्यत एवोद्वपन्ती'ति पावमानगायत्रीबृहत्यनुष्टुब्भिन्नऋक्परिसंख्यायां गायत्र्यादिषु तद्भिन्नऋक्समागमस्यैतद्विधितः प्रागसिद्धत्वेन प्राप्त्यभावादव्याप्तिवारणाय प्रकृतविध्यनुपपत्तीति । अत्र चैवकारोक्तपरिसंख्याबोधानन्तरमर्थप्राप्तिबोधः प्राप्तिसामर्थ्येनावापस्य ऋग्विषयत्वपरित्यागः सामविषयत्वं कल्प्यत इति । एवमप्यप्राप्तपरिसंख्येति नाव्याप्तिः । 'चत्वारो भवन्ति षडहा भवन्ती'त्यपूर्वविधिषु षट्त्रिंशद्रात्रिक्रमप्रयोगसम्बन्धितया प्राप्तषडहच्छन्दोमधर्माणां मध्ये छन्दोमधर्मनिवृत्तिषडहेष्वतिव्याप्तिवारणाय समुच्चित्येति प्राप्तिविशेषणम् । नहि षडहच्छन्दोमधर्माणामेकत्र समुच्चित्य प्राप्तिः । सप्तमादिषु छन्दोमधर्माणां प्राप्तेः । यदि चैककर्तृप्रयोगसम्बन्धित्वेन प्राप्तिरस्तीति विभाव्यते तदास्त्येव परिसंख्याविधिरिति नातिव्याप्तिस-

म्भावनापि। एतेन सर्वं ब्रह्मणे परिहरति सप्रियाय सगोत्राय ब्रह्मणे देयः। अग्निष्टुति आग्नेया ग्रहा भवन्तीति विधिष्वतिव्याप्तिसम्भावना परास्ता। सर्वर्त्विजां स्वस्वभागसम्बन्धितया प्राप्तिसत्त्वेनैकत्र समुच्चित्य प्राप्त्यभावात्। सकलनियमविधिव्यावृत्त्यर्थं नित्येति। यावज्जीवमग्निहोत्रं जुहोतीत्यकरणनिवृत्तिफलके विधावतिव्याप्तिवारणायानुयोगितासम्बन्धेनेति निवृत्तिविशेषणम्। अकरणनिवृत्तेः करणत्वरूपाया अनुयोगितासम्बन्धेन तदभावात्। अत एवाभावाभावस्य भावरूपत्वम्।

ननु तथापि क्रत्वर्थनिषेधेषु 'दीक्षितो न ददाति न जुहोति न पचती'त्यादिष्वतिव्याप्तिः। दीक्षितस्य क्रत्वर्थपुरुषार्थहोमादीनां समुच्चित्य प्राप्तिसत्त्वेनैतस्य पुमर्थनिवृत्तिफलत्वाद् इति चेत्। निषेधेषु विधित्वाभावाद्विधिपदेनैव तद्व्यावृत्तिरिति केचित्। नञाद्यसमभिव्याहृतेति वा विशेषणीयम् तेन न कुत्राप्यव्याप्त्यतिव्याप्त्यवकाश इति दिक्॥

उभयभिन्नो विधिरपूर्वविधिः। प्राप्तिफलको विधिरिति लक्षणं तु नियमपरिसङ्ख्ययोः फलत्वाभावे प्राप्तिरेव फलत्वेन पर्यवस्यतीत्यभिप्रायेणेत्याहुः॥

केचित्तु अयोगान्ययोगव्यावृत्तिभिन्नफलको विधिरपूर्वविधिः, अयोगव्यावृत्तिमात्रफलको नियमो, ऽन्ययोगव्यावृत्तिमात्रफलको विधिः परिसंख्येति लक्षणान्याहुः।

परे तु तात्पर्यविषयतापर्याप्त्यवच्छेदकप्राप्तिमद्विधित्वमपूर्वविधित्वम्। एवं तात्पर्यविषयतापर्याप्त्यवच्छेदकनिवृत्तिमद्विधित्वं परिसंख्यात्वम्। तात्पर्यविषयतापर्याप्त्यवच्छेदकायोगव्यवच्छेदकत्ववद्विधित्वं नियमत्वम्। विषयताया अपि पर्याप्त्यङ्गीकारात्। यत्र त्वेकस्यैव विधेरुभयत्र तात्पर्यं तत्र सङ्करोपीष्ट एवेत्याहुः।

वर्त्तते चैतत्प्रोक्षणविधौ। प्रोक्षणप्राप्तिफलकत्वात्।

नन्वग्नये वो जुष्टं प्रोक्षामीति मन्त्रस्य देवतार्थद्रव्यप्रोक्षणलिङ्गबलाद्धविः प्रोक्षणद्वारा कर्मार्थत्वावगमात्तत एव प्रोक्षणप्राप्तिः। यथा प्रकृतौ 'दीक्षाहुतीर्जुहोती'ति विहितासु दीक्षाहुतिष्वाकूत्यै प्रयुजेऽग्नये स्वाहेत्यादिषु षट्सु मन्त्रेषु लिङ्गक्रमप्राप्तेष्वग्निप्रयोगे पुनराकूतिमग्निमित्यादिषु षट्सु मन्त्रेषु पठितेषु षड्भिर्दीक्षयतीति वचनेन विनियुक्तेषु स्वाहालिङ्गबलाद्धोमद्वारा दीक्षार्थत्वे प्राप्ते लिङ्गाद्धोमप्राप्तिः। न च वाच्यं तत्र द्वादश जुहोतीति वाक्यं होमविधायकमिति। प्रकृतितः प्राप्तत्वेन विध्य-

नुवादकृतवैरूप्यप्रसङ्गेनानुवादत्वात् । न च वाच्य'मेकादशप्रयाजान्यजती'तिवदभ्यासविधिरयमिति । 'षड्भिर्दीक्षयती'ति विधेरानर्थक्यापत्तेः । एतत्कृतदीक्षासम्बन्धानुपपत्त्या होमद्वारकप्राप्त्या प्राकृतमन्त्रबाधापत्तेश्च । अस्तु वा मन्त्रगतद्वादशत्वं विधिः । होमप्राप्तिस्तु मन्त्रलिङ्गादेव । एकस्य वाक्यस्य सर्वथानर्थक्यापेक्षया गुणविधित्वस्य न्याय्यत्वादिति चेद् न तार्किकप्राप्त्यनवधानदशायामेवापूर्वविधित्वात् । तार्किकप्राप्त्यालोचनेऽभ्युदयशिरस्कत्वप्रायश्चित्तप्राप्त्यध्वर्युकर्तृकत्वाद्यनेकप्रयोजनासिद्धेः । विधिना प्रोक्षणप्राप्तौ मन्त्रस्य लिङ्गेनाग्निप्रोक्षणादावुत्कर्षापत्तेः । न च ग्रहणावेक्षणवन्मन्त्रलिङ्गेन प्राप्तिरिति वाच्यम् । तयोरपि भक्षविधिनैव विध्यङ्गीकारात् । अतः पदार्थविध्यभावे मन्त्रस्यानङ्गतया तेन न पदार्थप्राप्तिसम्भावनापि । दीक्षाहुतीनामपि द्वादश जुहोतीत्यभ्यासविध्यङ्गीकारात्लिङ्गान्न होमप्राप्तिः । तेन युक्तमुदाहरणमिति दिक् ॥

तत्रापूर्वविधिरुत्पत्तिविधिविनियोगविध्यधिकारविधिप्रयोगविधिभेदेन चतुर्धा ।

कर्मस्वरूपबोधको विधिरुत्पत्तिविधिः, यथाग्निहोत्रं जुहोतीति ।

अङ्गताबोधको विधिर्विनियोगविधिः, यथा दध्ना जुहोतीति ॥

फलसम्बन्धबोधको विधिरधिकारविधिः, यथाऽग्निहोत्रं जुहुयात्स्वर्गकाम इति ।

स्वाङ्गानुष्ठानबोधको विधिः प्रयोगविधिः । स च नित्यं कल्प्यो भिन्नउत्पत्तिविनियोगविध्युपजीवकश्च । न च किमर्थं तत्कल्पनमिति वाच्यम् । समानदेशकालकर्तृताया अन्येनालाभात् । तल्लाभाय तस्यावश्यकत्वात् । अङ्गप्रधानविध्येकवाक्यताबोध एव प्रयोगविधिरित्यन्ये । नियमपरिसङ्ख्याविधी प्रायेण विनियोगविषयावेवेति दिक् ॥

सोपि विधिर्विषयभेदादष्टविधः । शुद्धधात्वर्थविधिः । अन्योद्देशेन धात्वर्थविधिः । विशिष्टधात्वर्थविधिः । अन्योद्देशेन विशिष्टधात्वर्थविधिः । धात्वर्थोद्देशेनान्यविधिः । धात्वर्थोद्देशेन विशिष्टान्यविधिः । धात्वर्थोद्देशेनान्ययोः सम्बन्धविधिः । मुक्त्वा धात्वर्थमन्ययोः सम्बन्धविधिः ॥

उदाहरणानि । अग्निहोत्रं जुहोति । अग्निहोत्रं जुहुयात्स्वर्गकामः । सोमेन यजेत । दशापवित्रेण ग्रहं सम्मार्ष्टि । दध्ना जुहोति । य इष्ट्या पशुना सोमेन वा यजेत सोमावास्यायां वा । अत्र यागोद्देशेन पौर्णमास्यमावास्याविशिष्टविकल्पविधानात् । विकल्पितपौर्णमास्यमा-

वास्याविधानाद्वा । प्राकाशावध्वर्यवे ददाति । अत्र प्रकृतदानोद्देशेन प्राकाशाध्वर्युसम्बन्धविधानात् । दध्नेन्द्रियकामस्य जुहुयात् । अत्र मुक्त्वा धात्वर्थमन्यसम्बन्धविधानादित्यष्टौ प्रकारा इति जर्णाः ॥

धात्वर्थोद्देशेनान्यसम्बन्धविधेरुद्देशेन विशिष्टविधितो भेदाभावात्सप्तविधत्वं युक्तम्। अत्र च पूर्वापेक्षया उत्तरोत्तरदौर्बल्यम्प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थाभिधायकत्वव्युत्पत्तितद्भङ्गाभ्यां द्रष्टव्यम् ॥

इति मीमांसकश्रीगागाभट्टकृतभाट्टचिन्तामणौ तर्कचरणे
विधिभेदतत्प्रकारनिरूपणम् ॥

ननु धातोः किं वाच्यमिति चेत् ।

अत्र वैयाकरणाः । भूवादिधातूनामुत्पत्त्यादिरूपं फलं तदनुकूलो व्यापारश्च वाच्यः । उत्पत्तिः प्राकट्यम् । फले शक्तिग्राहकश्च भूसत्तायामित्यादिः सर्वोपि धातुपाठः । व्यापारे शक्तिग्राहकं च भूवादयो धातव इति सूत्रम्, तच्च वाप्रकारेषु भ्वादिषु धातुसंज्ञां विधत्त इति वाधातुवाच्यार्थवाचितां सर्वधातूनां सूचयति । वाधातोश्च गतिरूपव्यापार एव वाच्य इति सर्वधातूनां व्यापारवाचित्वम् । न चैवं बीजमङ्कुरं करोतीति प्रयोगापत्तिः । इष्टापत्तेः । अत्र फलानुकूले व्यापारे व्यापारजन्ये फलेऽनुकूलत्वजन्यत्वयोः संसर्गमर्यादया लभ्यतया फले व्यापारे च शक्तिः । प्रत्ययार्थस्तु व्यापाराश्रयः फलाश्रयश्चेत्याहुः ॥

कश्चित्तु–भूवादय इति सूत्रं कृतैकशेषादिशब्दत्रयकं सत्तादिरूपफलवाचकभूप्रकारा गतिवाचकवाप्रकारा भ्वादिगणपठिताश्च धातव इत्येतदर्थकं सत्फलवाचितां सर्वधातूनामाहेत्याह ॥

अत्र मण्डनः—फलमेव धात्वर्थः । पचिगमित्यजिपतत्यादीनां विक्लित्युत्तरदेशसंयोगपूर्वदेशविभागाधोदेशसंयोगादय एवार्थाः । अनुकूलव्यापारस्तु प्रत्ययार्थः । लडाद्यर्थवर्त्तमानत्वादिकं व्यापारेऽन्वेति, समानपदोपात्तत्वात् । तेन व्यापारविरमे न पचतीतिप्रयोगः, फलानुत्पाददशायां व्यापारमात्रकाले पचतीति प्रयोगश्च । व्यापारविरमे पाको विद्यते पच्यर्थो विद्यत इति प्रयोगस्तु विक्लित्तिर्वर्त्तत इतिवदिष्ट एव । अत एवं पाकं करोति पाके व्याप्रियत इति पाकात्पृथक् करणेन व्यापारविवरणम् ।

न च ग्रामो गमनवानिति प्रयोगापत्तिः, उत्तरदेशसंयोगरूपफलस्योभयनिष्ठत्वादिति वाच्यम् । तथात्वेपि निरूपकत्वादिसम्बन्धविशे

षेण वर्त्तमानस्यैव फलस्य वाच्यत्वाङ्गीकारात् । अन्यथाभिमुख्यसम्बन्धेन संयोगानुकूलक्रियाया ग्रामेपि सत्त्वाद्व्यापारवाचित्वेपि तुल्यो दोषः । एवं विध्यर्थकृतिसाध्यत्वेष्टसाधनत्वादीनामपि व्यापार एवान्वयः । तेनौदनकामः पचेदित्यादावोदनसाधनत्वस्य कृतिसाध्यत्वस्य च व्यापार एवान्वयः ।

एतेन फलस्योपायगोचरकृतिसाध्यतया उपायस्य स्वगोचरकृत्यसाध्यत्वेन विधिवाच्येष्टसाधनत्वकृतिसाध्यत्वयोः पाकेऽन्वयात्तत्रप्रवृत्त्यनुपपत्तिरिति मणिकृदुक्तदूषणमपास्तम् । तदनुकूलव्यापारे प्रवृत्तेरिष्टत्वात्

न चैवं यजेत्दद्याज्जुहुयादित्यादिषु पर्यायत्वप्रसङ्गः । स्वत्वध्वंसरूपफलस्यैकत्वादिति वाच्यम् यजतेः स्वत्वध्वंसरूपफलवाचित्वात् । ददातेः परस्वत्वमात्ररूपफलवाचित्वात् । जुहोतेः प्रक्षेपरूपफलवाचित्वात् ।

एतेन स्वत्वध्वंसरूपफलोपलक्षितदेवतोद्देश्यकद्रव्यत्यागो यजिवाच्यः, सङ्कल्पितस्वीकरणपूर्वकपरस्वत्वापत्तिस्वस्वत्वध्वंसफलकद्रव्यत्यागो ददातिपदवाच्यः, देवतोद्देश्यकप्रक्षेपफलको द्रव्यत्यागो जुहोतिपदवाच्य इति भेदः ।

न च देवतायै दानस्थले यजतीतिप्रयोगापत्तिरिति वाच्यम् । देवताया असम्प्रदानत्वेन तत्र ददातेर्लाक्षणिकत्वात् ।

एवं चास्तिभवतिविद्यत इत्यादेः फलमात्रप्रतीतिरुपपद्यते । करोतेश्चोत्पत्तिरूपफलवाचित्वं तदनुकूलव्यापारो यत्नरूपः प्रत्ययवाच्यः । एवं च न करोतियतत्योः समानार्थकत्वं, न वा यततेः सकर्मकत्वापत्तिरनुप्रयोगश्च । एवं जानातीत्यत्र विजातीयविषयता, इच्छत्यादावपि विजातीयविषयता, नश्यतीत्यत्र दर्शनाभावरूपफलमेव वाच्यम् । अतः सर्वधातूनां फल एव शक्तिरित्याहुः ॥

अन्ये तु व्यापार एव धात्वर्थः । न चोक्तदोषः । तत्तद्धातुसमभिव्याहृताद्वितीयाया एव संयोगादिरूपफलविशेषबोधकत्वाङ्गीकारादित्याहुः ॥

केचित्तु पचतीत्यादौ फलजनकतावच्छेदकतया व्यापारसमुदायनिष्ठोऽन्तिमव्यापारनिष्ठो वा वैजात्यमखण्डोपाधिर्वा सिद्धः पच्याद्यर्थः । एवं च धातूपात्तव्यापाराश्रयस्य कर्तृतया तादृशव्यापारविवक्षायां चैत्रः पचति काष्ठं पचतीत्यादिप्रयोगः । एवं करोतेर्व्यापारवाचित्वम् ।

न च यत्नजन्यत्वाजन्यत्वप्रतिसन्धानात्पटाङ्कुरयोः कृताकृतव्यवहारेण रोगेण स्पन्दमानेपि चैत्रे स्पन्दं करोतीत्यप्रयोगेण च करोतेर्यत्नवाचित्वमिति वाच्यम् । करोतेर्यत्नार्थकत्वे तस्याकर्मकत्वेन करोतेरकर्मकत्वापत्तेः, फलसमानाधिकरणव्यापारवाचित्वात् । उत्पत्तिरू-

पफलव्यधिकरणव्यापारवाचित्वेन ज्ञानादाविवान्यकर्मकत्वे तु यततेर-पि सकर्मकत्वापत्तिः। एधाञ्चक्र इत्यादिवद्यततेरनुप्रयोगापत्तिश्च। अतः करोतेर्व्यापारसामान्यवाचित्वमिति वदन्ति॥

अन्ये तु करोतेर्यत्नवाचित्वम्। न चोक्तदोषः। विवक्षाविवक्षाभ्यां सकर्मकाकर्मकधात्वोः पच्यास्योरपि पचति मासमास्यत इत्यादावति प्रसङ्गेन नोक्तं सकर्मकत्वम्। किं त्वविवक्षाविरहविशिष्टकर्माकाङ्क्षधातुत्वम्। तेन सकर्मके विशेषणाभावेनाकर्मकत्वस्याकर्मकत्वविवक्षाऽसत्त्वेन सकर्मकत्वस्य चाक्षतिः। आकाङ्क्षायाः शब्दवैचित्र्यकृतत्वादेकस्य धातोरर्थभेदेन सकर्मकत्वाकर्मकत्वे। एवं पर्यायाणामपि तदव्याहतम्। एवमविवक्षाविरहविशिष्टकर्मद्वयाकाङ्क्षधातुत्वं, द्विकर्मकत्वम्। तस्यापि एककर्मविवक्षणेन निशां निनायेत्यादिप्रयोगे न क्षतिः। अतः प्रयत्न एव करोत्यर्थ इत्याहुः।

यत्तु जानातिनश्यतीत्यादौ व्यापार एव प्रत्ययार्थः, तस्य च धात्वर्थेऽभेदेनान्वयः, तेन ज्ञानाभिन्नो व्यापारो नाशाभिन्नो व्यापार इत्याह। तत्प्रकृतिप्रत्ययार्थयोरभेदान्वयस्याव्युत्पन्नत्वेन मूर्खदाम्भिकलिखितत्वेनोपेक्षणीयम्॥

इति धात्वर्थवादः॥

एवमाख्यातस्य व्यापाररूपभावनायां शक्तिः। ननु धातोरेव व्यापारवाचितया धात्वर्थातिरिक्तभावनायां मानाभावः। न चास्तिभवत्यादिधातुतः फलस्यैव प्रतीतेर्व्यापाराऽप्रतीतेश्च तत्सामान्येन पच्यादीनामपि फलएव शक्तिः, न व्यापारइति वाच्यम्। तत्रापि—

'अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना'

इत्यादिवैयाकरणोक्तरीत्या कपालावस्थो घट आत्मानं भावयतीति वार्त्तिकोक्तरीत्या च तद्वाचित्वात्। नापि फलमात्रे तस्य शक्तिः सम्भवति, व्यापारोपरमे पाको विद्यते इति प्रतीतेर्ग्रामो गमनवानिति प्रयोगस्य चापत्तेः। घञादिसमभिव्याहारस्य व्यापारप्रत्यायकत्वकल्पने फलप्रत्ययप्रतिबन्धकल्पेन वा गौरवम्। पच्यर्थो विद्यत इति प्रयोगापत्तिश्च। घञादेर्व्यापारवाचित्वकल्पना तु सर्वभावप्रत्ययानां धात्वर्थातिरिक्तवाच्याभावनियमेन निरस्ता। अतो न फलमात्रं धात्वर्थः। नापि व्यापारमात्रं, त्यजिगम्योः पर्यायतापत्तेः। अतः फलव्यापारौ धात्वर्थः। पच्यादिधातोर्विक्लित्त्यादिफलेऽनुकूलव्यापारे च प्रत्येकं शक्तिर्न विशिष्टे व्यापारस्यैकदेशत्वापत्त्या कारकानन्वयापत्तेः। व्यापा

रश्चात्मनिष्ठः प्रयत्नः फूत्कारादिशरीरगता चेष्टा च । अनुकूलत्वस्य संसर्गमर्यादालभ्यत्वान्न तत्र शक्तिः । यावत्सु च व्यापारेषु पचतीति प्रयोगस्तावत्सु प्रत्येकं शक्तिः, शक्यतावच्छेदकं च तावदन्यतमत्वम् । फलानुकूलत्वं तत्त्वं वा ।

एतेन प्रत्यत्नस्यान्यथासिद्धत्वेनाजनकत्वात् प्रयोजकव्यापारस्य तत्त्वे व्यवहितकृष्यादीनामपि सङ्ग्रहापत्तिरिति परास्तम् ।

न च धातूपात्तव्यापाराश्रयत्वस्य कर्तृतया सर्वेषां कारकाणां कर्तृत्वापत्त्या तृतीयाद्यापत्तिरिति वाच्यम् । विवक्षाया एव नियामकत्वात् । अत एव तत्तत्कारकव्यापारस्य पच्यर्थत्वविवक्षायां काष्ठं पचति स्थाली पचतीत्यादिप्रयोगोपपत्तिः ।

न चैवं प्रत्ययवैयर्थ्यं, प्रकृत्युपात्तफलव्यापारान्यतराश्रयस्याख्यातत्वेन तित्वादिना वा एकवचनत्वादिना चैकत्वादिसंख्याया लट्त्वादिना वर्त्तमानत्वादेस्तदर्थत्वात् तत्रापि लाघवेनाश्रयत्वस्यैव शक्यतावच्छेदकत्वम् । यत्ननिरूपकत्वादीनां संसर्गत्वात् । अत एव फलव्यापाराश्रयस्य तिङर्थत्वादनभिहिताधिकारे कर्मणि द्वितीयेत्यादिशास्त्रबोधिततृतीयाद्वितीयान्तत्वं कर्तृकर्मणोर्युज्यते । अन्यथा तिङां कर्तृकर्मानभिधायकत्वेन सर्वदा द्वितीयातृतीयाद्युत्पत्तिप्रसङ्गेन देवदत्तः पचतीत्यादिनामबोधकत्वप्रसङ्गः । तत्रापि धात्वर्थव्यापारस्य मुख्यविशेष्यत्वं, सर्वकारकाणां फलस्य वर्त्तमानत्वादिकालस्य च व्यापारविशेषणत्वम । एकत्वादिसङ्ख्यायाश्च कर्तृकर्मणोः, कर्मणश्च फले । एवं च कर्त्राख्याते तण्डुलनिष्ठविक्लित्तिजनक एकाश्रयको व्यापार इति, कर्माख्याते चैकाश्रयकफलजनको व्यापार इति बोधः । प्रथमान्तपदोपस्थाप्यस्याख्यातोपस्थाप्यकर्तृकर्मभ्याममभेदेनान्वयः, स्थीयतइत्यादौ भावाख्याते सङ्ख्यानन्वितैव धात्वर्थान्विता वा । अनुशासनाच्च द्विवचनादीनामसाधुत्वम् ।

न च प्रत्ययार्थाश्रयस्य धात्वर्थव्यापारविशेषणत्वे प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यमिति प्रत्ययार्थप्राधान्यबोधकस्मृतिविरोधः । तस्या भावप्रधानमाख्यातमिति विशेषस्मृत्या बाधात् । किं च नात्र प्रत्ययार्थोद्देशेन प्राधान्यविधिः । लिङ्गसङ्ख्ययोर्व्यभिचारेण विधेयस्योद्देश्याव्यापकत्वात् । नापि प्रधानोद्देशेन प्रत्ययार्थत्वविधिः । नामसु प्रातिपदिकार्थप्राधान्येन व्यभिचारात् । अत एव तस्याः प्रमाणान्तरसिद्धप्राधान्यानुवादकत्वमिति वैयाकरणाः ॥

अत्र गौतमीयाः । आख्यातस्य यत्नो वाच्यः । यत्नार्थककरोतिना विवरणात् । किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेः । कृञश्च यत्नाभिधायकत्वम् । पटाङ्कुरयोः कृत्यकृतिव्यवहारात् । तृजन्तकर्तृपदस्य कृत्याश्रयवाचकत्वम् । अन्यथा क्रियाश्रयवाचित्वापत्त्या कारकमात्रं कर्तृपदार्थः स्यात् । अतः—

कृताकृतविभागेन कृतरूपव्यवस्थया ।
यत्न एवाकृतिः पूर्वा परस्मिन् सैव भावना ॥

इति यत्न एवाख्यातार्थः । रथो गच्छतीत्यत्रानुकूलव्यापारे जानाति इच्छति यतते करोतीत्यादावाश्रयत्वेऽपक्षीयते नश्यति भविष्यतीत्यादौ प्रतियोगित्वे सर्वत्रानुकूलव्यापारे वा निरूढा लक्षणा । अत्र शक्यतावच्छेदकं च जीवनयोनिनिवृत्तिजनकयत्नभिन्नयत्नत्वम् । यतते करोतीत्यव्यवहारात् । शक्ततावच्छेदकं च लत्वं तित्वादिकं वा । तस्य प्रत्ययार्थत्वाद्धात्वर्थनिरूपितं विशेष्यत्वं, प्रत्ययार्थप्राधान्यबोधकस्मृतेः । आख्याताभिहितसङ्ख्या च आख्यातार्थविशेष्ये आख्याततात्पर्यविषयविशेष्ये वाऽन्वेति । स च प्रथमान्तपदोपस्थाप्यः । चैत्रः पचतीति कर्त्राख्याते तण्डुलः पच्यते इति कर्माख्याते पच्यते ओदनः स्वयमेवेति कर्तृकर्माख्याते प्रथमान्तविशेष्यकशाब्दबोधानुभवात् । आख्यातार्थयत्नस्य समवायेन चैत्रे स्वजन्यव्यापारजन्यफलवत्त्वसम्बन्धेन प्रथमान्तपदोपस्थाप्ये तण्डुलादौ वा प्रकारत्वात् ।

एतेनानभिहितकारकत्वानुपपत्तिकृता तण्डुलं पच्यते इत्यादिप्रयोगापत्तिरपास्ता। कर्तृकर्मनिष्ठसंख्यानभिधानस्यैवानभिहिताधिकारार्थत्वात् ।

न च व्यापार एवाख्यातार्थ इति वाच्यम् । व्यापारत्वस्योपाधितया यत्नत्वजातेर्वाच्यतावच्छेदकत्वे लाघवात् । अत एव न कर्त्ता वाच्यः । आक्षेपलभ्यत्वाच्च । तदुक्तम् ।

आक्षेप्यलभ्ये सङ्ख्येये नाभिधानस्य कल्पना ।
सङ्ख्येयमात्रलाभेपि साकाङ्क्षेण व्यवस्थितिः ॥ इति ।

अतो यत्न एवाख्यातार्थः । अयं च शाब्दबोधप्रकारः । प्रथमान्तपदोपस्थाप्यस्यैव मुख्यविशेष्यत्वम् । कर्त्राख्याते फलं व्यापारे विशेषणं, कर्माख्यातेपि व्यापारः फले, जन्यत्वादि च संसर्गः । यत्नश्च प्रत्ययार्थः । तेन तण्डुलनिष्ठविक्लित्तिजनकयत्नवान् देवदत्तः इति कर्त्राख्याते, देवदत्तनिष्ठकृतिजन्यव्यापारजन्यफलशाली तण्डुल इति कर्माख्याते बोधः । फलमात्मनेपदार्थः । निष्ठत्वं कृतिश्च द्वितीयातृतीयार्थः, संसर्गो वा, तेन स्मृतिरप्युपपन्नेत्याहुः ॥

रत्नकोशकारस्तु व्यापारो धात्वर्थः उत्पादनमाख्यातार्थः । तेन रथो गच्छति जानाति नश्यतीत्यादौ न लक्षणा । उत्पादयतीत्यत्र प्रत्ययोऽनुवादकः । अनुत्पादवाचिधातूत्तरप्रत्ययस्य चोत्पादवाचित्वमित्याह ॥

सिद्धान्तस्तु कृञो न यत्नार्थकत्वम् । बीजेनाङ्कुरः कृतः स्वर्गादिना सुखं कृतमिति यत्नं विनापि व्यवहारात् । कर्तृपदस्य कर्मादिपदवद्रूढत्वात् । रूढिश्च कृत्याश्रये व्यापाराश्रये वा । अन्यथा प्रकृतिप्रत्ययार्थयोः कृतिकृत्याश्रययोरनन्वयापत्तिः । अतः कृञा विवरणेनाख्यातस्य यत्नार्थत्वं गर्भस्रावगलितम् । किं च यतते करोतीत्यत्र प्रकृतिप्रत्ययार्थयोरनन्वयापत्तिः पौनरुक्त्यं च । पक्ष्यति द्वौ त्रय इत्यादाविव प्रत्ययस्यानुवादकत्वं वा । अयत्नार्थकधातूत्तराख्यातप्रत्ययानां यत्नार्थत्वं वा । रथो गच्छतीत्यादावचेतने जानाति इच्छतीत्यादौ कृत्यजन्ये चाख्यातप्रयोगस्य गौणत्वम् । अनुकूलत्वमात्रे वा लाक्षणिकत्वं ब्राह्मणे श्रोत्रियपदस्येव कल्पयितुं युक्तम् । एवं मध्यमोत्तमपुरुषयोर्युष्मदस्मदोश्चेतनार्थकतयाऽचेतनार्थेऽनुपपत्तिः । अतः कृञो व्यापारोऽर्थस्तेन विवरणाख्यातप्रत्ययानां तत्रैव शक्तिः एवं सति फलानुकूलव्यापारस्य धात्वर्थत्वेपि न यत्नस्य तदर्थत्वम् । पाके यतते पाकं करोति पाकं भावयतीत्यादिषु पाकात्पृथक्करणेन यत्नभानानुपपत्तेः । अतो विवरणवेलायां भासमानस्य यत्नस्य धातुवाच्यत्वासम्भवात्फलजनकव्यापारस्योक्तरीत्या वा व्यापारस्यैव धातुवाच्यत्वम् । न चान्ते त्यजिगम्योः पर्यायता । तत्तद्धातुसमभिव्याहृतद्वितीयाया एव संयोगादिरूपफलविशेषबोधकत्वाङ्गीकारात । सर्वत्र फलानां द्वितीयाद्यर्थत्वस्याश्रयत्वजन्यत्वादीनां च संसर्गलभ्यत्वस्याङ्गीकारात् ॥

केचित्तु विक्लित्त्यादिफलजनकतावच्छेदकतया व्यापारसमुदायनिष्ठोन्तिमव्यापारनिष्ठो वा वैजात्यमखण्डोपाधिर्वा पच्यर्थः । कर्मत्वकर्तृत्वादिकमपि जातिरूपखण्डोपाधिरूपं वा । अत एव तस्य व्यासज्य वृत्तित्वं सङ्गच्छते । एवं देवतात्वमपि । अतः प्रयोज्यव्यापारवाचिषु भवतिविक्लिद्यतीत्यादिषु प्रयोज्यव्यापारजन्यत्वस्य प्रयोजकव्यापारवाचिषु पच्यादिषु विक्लित्त्यनुकूलत्वादेराक्षेपेण भानाद्यत्नभिन्नफलानुकूलव्यापाराणां तत्तद्वृत्तिजातेरखण्डोपाधेर्वा धातुवाच्यत्वम । यत्नस्य तूक्तरीत्या धात्वर्थत्वासम्भवात् पारिशेष्यात्प्रत्ययवाच्यत्वम् । तत्रापि न यत्नत्वेन वाच्यता, किं तु अनुकूलव्यापारवाचिकरोतिना विवरणाद्रथो गच्छतीत्यादिसाधारण्यायानुकूलव्यापारत्वेन वाच्यता । करोतेश्च भवत्यर्थकर्तृकर्मकत्वाण्णिजन्तभवतिसमानर्थकत्वम् । तादृश-

करोतिना विवरणेनान्योत्पादानुकूलत्वेन यत्न एव शक्तिः सैव भावनेति ॥

केचित्तु लघुभूतशक्यतावच्छेदके सम्भवति तद्गौरवस्यान्याय्यत्वा यत्नार्थककृञा विवरणाच्च यत्नत्वमेव वाच्यतावच्छेदकम् ।

नन्वेवं करोतेर्यततिसमानार्थकत्वे फलसमानाधिकरणव्यापारवाचितयाऽकर्मकत्वापत्तिः । उत्पत्तिरूपफलव्यधिकरणव्यापारवाचित्वेन ज्ञानादिवत्सकर्मकत्वे तु यततेरपि सकर्मकत्वापत्तिः । एधाञ्चक्रे इत्यादिवदनुप्रयोगापत्तिश्च ।

न च कृञ् चानुप्रयुज्यते लिटीति कृधातोरेवानुप्रयोगविधानान्न तदापत्तिरिति वाच्यम् । अनेन प्रत्याहारान्तःपातिव्यापारसामान्यवाचिधातूनामनुप्रयोगविधानात् ।

अत एव प्रत्याहारान्तः प्रविष्टसंपदो नानुप्रयोग इति चेत् । विवक्षाविवक्षाभ्यां धात्वोः सकर्मकाकर्मकत्वे पच्यास्योरपि पचति मासमास्यत इत्यादावतिप्रसङ्गान्नोक्तं सकर्मकत्वम् । किं त्वविवक्षाविरहविशिष्टकर्माकाङ्क्षधातुत्वं, तेन सकर्मके विशेषणाभावेनाकर्मकत्वस्य विवक्षासत्त्वेन सकर्मकत्वस्य चाक्षतिः । आकाङ्क्षायाः शब्दवैचित्र्यकृतत्वादेकस्य धातोरर्थभेदेन सकर्मकत्वाकर्मकत्ववत्पर्यायाणामपि तदव्याहतम् । एवमविवक्षाविरहविशिष्टकर्मद्वयाकाङ्क्षधातुत्वं द्विकर्मकत्वमिति द्विकर्मकस्याप्येककर्मत्वे निनायेत्यादौ न क्षतिः । अनुप्रयोगस्तु शब्दसामर्थ्यकृतव्यापारसामान्यवाचकव्यादिधातोरिवोपपादनीय इत्यस्तु प्रसक्तानुप्रसक्तम् । एवं च यततिपर्यायत्वेपि कृञः सकर्मकत्वोपपत्त्या तदर्थयगादिविध्युपपत्तेः क्रियते घटः स्वयमेवेत्यादिप्रयोगोपपत्तिः । अतो यत्नत्वमेव वाच्यतावच्छेदकमित्याहुः ।

जनाति इच्छति यतते करोति भवति नश्यतीत्यादावाश्रयत्वप्रतियोगित्वादौ निरूढलक्षणा । न चाश्रयत्वं संसर्ग इति वाच्यम् । नामार्थधात्वर्थयोरभेदातिरिक्तसम्बन्धेनान्वयस्याव्युत्पन्नत्वात् । अन्यथा तण्डुलः पचति चैत्रः पच्यते तण्डुल इत्यादावन्वयबोधापत्तेः शक्तावच्छेदकं लत्वादिकं स्थानिवृत्ति । तिबादिप्रत्ययादर्थप्रत्ययस्त्वादेशिस्मरणादिति केचित् ॥

अन्ये तु स्थानिभूतलादिकमजानतोऽप्यर्थप्रत्ययाच्छबादीनां साधुत्वार्थं कल्पितत्वेन प्रतिव्याकरणं भिन्नत्वेन च तत्र शक्तिग्रहासम्भवाद् आदेशवृत्तितिप्त्वादिकमेव शक्तावच्छेदकं, गच्छेत्यादौ शबादिविकरणवृत्ति तदित्याहुः ॥

तत्सिद्धं व्यापारत्वेन यत्नत्वेन वा प्रत्ययवाच्यो यत्नो भावनेति ।

स च नित्यं सकर्मकः । नित्यसकर्मकेन कृञा णिजन्तभवतिना च विवरणात् । एवं च स्वास्थ्यकामः स्वपेदित्याद्यकर्मकधातूनामपि स्वास्थ्यादिभाव्यकत्वोपपत्तिः । तस्य भावनायां कर्मत्वेनान्वयात् । तस्याश्च मुख्यविशेष्यत्वेनैवान्वयः । न च चैत्रः पचतीत्यादौ तस्याः प्रथमान्तपदोपस्थाप्ये चैत्रादौ प्रकारतयान्वयानुभवाद् न मुख्यविशेष्यत्वं सम्भवतीति वाच्यम् स्थाल्यां पचति काष्ठैः पचति खादिरं वीर्यकामस्य यूपं कुर्यादित्यादौ प्रथमान्तपदाभावेपि शाब्दबोधानुभवेन भावनाप्रकारकशाब्दबोधे प्रथामान्तपदोपस्थितेर्हेतुत्वस्य वक्तुमशक्यत्वात् । न च तत्र प्रथमान्तकर्तृवाचिपदाध्याहारः । प्रत्ययवाच्यसंख्यायाः समानपदोपस्थाप्यकर्त्रन्वयसम्भवेनाध्याहारापेक्षया लक्षणाया लघुत्वेन चाख्याते कर्तृलक्षणाया एव युक्तत्वात् ।

एतेनाख्यातार्थविशेष्ये आख्याततात्पर्यविषयविशेष्ये वा प्रथमान्तपदोपस्थाप्ये वा संख्यान्वयः । गगनेन स्थीयतइत्यत्र प्रथमान्तपदाभावात्संख्याऽनन्वितैवेत्यपास्तम् । काष्ठैः पचतीत्यत्राप्यनन्वयापत्तेः पचतीत्यत्र कृतिविशेष्यकबोधस्वीकारेऽननुगमाच्च । आख्यातार्थविशेष्यत्वादिना हेतुत्वस्याख्यातजन्योपस्थितेर्हेतुत्वापेक्षया गुरुत्वाच्च ।

एवं च यत्र प्रथमान्तपदोपस्थाप्योऽस्ति तत्राप्याख्यातार्थकर्त्रर्यभेदेन तस्यान्वयो, न तु भावनाविशेष्यत्वम्,

न च कारकाणां भावनायां प्रकारत्वेनान्वयो भावनायाश्च प्रथमान्तपदोपस्थाप्यइत्यनेकव्युत्पत्तिकल्पनापत्तिः ।

एतेन कारकाणां धात्वर्थे तस्य वर्त्तमानत्वादीनां च भावनायां तस्याश्च प्रथमान्तपदोपस्थाप्ये प्रकारत्वेनान्वय इति परास्तम् । किं च पश्य मृगो धावतीत्यत्र दर्शनभावनायां धावनभावनाया एव कर्मत्वेनान्वयः मृगस्य प्रथमान्तत्वेन तदनुपपत्तेः । अध्याहारे वाक्यभेदात् । सा चान्याविशेषणीभूता न सम्भवतीत्यतोपि मुख्यविशेष्यत्वम् ।

न च मृगनिष्ठयत्नस्यानुमेयत्वेन साक्षाद्भावनाकर्मत्वं न सम्भवतीति वाच्यम् । ज्ञानकर्मत्वसम्भवात् । भावनाश्रयत्वस्य तत्सम्भवाच्च । अत एकवाक्यत्वस्यानुपपत्त्यापि विशेष्यत्वम् ।

न चैवं पाकभावना जायतइत्यस्मिन्नर्थे पचति भवतीति प्रयोगापत्तिरिष्टापत्तेः । किं च भावप्रधानमाख्यातमिति स्मृतेर्भावनाप्राधान्यबोधिकायाः सार्थकत्वमन्यथानर्थक्यापात्तिः ।

न च नेयं भावना प्राधान्यबोधिका, किं तु धात्वर्थः केवलः शुद्धो भावनेति वैयाकरणपरिभाषितधात्वर्थप्राधान्यबोधिकेति वाच्यम् । लि

कृत्प्रत्ययवाच्याख्यातशब्दसामानाधिकरण्यानुपपत्तेः।

न च सर्वमाख्यातजं नामेति स्मृतेराख्यातपदेन धातुरेवोच्यतइति वाच्यम्। पाक इत्यादावाख्यातपदाप्रयोगात्। नामनिर्वचने तु आख्यातपदन्तत्प्रकृतौ लाक्षणिकम्। तेनाख्यातशब्दस्य धातुवाचित्वाभावात्प्रत्ययवाच्याख्यातपदसामानाधिकरण्यानुपपत्तिः। अतोऽत्र षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनमितिवदनेकाख्यातार्थोद्देशेन भावनाप्राधान्यविधिः। तेनाख्यातवाच्यलक्ष्यकालसंख्याभावनाकर्तृकर्मसु भावनाप्राधान्यं विधत्ते। अन्यथा धात्वर्थनिरूपितप्राधान्यविधौ प्रकृतिप्रत्ययाविति स्मृतिप्राप्तत्वेनानुवादे आनर्थक्यापत्तिः। वैयाकरणापरिभाषणं तु नपुंसके भावे क्त इत्यादौ धात्वर्थग्रहणमेव न त्वतलाद्यर्थग्रहणमित्येतदर्थं, न तु भावपदशक्तिग्राहकम्। एवं सत्वप्रधानानि नामानीत्यत्रापि पावको लावक इत्याद्यनेकार्थनामसु लिङ्गसंख्यान्वययोगिनः प्राधान्यबोधनम्। घटादिपदेऽपि जातिव्यक्त्योरुभयोरपि प्राधान्यम्। अत एव चाकृत्यधिकरणे जातिव्यक्त्योर्बोधद्वयमित्याहुः।

अतोऽनेकार्थप्रतिपादकेष्वाख्यातेषु भावनाप्राधान्यनियमो भावप्रधानमाख्यातमित्यनया स्मृत्या क्रियते। सत्त्वप्रधानानि नामानीति स्मृत्याऽनेकार्थप्रतिपादकसुबादिषु क्रियापदं विनान्वयबोधाजननात्। क्रियान्वयं विना कारकत्वव्याघाताच्च। प्रधानभूतक्रियान्वयित्वेन कर्तृत्वादिकारकप्राधान्यनियमः। कारकाणामेव प्राधान्यं संख्यादीनां प्रातिपदिकार्थस्यापि प्रत्ययार्थप्राधान्यबोधकस्मृत्या कारकान्वयः। संख्यादीनां तु समानाभिधानश्रुत्या तत्परिच्छेदद्वारा कारके एवान्वय इति चतुर्थे स्फुटम्। अतः सर्वकारकाणां भावनान्वयात् सिद्धं भावनाया मुख्यविशेष्यत्वम्॥

कारकाणां भावनान्वयश्च साक्षादसम्भवाद्धात्वर्थपरिच्छेदद्वारकः, तत्राभिहितकर्तृकर्मवाचिनी प्रथमेति मते प्रथमार्थकर्तृत्वादेर्भावनान्वयः। प्रातिपदिकार्थे प्रथमेति मते कर्तृत्वादिसंसर्गेण चैत्रादेरेव तत्रान्वय इति केचित्।

वस्तुतो लक्षणैव युक्ता, निपातातिरिक्तनामार्थाख्यातार्थयोर्भेदान्वयासम्भवादिति।

तत्र चाधिकारित्वमपि संसर्ग इति केचित्।

एवं सम्बोधनविभक्तेरपि प्रथमासमानार्थकत्वात्तदर्थोऽपि भावनान्वयी। एवं क्त्वाणमुल्कृत्वसुज्जन्त्रजाद्यर्थानां कालावृत्त्यभावादीनामपि भावनायामन्वयः। एवं निमित्तस्य कारकत्वाभावेऽप्यनुष्ठाप-

कर्तृत्वसत्त्वाद्भावनान्वयः । षष्ठ्यास्तु कारकविभक्तित्वाभावात्तदर्थस्यो- पपदार्थेनान्वय इति सम्प्रदायः ।

अन्ये तु साक्षात्परम्परासम्बन्धेन भावनायामेव प्राधान्येनान्वयो युक्त इत्यप्याहुः ॥

एवं वर्त्तमानत्वादिकमपि । विध्यर्थोऽपि प्रवर्त्तना जनकतासम्बन्धेन भावनान्वयी, संख्यायास्तु भावनाक्षिप्ताखण्डोपाधिरूपकर्तृत्वकर्मत्वा- न्वयो, न तु तदाक्षिप्ततदाश्रयान्वयः । एवं च यजेतेत्यादावाश्रयभेदेऽपि एकवचनोपपत्तिः । वसानावित्यादौ प्रमाणान्तरानुरोधाल्लक्षिताश्रये त- दन्वयः । तत्र शब्विकरणस्थले कर्तृत्वान्वयो यगादिविकरणस्थले कर्म- त्वान्वय इति व्यवस्थेति सम्प्रदायः ॥

केचित्तु स्थीयते सुप्यतामित्यादौ भावनायामेव संख्यान्वयः । प्र- धानान्वयस्य युक्तत्वात् । न चैवं कृतौ संख्यान्वये तस्याः सत्त्वतापत्तिः । इष्टत्वात् । तत्रापि स्मृतिबोधितप्राधान्याक्षतेः । न हीयं स्मृतिरसत्त्व- भूतस्य प्राधान्यबोधिका, संख्यायाः प्राधान्यप्रसङ्गात् । न च भावना- द्वये द्विवचनापत्तिः । एकवचनस्यैव साधुत्वात् । अतो युक्तः परंपरया भावनान्वयः । गगनेन स्थीयत इत्यादावाख्यातलक्ष्ये आश्रयत्वे संख्या- न्वयोऽनन्वितैव वा संख्येत्यप्याहुः ॥

कर्तृत्वकर्मत्वयोरपि भावनायामन्वयः, तत्र कर्त्राख्याते आख्यातोप- लक्षितकर्तृत्वस्य सामानाधिकरण्येन, कर्माख्याते तद्वाच्यप्रयत्नप्रयोज्य- तया लक्षितफलस्य सामानाधिकरण्येनान्वयः । तदाक्षिप्ताश्रयाभेदेन प्रथमान्तोपस्थाप्यान्वयः ।

एवञ्च तण्डुलाभिन्नाश्रितत्वकर्मत्वसमानाधिकरणफलप्रयोजको व्या- पार इति कर्माख्याते, कर्त्राख्याते देवदत्तनिष्ठकर्तृत्वसमानाधिकरणः पाकानुकूलो यत्न इति बोधः ।

कर्तृत्वं च तृतीयार्थः ।

एवमोदनः पच्यते स्वयमेवेति कर्तृकर्माख्याते ओदननिष्ठयोः क- र्तृत्वकर्मत्वयोर्विवक्षणादोदननिष्ठकर्मत्वसमानाधिकरणफलप्रयोजकौ- दननिष्ठकर्तृत्वसमानाधिकरणपाकानुकूलभावनेति बोधः । तत्र कृतेर्बा- धाद्व्यापारे लक्षणा ।

न चैवमोदनः स्वं पचतीति प्रयोगापत्तिः । 'कर्मवत्कर्मणा तुल्यक्रिय' इति यगादिविधानेन तादृशस्यासाधुत्वात् । अत एव तत्र चैत्रे न प्रथ- मा न तृतीया, किं तु षष्ठीति सम्प्रदायः ।

तस्माद्भावप्रधानमाख्यातमिति स्मृत्यैव सर्वकारककर्तृत्वादिनिरू-

पितं च प्राधान्यं भावनाया इति सिद्धम् । किं चानयैव स्मृत्या प्राधान्ये भावनाया बोधिते प्रधानस्य गुणाक्षेपकत्वनियमेन भावनाया एव कर्तृत्वकर्मत्वाक्षेपकत्वं युक्तं न वैपरीत्यम् । अनन्यलभ्यस्य शब्दार्थत्वाच्च नाक्षेपलभ्ये कर्तृत्वादौ शक्तिः । किं त्वाक्षेपककृतावेव । अत एव यत्र नाक्षेपकत्वं, तत्र नानैव शक्तिः यथा संख्यादौ । न चैवं पक्ता पचमानः पक इत्यादिकर्तृकर्मकृतामपि भावनावाचित्वं लाघवादिति वाच्यम् । नामार्थयोर्भेदान्वयानुपपत्तेरतस्तत्र कर्त्तरि कृदित्याद्यनुशासनिकी आश्रये शक्तिः । न चाक्षेपेण तद्बोधो लक्षणया वा, शक्त्या क चिदप्रयोगे शक्यज्ञानेन लक्षणाया असिद्धेः । अतस्तत्र नामत्वेन सत्त्वप्राधान्यबोधकस्मृत्या लिङ्गसंख्यान्वययोग्यस्य प्रधानभूतस्य कृत्याक्षेपकत्वबोधनम् । न च कृतौ लक्षणा कर्तरि शक्तिः । लाघवस्यापि प्राधान्यविरोधित्वेनाप्रयोजकत्वात् । तत्सिद्धं कर्तृकर्मकृतां कृतिबोधशक्तिरिति ॥

भावकृतां तु पाको याग इत्यादौ जायते क्रियत इत्यादिकृतिवाचिपदाध्याहारेण बोधोऽन्यथा धात्वर्थमात्रप्रतीतेस्तत्र कारकान्वयानुपपत्तेः । अतस्तत्र धात्वर्थमात्रे शक्तिः । कृतेस्त्वाक्षेप एवेति सिद्धम् ।

अतो धात्वर्थातिरिक्ता कृतिरूपा भावना ऽऽख्यातार्थः । आश्रयस्त्वाक्षेपलभ्यः । आक्षेपलभ्यत्वादेव वैयाकरणोक्तं कर्तृकर्मवाचित्वमपास्तम् ।

लः कर्मणि च भावे चाकर्मकेभ्य इति स्मृतिरपि ल इति षष्ठ्यन्तमाश्रित्य द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यनुशासनैकवाक्यतया लादेशतिबादीनां कर्तृकर्मगतैकत्वादिविवक्षायामेकवचनादिविधानपरा व्याख्येया । अनभिहिताधिकारस्मृतिरपि कर्मादिगतसंख्यानभिधाने द्वितीयातृतीयादिविधानपरा । कर्त्तरि कृदिति स्मृतिस्तु नामार्थयोर्भेदान्वयानुपपत्तिभयेन न कृत्यभिधानपरा । किं तु कर्त्रभिधानपरैवेति दिक् ।

यागाद्यसत्त्वमचिरस्थितिकं च यस्याः
सम्बन्धतः फलभुवः फलदायि जातम् ।
दध्यादिसत्त्वमपि यत्करणत्वतोऽतः
सा भावना रघुपतेः पदयोर्मम स्यात् ॥

इति गागाभट्टकृतभाट्टचिन्तामणौ आख्यातवादः समाप्तः ॥

लटो वर्त्तमानत्वे शक्तिः । वर्त्तमाने लडित्यनुशासनात् । तच्च वर्त्तमानत्वं लट्प्रयोगाधिकरणकालसम्बन्धित्वं लट्शब्दप्रयोगाधिकरणका-

लोपाधिवृत्तित्वं वा । अतीतभविष्यत्कालातिरिक्तकालसम्बन्धित्वं वा एवं च तत्क्रियाप्रयोगप्रयोज्यशाब्दाधिकरणतत्तत्काल एव वर्त्तमानकालः । तत्तत्कालकृतिषु वर्त्तमानत्वव्यवहारः । अननुगतस्यापि शब्दैक्यमात्रेणैवानुगम इति यथा तदादिसर्वनामार्थो ऽननुगत एव, बुद्धिस्थत्वेनानुगमे बुद्धेरप्यननुगमस्तद्बुद्धेश्चाननुगम इति । एवं यत्र न प्रयोगाधिकरणकालस्तत्रापि लिप्यादिजन्यप्रयोगज्ञानसत्त्वात्तत्कालज्ञानमव्याहतम् ।

परे तु वर्त्तमानत्वादिकं क्व चिदुत्पत्तौ क्व चिदेकदेशे क्व चित्कृतौ क्व चिदाश्रयत्वे क्व चिदभावे ऽन्वेति । तेन आदिपर्वणि युधिष्ठिरोऽस्ति इह कुमाराः क्रीडन्ति पचति जनाति क्वास्ति देवदत्त इत्यादिप्रयोगः । ईश्वरो जानातीत्यादौ वर्त्तमानत्वमनन्वयि, देवतैः रथीयतइति प्रत्ययार्थैकत्ववत् आहार्यशाब्दबोधो वा । संग्रहश्च ।

अप्रवृत्तौ परश्चैव वृत्तौ विरत एव च ।
नित्यः प्रवृत्तः सामीप्ये वर्त्तमानश्चतुर्विधः ॥

इति । अस्यार्थः–लडर्थो वर्त्तमानत्वं प्रवृत्त्यभावेऽन्वेति । यथा मांसं न भुङ्क्ते, मांसभोजने निवृत्त इति । इह कुमाराः क्रीडन्तीत्यत्र क्रियाया धारावाहिकत्वे, तिष्ठन्ति पर्वता इत्यादौ क्रियाया नित्यनिवृत्तत्वे । तच्च बहुकालव्यापित्वात् । समीप्ये तु कदा त्वमागमिष्यासि गमिष्यासि वेति पृष्टे एष आगच्छामि गच्छामीति वोत्तरे बोध्यम् । अत्र सर्वत्र शक्तिर्लक्षणा वा । तथा मन्यतेरुत्तमपुरुषैकवचनस्य प्रहासे शक्तिः । अतादृशत्वेन जानतस्तादृशत्वकथनं प्रहासः । तथा पुरापदयोगे भविष्यदर्थे लटः। प्रहासादिकं त्वअनागम्यमित्यालङ्कारिकाः ॥

अनद्यतनभूतपरोक्षत्वं लिडर्थः । अनद्यतने भूते इत्यनुवृत्तौ परोक्षे लिडिति पाणिनीयसूत्रात् । वर्त्तमानाहोरात्रवृत्तिप्रागभावध्वंसान्यतराप्रतियोग्युत्पत्तिकत्वमद्यतनत्वम् । तद्भिन्नत्वमनद्यतनत्वम् । भूतत्व वर्त्तमानध्वंसप्रतियोगित्वम् । साक्षात्करोमीत्येतादृशज्ञानाविषयत्वं परोक्षत्वम् । तच्च क्रियानिष्ठं क्रियाविशिष्टकारकनिष्ठं वा । क्रियायाश्च पिण्डीभूतायास्तादृशप्रतीतिविषयत्वासम्भवेऽप्यवयवशस्तत्सम्भवात् । अत एव पश्य मृगो धावतीत्यत्र धावनस्य धावनाश्रयकारकस्य वा तादृशज्ञानाविषयत्वान्न लिट्प्रयोगः । व्याततेने किरणावलीमिति भूतत्वारोपेणोपपादनीयम् ॥

अनद्यतनभविष्यत्त्वं लुडर्थः । भविष्यतीत्यनुवृत्तौ अनद्यतने लुडितिपाणिनीयसूत्रात् । यथा श्वो भवितेति ॥

भविष्यत्सामान्यं लृटोऽर्थः। यथाद्य श्वो वा घटो भविष्यतीति। एवं च दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयां निर्वपेत् सोमेन यक्ष्यमाण आदधीतेत्यादौ लडादेशशानचः साधारण्येऽपि लृट् शेष चेति सूत्रेण वाक्यसार्थक्याय चाद्यतनभविष्यत्परत्वम् ॥

लिङर्थे लेडिति सूत्रात् विध्यादय आशीश्च लेडर्थः। यथा भवाति पतातीति। अयं तु छन्दोमात्रगोचरः ॥

विध्यादय आशीश्च लोडर्थः। लोट् च, आशिषि लिङ्लोटाविति पाणिनीयसूत्रात्। यथा मा भवतु भवतादिति। तुह्योस्तातङ्ङाशिष्यन्यतरस्यामिति सूत्रेण आशिषि तातङ्विधानात् ॥

अनद्यतनभूतत्वं लङोऽर्थः। अनद्यतने लङिति पाणिनीयसूत्रात्। यथा घटोऽभवत् ॥

विध्यादिकं लिङर्थः। विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङिति सूत्रात्। भृत्यादेर्निकृष्टस्य प्रवर्त्तनं प्रेरणं विधिः। निमन्त्रणमावश्यके श्राद्धादौ नियोगकरणम्। आमन्त्रणं कामचारानुज्ञा। अधीष्टं सत्कारपुरस्सरं प्रवर्तनम्। अत्र तत्त्वेन न शक्तिः। नानाशक्तिकल्पनापत्तेः। किं त्वेतच्चतुष्टयवृत्तिप्रवर्त्तनात्वेन, प्रवर्त्तनात्वं च परनिष्ठप्रवृत्तिजनकज्ञानविषयप्रवर्त्तकधर्मत्वम्। एतेनेष्टसाधनत्वकृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वानां प्रवर्त्तनात्वाभावेन विध्यर्थत्वं वदन्तः परास्ताः।

मण्डनस्तु यागादौ कृतिसाध्यताज्ञानस्य लोकत एव सिद्धेरन्यलभ्यत्वान्न तत्र लिङः शक्तिः। बलवदनिष्टाननुबन्धित्वज्ञानं च द्वेषाभावजनने नान्यथासिद्धत्वान्न प्रवृत्तौ हेतुः। अत एवास्तिककामुकस्य नरकसाधनताज्ञानदशायां प्रवृत्तिर्निराबाधा। अत इष्टसाधनत्वमेव प्रवर्त्तनेत्याह।

कार्यं लिङर्थ इति गुरवः।

इष्टसाधनत्वादीनामाक्षेपतो लाभात्पदार्थान्तरं प्रवर्त्तना, तत्र लिङः शक्तिरिति भट्टाः।

अर्थभावनाभिधानुकूला शक्तिरेव प्रवर्त्तनेति पितृचरणाः।

कार्यकारणभावश्च लिङर्थः। हेतुहेतुमतोर्लिङिति सूत्रात्। यथा यो ब्राह्मणायावगुरेत्तं शतेन यातयादिति ॥

भूतसामान्यं लुङर्थः। भूत इत्यधिकारे लुङिति सूत्रात्। यथा घटोभूदिति ॥

अनिष्पन्नयोः क्रिययोर्हेतुहेतुमद्भावो लृङर्थः। लिङ्निमित्ते लृङ् क्रियातिपत्ताविति सूत्रात्। लिङो निमित्तं हेतुहेतुमद्भावः। यथा सुवृष्टिश्चेदभविष्यत्सुभिक्षमप्यभविष्यत्। यदि घटोऽभविष्यत्तदाद्रक्ष्यदिति।

इति गागाभट्टकृते भाट्टचिन्तामणौ लकारवादः समाप्तः ॥

अथ प्रातिपदिकार्थो निरूप्यते ।

धातुप्रत्ययतदन्ताभिन्नत्वे सति अर्थवच्छब्दत्वं प्रातिपदिकत्वम् । अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रात् । विभक्त्यन्तानां तत्संज्ञावारणाय प्रत्ययान्तेति । एवं च पूर्वनिपातितेषदसमाप्त्यर्थकबहुच्प्रत्यययुक्तबहुपटुशब्दस्य प्रातिपदिकसंज्ञा । तत्र तद्धितान्तत्वाभावेन तत्संज्ञायाः कृत्तद्धितेति सूत्रेणालाभात् । तद्धितयोगमात्रविवक्षायां त्वं पचतकीत्यत्राकच्प्रत्ययथुक्तेपि तदापत्तेः । न चैवं कृत्तद्धितान्तेषु अनर्थकशशशृङ्गादिसमासेषु च प्रातिपदिकत्वं न स्यादिति वाच्यम् । कृत्तद्धितसमासाश्चेति सूत्रेण तत्र संज्ञाविधानात् ॥

अन्ये तु अर्थवत्सूत्रेण वाक्यसमासयोरपि संज्ञाप्राप्तौ कृत्सूत्रेण समासेषु पुनः संज्ञाकरणं वाक्यपरिसंख्यार्थमित्याहुः ॥

तच्च प्रातिपादकं चतुर्धा पूर्वमुक्तं, रूढं यौगिकं योगरूढ यौगिकरूढं चेति । तच्चतुर्विधमपि जातिगुणक्रियायदृच्छाशब्दभेदाच्चतुर्विधमिति महाभाष्यकाराः ।

वस्तुनिर्देशशब्दावधिकाविति चन्द्रालोककारः ।

सर्वेषु द्रव्यवाचकघटादिपदेषु जातिरेव वाच्या, वाच्यतावच्छेदिका वा । इदं चाग्रे स्फुटीकरिष्यते । नीलशुक्लादिपदेषु गुणपदसमानाधिकरणेषु गुणिवाचिसमानाधिकरणेष्वपि गुण एवं वाच्यो न नीलत्वत्वादिजातिर्गुणिनि तदभावात् । नापि गुणी, गौरवात् । लक्षणया सामानाधिकरण्याद्युपपत्तेश्च । वाच्यतावच्छेदको वा गुणः । एवं पाचकादिपदे पाकक्रियैव वाच्या, तस्या एव प्रतीतेः । तस्याश्चैकत्वाद्वाच्यत्वं वाच्यतावच्छेदकत्वं वा । एवं दण्डीत्यादौ दण्डसम्बन्धो वाच्यो वाच्यतावच्छेदको वा पाचकादिपदे पचनस्य विशेषणत्वेन भानादिह दण्डसम्बन्धस्य विशेषणत्वेन भानाद्भेदः । डित्थादियदृच्छाशब्देषु शब्द एव वाच्यो वाच्यतावच्छेदको वा एवं कंस परीक्षित चामुण्डादिपदेषु निर्देश एव वाच्यः शक्यतावच्छेदको वा, निर्देशश्च वाचकवर्णानां स्वपरत्वम् । यथा कंस इत्यत्र कङ्कारसकारावेव कंसपदे प्रतीयेते । तत्र नरकपदान्तर्गतसानुस्वारककारेण नरकप्रतीतिः समाश्रितपदान्तर्गतसकारेण च समाश्रितप्रतीतिः । तेन स्वोपस्थाप्यसानुस्वारकङ्कारसकारवत्पदवत्त्वसम्बन्धेन ककारसकारावेव वाच्यौ वाच्यतावच्छेदकौ वेति । एवं चामुण्डादिपदेपि चण्डमुण्डानयनवत्त्वादिसम्बन्धेन वर्णत्रयमेव शक्यं शक्यतावच्छेदकं वा । एवं परिक्षितादिपदे परिक्षीणे कुले जात इत्यादिसम्बन्धेन तत्तद्वर्णवत्त्वं बोध्यम् । एतेषु च

जातिगुणक्रियासम्बन्धासिद्धेर्न जात्यादिशब्दत्वं, नापि यदृच्छाशब्दत्वं सम्बन्धप्रदर्शनात् । नापि यौगिकत्वं, पिण्डार्थान्तःप्रविष्टार्थवाचकावय वारब्धत्वासम्भवात । नापि लक्षणा, सम्बन्धाग्रहात् । द्विरेफपदस्य भ्रमरपदादौ रेफद्वयसम्बन्धज्ञानसत्त्वाद्युक्ता लक्षणा । नापि लक्षितलक्षणा, लक्षणाया अभावात् । अतस्ते वर्णा एव शक्यतावच्छेदकाः शक्या वेति ॥

अत्र केचित्—व्यक्तिसङ्केतपक्षे सर्वासु व्यक्तिषु सङ्केत एको नाना वा । नाद्यः, आनन्त्यात् । नान्त्यो, व्यभिचारापत्तेः । गौः शुक्लश्चल इत्यादिपदानां व्यक्त्यैक्येनार्थभेदाभावात्सहप्रयोगानुपपत्तेश्च । अतो धर्म एव शक्तिः । हेतुता ऽपि शक्तिग्रहस्य तत्तत्पदत्वधर्मितावच्छेदककगोत्वप्रकारकनिश्चयत्वेन । तत्र जातौ च निरवच्छिन्नैव प्रकारतेति लाघवम् । अन्यथा गोत्वधर्मितावच्छेदककतत्तत्पदप्रकारकनिश्चयत्वेन हेतुतायां तत्तत्पदत्वस्य प्रकारकतावच्छेकतया गौरवमिति जातावेव शक्तिर्युक्ता । आकाशादिपदे अनन्तशक्तिकल्पनाभावेन न धर्मे शक्तिः । एवं च सर्वत्र नानानीलपीतरूपव्यक्तिषु वर्तमाना नीलत्वपीतत्वादिजातिर्नीलपीतादिपदवाच्या । चलनेत्यत्रापि चलनक्रियानिष्ठा जातिरेव ।

डित्थादिशब्दानामपि बालाद्यवस्थापरिणते नानाविरुद्धधर्माध्यासाद्भिन्नडित्थाद्यर्थनिष्ठा डित्थत्वजातिरेव वाच्येति बालवृद्धशुकोदीरितशब्दभेदेन शब्दनिष्ठैव जातिर्वाच्येत्यपि केचित् ॥

तत्राप्येवं विभागः । जातिरेव नामार्थे, उक्तयुक्त्या आक्षेपाच्च व्यक्तिलाभः । अर्थापत्तिः समानवित्तिवेद्यत्वं वा ऽऽक्षेपः । निरूढलक्षणा वा । तेन वृत्त्या प्रकृत्युपस्थाप्यत्वस्य प्रकृत्यर्थत्वान्न प्रत्ययार्थान्वयाद्यनुपपत्तिः ॥

"सक्यादन्येन रूपेण भाने भवति लक्षणा"

इति नियमस्याप्रयोजकत्वादिति । एवं च घटशाब्दबोधे घटत्वशक्तिज्ञानत्वेन कारणतायां लाघवम् ॥

अन्ये तु सर्वत्र व्यक्तिरेव पदार्थः । अशक्यया अपि जातेरुपलक्षणतया तदुपलक्षितव्यक्तिशक्त्यङ्गीकारेण न व्यभिचारानन्तशक्तिकल्पनादिर्दोषः । तदुक्तम्—

> आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।
> शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥ इति ।

परे तु जातिविशिष्टा व्यक्तिर्वाच्या । अन्यथा घटत्वांशे शक्त्यभावेन घटत्वादेः शाब्दविषयत्वासम्भवात । न च घटविशेष्यकघटत्वप्रका-

कबोधे जातिशक्तिज्ञानत्वेन व्यक्तिशक्तिज्ञानत्वेन वा हेतुत्वान्नायं दोष इति वाच्यम् । द्रव्यादिपदानामप्येवमापत्तौ घटादिपदात् द्रव्यत्वप्रकारकबोधापत्तेः । न च पदज्ञानस्य सम्बन्धिज्ञानविधया हेतुत्वेन येन रूपेणोपस्थितयोः सम्बन्धस्तेन रूपेणोपस्थापकत्वनियमः । एवं च घटत्वांशे शक्त्यग्रहेपि तेनैव रूपेणोपस्थितिरिति वाच्यम् । उपस्थितस्याकाशादेरपि अन्वयापत्तेरिति । एवं च द्विकं प्रातिपदिकार्थ इति ।

यद्वा जातिव्यक्तिलिङ्गानीति त्रिकमर्थः । लिङ्गं द्वेधा, शास्त्रीयव्यवहारहेतुर्लौकिकं च । अवयवसंस्थानविशेषवत्त्वमन्त्यं तत्तद्व्यक्तिविशेष निष्ठं व्यवस्थितम् । इयं व्यक्तिरयं पदार्थ इदं वस्त्विति सर्वत्र व्यवहारादव्यवस्थितं लिङ्गत्रितयनिबन्धनकार्योपयुक्तमाद्यम् । तच्च सत्त्वरजस्तमोगुणानां वृद्ध्यपचयस्थितिरूपमिति पतञ्जलिस्वामिनः ।

स्त्रीत्वपुंस्त्वनपुंसकत्वादि जातिरेवेत्यन्ये । तत्र लौकिके लिङ्गे शक्तिः । अलौकिके गौण्या प्रयोग आरोपात् । पशुना यजेतेत्यादौ मुख्यपुंस्त्वविवक्षणान्न स्त्रीपशुना यागप्रसङ्ग इत्याहुः ॥

अन्ये तु पशुशब्दस्य लिङ्गत्रयसाधारण्येन प्रयोगेपि मान्त्रवर्णिकच्छागपदस्य व्यवस्थितप्रयोगेण लौकिकपुंस्त्वे शक्तिमादाय दोषोद्धार इत्याहुः ॥

यद्वा शास्त्रीयं लिङ्गं शब्दनिष्ठमेव, लौकिकं त्वर्थनिष्ठं, तत्रार्थनिष्ठे शक्तिः । कुमारब्राह्मणपदानां तत्रैव प्रयोगात् । अत एव प्राश्मा अग्निं भरतेत्यत्रोपस्थितव्यक्तिगतपुंस्त्वे शक्तिस्वीकारात्केवलमेष्यामूहः । शब्दगते लक्षणेति । अत्र टाबादीनां ङीबादीनां शीप्रभृतानां द्योतकत्वमस्मिन्मते । ङीबादीनामेव वाचकत्वमित्यपि केचित् ॥

यद्वा जातिव्यक्तिलिङ्गसंख्या इति चतुष्कं प्रातिपदिकार्थः । दधि पश्येत्यादौ प्रातिपदिकादेव तत्प्रत्ययात् । एवं च विभक्तेर्द्योतकत्वमात्रम् । तेनैव च नामार्थप्रकारकशाब्दबोधे सुबादिजन्योपस्थितेर्हेतुत्वनिर्वाह इति दिक् ॥

एतत् सर्वं महाभाष्ये सरूपाणामेकशेष इति सूत्रे स्पष्टम् ॥

आलङ्कारिकास्तु—

"विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते"

इतिमतावष्टम्भेन पञ्चकं प्रातिपदिकार्थः ॥

परे तु शब्दस्यापि प्रातिपदिकार्थत्वात्षट्कं प्रातिपदिकार्थः । तथाहि—गामुच्चारयेत्यादिलौकिकप्रयोगे शिपिविष्टवतीषु रथन्तरं गायतीत्यादिवैदिकप्रयोगे च शब्दोपि भासतइति निर्विवादम् वृत्तिविषय एव

शाब्दबोधे विषय इति नियमः। तथा च शब्दस्यापि शक्तिविषयतया भानमङ्गीकार्यम्। तत्र घटादिपदे शब्दनिरूपितापि शक्तिर्भिन्ना कल्प्यत इति केचित्॥

अन्ये तु शक्तिविषयोऽर्थो भासते, शक्तिविषयत्वं चाश्रयतानिरूपकतान्यतरसम्बन्धेन शक्तिमत्त्वम्। तथा चार्थशक्तिज्ञानेनैव पदस्यापि भानम्। तेन घटादिपदानां शक्तिसम्बन्धेन घटत्वादिवत्पदमपि शक्यम्। एतावांस्तु विशेषो यत्सम्बन्धस्योभयनिरूप्यत्वेन सम्बन्धिद्वयोपस्थापकत्वाविशेषाद् घटत्वाद्यवच्छिन्नशक्त्यैव घटादिवच्छब्दस्यापि तथैव वृत्त्योपस्थितौ सत्यामर्थबोधे तात्पर्ये सति तत्र विशेषणतया स शब्दो भासते। तत्रापि घटत्वादिरूपेण विशिष्य शक्तिग्रहवतां पदजात्युभयप्रकारकबोधः। नलयुधिष्ठिरादिपदवद्विशिष्य शक्तिग्रहाभावे तु व्यक्तिविशेष्यकः केवलपदप्रकारको नलपदवाच्यः कश्चिदित्याद्याकारको बोधः। यत्र तूक्तोदाहरणेषु शब्दमात्रे तात्पर्यं तदा तत्र शक्त्या शब्दस्वरूपस्य प्राधान्येन भानमिति। एवं च क्वचित्तात्पर्यवशाच्छब्द एव प्राधान्येन भासते क्वचित्तदभावेऽर्थविशेषणत्वेनेति सिद्धम्। अत एवाग्निहोत्रं जुहोतीत्यादौ तस्य विशेषणत्वेनान्वयादग्निहोत्रनामकेनेति बोधः। एतेनाग्निहोत्रनामके निरूढलक्षणेति निरस्तम्, अनुपपत्त्यभावात्, मत्वर्थलक्षणातौल्येन सिद्धान्तानुबन्धाच्च, अतः शब्दोऽपि वाच्यः। एवं च-

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

इत्यादौ रक्त एवास्तमेतीति यदा क्रियते तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयैव प्रतिभासत इति काव्यप्रकाशोक्तिः सङ्गच्छते। अतः षट्कं प्रातिपदिकार्थ इति। तदुक्तम्।

"ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते" इति दिक्॥

इति प्रातिपदिकार्थनिरुक्तिः॥

अथ सुब्विभक्त्यर्थो निरूप्यते। तत्र प्रथमाषष्ठीवर्जं सर्वविभक्तयः कारकाणि। तत्र "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"। लिङ्गपरिमाणवचनानां लिङ्गत्वपरिमाणत्वसंख्यात्वप्रकारकशक्त्या लिङ्गादिषु प्रथमायाः शक्तिः। प्रातिपदिकार्थ इति क्वचित्प्रथमाया अर्थो नास्तीति सूचनाय। पुमान् देवदत्तः द्रोणो व्रीहिः एको घट इत्यादौ पुंस्त्वद्रोणत्वैकत्वानां प्रातिपदिकार्थानां देवदत्तादौ न स-

मवायसम्बन्धेनान्वयः सम्भवति । नामार्थयोर्भेदान्वयस्याव्युत्पत्तेः । अतो लिङ्गादिकं प्रथमार्थः । तत्र च प्रातिपदिकार्थानां पुंस्त्वादीनामभेदेनान्वयः, विभक्त्यर्थश्च देवदत्तादौ प्रकारतयान्वेति । एवं च पुंस्त्वाभिन्नलिङ्गवान् देवदत्तः । द्रोणाभिन्नपरिमाणवान् व्रीहिः । एकत्वाभिन्नसंख्यावान् घट इत्यादिबोधोपपत्तिरिति वैयाकरणाः ॥

अत्राहुः—नामार्थयोरभेदान्वयव्युत्पत्तिरक्षणाय विभक्त्यर्थप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिकल्पनं न युक्तम्, किं चैवं सति नामार्थयोरभेदान्वयः क्वापि न स्यात् । प्रातिपदिकार्थत्वेन प्रातिपदिकार्थे प्रथमायाः शक्त्या नीलो घट इत्यादावपि नीलाभिन्नप्रातिपदिकार्थस्य समवायसम्बन्धेन घटेऽन्वयात् । न चेष्टापत्तिः । प्रातिपदिकार्थत्वस्य शक्यतावच्छेदकत्वे गौरवात् । किं च तण्डुलः पचतीत्यादावपि प्रातिपदिकार्थरूपविभक्त्यर्थस्य कर्मत्वसंसर्गेण पाकेऽन्वयापत्त्या ततोऽपि बोधापत्तिः । नहि विभक्त्यर्थस्यापि धात्वर्थान्वये निरूपितत्वादिवत्कर्मत्वस्य संसर्गतया भाने किं चिद्बाधकमस्ति । अतः प्रातिपदिकार्थेन विभक्त्यर्थस्याभेदातिरिक्तसम्बन्धेनान्वयबोधो नास्तीति व्युत्पत्त्यन्तरकल्पने गौरवम्, अतो नेदं शक्तिग्राहकं किं तु प्रथमोच्चारणेऽन्यार्थस्याभावाद् नेयं कारकविभक्तिरिति सूत्राशयः । एवं च मात्रपदं सङ्गच्छते । शक्तिग्राहकत्वे मात्रपदवैयर्थ्यप्रसङ्गः ।

एवं सम्बोधनेचेत्यत्रापि सम्बोध्यत्वे प्रथमाया न शक्तिरुच्यते । हे देवदत्त पचेत्यत्रापि सम्बोध्यस्य विभक्त्यर्थस्य धात्वर्थे कर्तृत्वेनान्वयापत्तेः । तेनामन्त्रितादिसंज्ञान्तरप्रयुक्तकार्यप्राप्त्यर्थं सम्बोधने चेति सूत्रम् । सम्बोधेन या प्रथमा सा आमन्त्रितमिति सूत्रार्थः । अतो न प्रथमायाः किं चिद्वाच्यं, किं त्वाख्यातायुक्तार्थानुवाद इति दिक् ॥

एवं षष्ठ्यपि षष्ठीशेषे इति सूत्रेण विहिता न कारकविभक्तिः । शेषे उक्तकर्मत्वादिद्वितीयाद्यर्थभिन्ने सम्बन्धमात्रे षष्ठीति सूत्रार्थः । एवं च सम्बन्धे षष्ठ्याः शक्तिः । सम्बन्धत्वं शक्यतावच्छेदकं, चैत्रस्य धनमित्यादौ सम्बन्धप्रकारक एव बोधः । स्वत्वस्वामित्वविषयत्वसाध्यत्वजनकत्वादिविशेषे तु लक्षणा । एवं सर्पिषो जानीते मातुः स्मरतीत्यादौ सम्बन्धत्वप्रकारक एव बोधः । तात्पर्यग्रहाच्च विशेषबोधो लक्षणया मानसो वेति जीर्णाः ॥

नव्यास्तु षष्ठ्याः स्वत्वादौ शक्तिः । चैत्रस्य धनमित्यत्र निरूपितत्वस्वत्वादिप्रकारक एव बोधः । एवं चैत्रस्य न धनमित्यत्र चैत्रनिरूपितस्वत्वाभाववद्धनमिति बोधः । स्वामित्वं वा षष्ठ्यर्थः । चैत्रनिष्ठस्वामित्व-

निरूपकं धनमिति बोधः, चैत्रस्य न धनमित्यादौ चैत्रनिष्ठस्वामित्वनिरूपकत्वाभाववद्धनमिति बोधः। एवं घटस्याभाव इत्यादौ प्रतियोगित्वादिकं, घटप्रतियोगिकोऽभाव इति बोधः। एवं स्वत्वादिविशेष आनुशासनिकीं शक्तिमाहुः॥

तन्न—नानाशक्तिकल्पने गौरवात्। अनुशासनानां लाक्षणिकत्वेनाप्युपपत्तेः। समभिव्याहारविशेषे लक्षणानियमार्थानि चानुशासनानि। तेनान्यत्र लक्षणयाऽपि न प्रयोगः। यथा—

"ज्ञोऽविदर्थस्य करणे"। ज्ञानभिन्नार्थकजानातिसमभिव्याहारे करणत्वे षष्ठी। सर्पिषो जानीते, सर्पिषोपायेन भक्षयतीत्यर्थः॥

"अधीगर्थदयेशां कर्मणि"। स्मृत्यर्थकदयेशधातुसमभिव्याहारे मातुः स्मरति, सुवर्णानां दयते, दिशामीष्टे।

"कृञः प्रतियत्ने"। सतो गुणान्तराधानं प्रतियत्नः। कर्पूरेणोदकस्योपस्कुरुते॥

"रुजार्थानां भाववचनानामज्वरेः"। पीडार्थकज्वरभिन्नधात्वर्थकर्तृवाचकपदसमभिव्याहारे। दुष्कर्मणो रोगस्य रुजा॥

"आशिषि नाथः"। आशीरर्थकनाथधातुसमभिव्याहारे कर्मणि। राज्ञो नाथते॥

"जासिनिप्रहणनाटक्राथपिषां हिंसायाम्"। हिंसार्थकस्य जासधातोर्व्यस्तसमस्तनिप्रपूर्वकहन्धातोः नाटक्राथधात्वोश्च समभिव्याहारे कर्मत्वे। चौरस्योज्जासते, चौरस्य निहन्ति प्रहन्ति प्रणिहन्ति, नाटयति, क्राथयति, पिनष्टि॥

"व्यवहृपणोः समर्थयोः"। समानद्रव्यकव्यवहारपणार्थकयोर्धात्वोः समभिव्याहारे करणे। शतस्य व्यवहरति, शतस्य पणते। व्यवहार ऋणादानम्। पणो द्यूतम्॥

"दिवस्तदर्थस्य"। व्यवहारपणार्थकदीव्यतेः समभिव्याहारे। शतस्य दीव्यति॥

"प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने"। प्रेष्यपदब्रूहिपदसमाभिव्याहृतहविर्वाचकपदे कर्मत्वे। मेदसः प्रेष्य, मेदसोऽनुब्रूहि। हविषः प्रेष्य, हविषोऽनुब्रूहि॥

"यजेश्च करणे"। याजिसमभिव्याहृतहविर्वाचकपदे। सोमस्य यजति।

"कृत्वोर्थप्रयोगे कालेऽधिकरणे"। सुच्कृत्वसुच्प्रत्ययान्तसंख्यावाचकपदसमभिव्याहृतक्रियापदसमभिव्याहृतकालवाचकपदे अधिकरणत्वे। द्विरह्नो भुङ्क्ते। द्विसंख्याकमहरधिकरणकं भोजनमित्यर्थः॥

"कर्तृकर्मणोः कृति" । कृदन्तपदसमभिव्याहृतकर्तृकर्मवाचकयोः । कृष्णस्य कृतिः, भारतस्य श्रवणम् ॥

"उभयप्राप्तौ कर्मणि," । कृत्समभिव्याहृतयोः कर्तृकर्मणोः कर्मण्येव । गवां दोहोऽगोपेन ॥

"नलोकाव्ययनिष्ठाखलर्थतृनाम्" । लादेशयोः शतृशानचोःउप्रत्ययोकप्रत्ययाव्ययनिष्ठाप्रत्ययखल्प्रत्ययसमानार्थकप्रत्ययानां तृन्प्रत्याहारोक्तशानजादीनांसमभिव्याहारे कर्तृकर्मणोः षष्ठी न । अरिं जिगीषन् जिगीषमाणः, पपिवान् सोमं पपिश्च, सोमं चिकीर्षुः, दैत्यान् घातुको हरिः, अरिं जित्वा, सोमं भक्षितवान् ॥

"अकेनोर्भविष्यदाधमर्ण्ययोः" । भोजका ओदनं गच्छन्ति ॥

"कृत्यानां कर्त्तरि वा" । कृत्संयोगान्नित्यप्राप्तषष्ठ्याः कर्तरि विकल्पः । भवतः कर्तव्यं भवता कर्त्तव्यम् । इदं सूत्रं तृतीयाप्रतिप्रसवफलम् ।

"तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्" । तुलोपमाभिन्नसदृशार्थकपदसमभिव्याहारे उपमानत्वादिसम्बन्धे उपमेयोत्तरप्राप्तषष्ठ्या तृतीयाविधिः । यथा मुखस्य तुल्यश्चन्द्रः मुखेन वेति ।

अत्र तृतीयाया उपमानत्वादौ लक्षणेति केचित् ।
आनुशासनिकी शक्तिरित्यन्ये ॥

"चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः" । आयुष्यादिपदकरणकाशीरर्थकलिङादिसमभिव्याहारे सम्बन्धप्राप्तषष्ठी चतुर्थ्या विकल्पते । देवदत्तस्यायुष्यं देवदत्तायायुष्यं भूयादित्यादि । सर्वत्र षष्ठ्याः सम्बन्धमात्रवाचकतया सम्बन्धप्रकारको बोधः । कर्तृत्वकर्मत्वादिबोधस्तु लक्षणयैवानुशासनवशात् । लक्षणापि नास्तीति तत्त्वम् ॥

प्रथमाषष्ठ्यर्थनिरूपणम् ॥

एतदूर्जं द्वितीयादिविभक्तयः कारकाणि । ननु किमिदं कारकत्वम् । न तावत्क्रियाप्रयोजकत्वम् । देवदत्तस्य तण्डुलं पचतीत्यत्रानुमतिद्वारा क्रियाप्रयोजके देवदत्तेऽतिप्रसङ्गात् । नापि क्रियाजनकत्वम् । यथाज्ञानं पचतीति ज्ञानेऽतिप्रसक्तेः । अथ धात्वर्थान्विताविभक्त्यर्थान्वयित्वं कारकत्वम् । धनाय गच्छति स्वर्गाय यतते इत्यादावकारकयोर्धनस्वर्गयोरतिव्याप्तेः । न पचतीत्यादौ नार्थेतिव्याप्तेश्च । तस्य पाकान्विताख्यातविभक्त्यर्थान्वयात । निपातातिरिक्तत्वेन विशेषणे नक्तं पचतीत्यादौ अधिकरणे नक्तादावव्याप्तेः ॥ तस्मात्कर्तृकर्माद्यन्यतमत्वं कारकत्वमिति नैयायिकाः ॥

सामान्यतः समवेतासमवेतस्य द्वैविध्यात्कारकत्वं कर्तृत्वा-

दिकं चानुगतव्यवहारसिद्धमखण्डोपाधिरूपं सामान्यमिति रत्नकोशकृतः।

सिद्धान्तस्त्वाख्यातार्थान्वितविभक्त्यर्थान्वयित्वं कारकत्वम्। लिङ्गसंख्यादीनां कारकत्वमिष्टमेव। आज्यस्य यजतीत्यादौ लाक्षणिकषष्ठ्यर्थस्याप्याख्यातार्थान्वयादाज्यादेः कारकत्वम्। उपपदविभक्त्यर्थानां तु कल्पितधात्वर्थान्तरेऽन्वयात् श्रुतभावनानन्वयित्वेन न कारकत्वम्। अत एव तस्याः कारकविभक्त्यपेक्षया दुर्बलत्वमिति सम्प्रदायः।

तत्र द्वितीयायाः कर्मत्वमर्थः। तच्च क्रियाजन्यफलशालित्वम्। घटं पश्यतीत्यत्र दर्शनजन्यज्ञाततया घटनिष्ठत्वाल्लक्षणसमन्वयः।

नन्वेवं चैत्रो ग्रामं गच्छतीत्यादौ चैत्रस्य कर्मत्वापत्तिः। क्रियाजन्यसंयोगशालित्वात्। किञ्च त्यजतिगच्छत्योः पर्यायत्वापत्तिरिति चेत्—

अत्र नैयायिकाः। परसमवेतत्वं क्रियाविशेषणं धात्वर्थतावच्छेदकत्वं फलविशेषणं, परत्वं च द्वितीयाप्रकृत्यर्थापेक्षया। एवं चैत्रो ग्रामं गच्छतीत्यादौ चैत्रसमवेतव्यापारजन्यधात्वर्थतावच्छेदकसंयोगशालितया ग्रामस्य कर्मता। शाब्दबोधोऽपि ग्रामसमवेतधात्वर्थतावच्छेदकसंयोगानुकूलग्रामान्यसमवेतव्यापारजनककृतिमांश्चैत्र इति। त्यजतेर्विभागफलकव्यापारे शक्तिरिति नोक्तदोष इत्याहुः।

तच्च कर्म द्विविधम्। "कर्तुरीप्सिततमं कर्म" "तथायुक्तं चानीप्सितम्" इति व्याकरणात्। तत्राद्यं चतुर्धा। उत्पाद्यप्राप्यविकार्यसंस्कार्यभेदात्। उत्पत्तिर्नाम येनाकारेण कारकमभिधानोपात्तं तस्यासत एवोत्पादनम्। तस्यैव सतोऽप्राप्तस्य प्रापणं प्राप्तिः। तद्गतदृष्टातिशयोत्पादनं विकृतिः। तस्यैवादृष्टातिशयोत्पादनं संस्कार इति। यथा यूपं छिनत्ति, घटं कुरुते, पयो दोग्धि, व्रीहीनवहन्ति, व्रीहीन्प्रोक्षतीति। यतदुक्तं वाक्यपदीये—

यदसज्जायते सद्वा जन्मना यत्प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्॥
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत्।
किं चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥
क्रियाकृतविशेषाणां सिद्धिर्यत्र न लभ्यते।
दर्शनादनुमानाद्वा तात्त्विकं तत्तु कथ्यते॥

इति। अनीप्सितमपि चतुर्विधम्। उदासीनं द्वेष्यं संज्ञान्तरैरनाख्यातमन्यपूर्वकं च। यथा तृणं स्पृशति। विषं भुङ्क्ते। गां दोग्धि।

विषमनुकुध्यतीति, अग्निमनुजपतीति च। अत्र ईप्सितत्वानीप्सितत्वयोः शक्तिद्वयमिति सोमेश्वरः । ईप्सितानीप्सितानुवृत्तसाध्यत्वं न द्वितीयार्थो गौरवात् । न च सूत्रद्वयानर्थक्यम् , वारणार्थानामीप्सित इति यवेभ्यो गां वारयतीत्यत्र यवानामीप्सितत्वेनापादानतया ईप्सिततमे गवि द्वितीयाप्राप्त्यर्थत्वाद्याद्यस्य, विषं भक्षयतीत्यादौ द्वितीयस्यापि सार्थक्यात् ॥

"अकथितं च" दुह्याद्यादिद्विकर्मकधातूनामपादानत्वादिकारकैरसम्भवदन्वयं धात्वर्थनावच्छेदकफलशालि व्याप्यमानं द्वितीयं कर्म । गां पयो दोग्धि, राजानं याचते वसुधाम्, अजां ग्रामं नयति । गोकर्मकदोहेन पयो भावयतीति बोधः । विपरीतं वा । अत्र धात्वर्थव्याप्यमानमेकं कर्म व्याप्यव्याप्यमानं द्वितीयम् । अत एव तप्ते पयसि दध्यानयतीत्यत्र द्वितीयकर्मापेक्षया पयसः कर्मत्वेनैवान्वयः ॥

"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" । गत्यर्थकबुद्ध्यर्थकप्रत्यवसानार्थकानां शब्दकर्मकाणामकर्मकाणां च समभिव्याहारे यः कर्ता स तेषां ण्यन्तानां समभिव्याहारे कर्म । गुरुं ग्रामं गमयति, शिष्यं शास्त्रं बोधयति, मन्त्रं यजमानं वाचयति, विष्णुं शाययति । अत्रापि व्याप्यमानत्वम् ।

"हृक्रोरन्यतरस्याम्" । हरणार्थकानां करणार्थकानाञ्च समभिव्याहारे द्वितीया तृतीया च । शिष्येण शिष्यं वा भारं हारयति कारयति च । तस्मात्साध्यत्वं द्वितीयार्थ इति पार्थसारथिः ।

यत्र च द्वितीयार्थस्य न साक्षात्क्रियान्वयस्तत्रोपपदविभक्तित्वम् । यथा—

"अन्तरान्तरेण युक्ते" त्वां मां चान्तराऽन्तरेण वा हरिरस्ति । अत्र सम्बन्धे द्वितीयाया लक्षणा । उभयसम्बन्ध्यन्तरालवर्ती हरिरिति बोधः ॥

"कालाध्वनोरत्यन्तसंयोग" । कालाध्ववाचिपदसमभिव्याहृतद्वितीयाया अत्यन्तसंयोगो व्याप्तिरर्थः । मासमधीते, क्रोशं पर्वतस्तिष्ठति । मासाभिव्याप्तिविशिष्टमध्ययनं क्रोशाभिव्याप्तिविशिष्टपर्वतस्थितिरिति बोधः । अभिव्याप्तेः पर्वतसम्बन्धित्वादुपपदविभक्तित्वम् ॥

"अपवर्गे तृतीया" । क्रियासम्बन्धोऽपवर्गः । मासेनानुवाकोऽधीत इति । द्वितीयापवादः ॥

"सप्तमीपञ्चम्यौ कारकमध्ये" । कृतिशक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ । अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता ॥

"कर्मप्रवचनीययुक्ते द्वितीया" । उपलक्षणाद्यर्थकानुप्रतिपर्यादिस-

मभिव्याहृतकर्मप्रवचनीयसंज्ञकानां योगे द्वितीया । जपमनुप्रावर्षत् । नदीमन्ववसिता सेना । अनु हरिं सुराः । उप हरिं सुराः । वृक्षं प्रति परि अनु वा विद्योतते विद्युत् । भक्तो विष्णुं प्रति परि अनु वा । लक्ष्मीर्हरिं प्रति परि अनु वा । वृक्षंवृक्षं प्रति परि अनु वा सिञ्चति । हरिमभि वर्तते ॥

"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" । अत्र कर्मप्रवचनीययुक्ते सप्तमी । उप परार्धे हरेर्गुणाः । अधि भुवि रामः । अधि रामे भूः ।

"पञ्चम्यपाङ्परिभिः" । एतैः कर्मप्रवचनीयैर्योगे पञ्चमी । अपहरेः संसारः ॥

"प्रतिनिधिप्रतिदाने च यस्मात्" । अत्र कर्मप्रवचनीययोगे पञ्चमी । प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् ।

"गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" । अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तः चेष्टायां गम्यमानायाम् । ग्रामं ग्रामाय वा गच्छति ॥

इति कारकवादे द्वितीया ॥

अथ कर्तृत्वं करणत्वं च तृतीयार्थः । "कर्तृकरणयोस्तृतीया" इति सूत्रात् । कर्तृत्वं च स्वातन्त्र्यं स्वतन्त्रः कर्तेति सूत्रात् ॥

स स्वतन्त्रस्त्रिविधः । शुद्धः प्रयोजकः कर्मकर्ता चेति । तदनुकूल व्यापारफलाश्रयः शुद्धः । व्यापारानाश्रयत्वे सति फलाश्रयो द्वितीयः । फलानाश्रयत्वे सति अनुकूलव्यापाराश्रयस्तृतीयः ॥

कर्तृत्वं न तावद्यत्नाश्रयत्वं, तदुपादानविषयकापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं वा, कूलं पिपतिषति रथो गच्छतीत्यादावभावात् ।

नापि कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वम् । उक्तदूषणापरिहारात् ।

किं तु धात्वर्थव्यापाराश्रयत्वं तत् । यद्धातूत्तराख्यातेन यगाद्यसमभिव्याहृतेन यद्धात्वर्थान्वितधर्मवत्त्वं बोध्यते तद्वत्त्वं तत्क्रियाकर्तृत्वम् । चैत्रः पचति जानाति नश्यतीत्यादौ पाकानुकूलव्यापारवत्त्वाश्रयत्वप्रतियोगित्वादिकमेव तत्तत्क्रियाकर्तृत्वम् । पच्यते तण्डुल इत्यादौ कर्मण्यतिप्रसङ्गवारणाय यगाद्यसमभिव्याहृतेति । तेन स्थाली पचति काष्ठानि पचन्तीत्यत्र स्थालीकाष्ठादावपि कर्तृत्वमविरुद्धम् ॥

करणत्वं तु साधकतमत्वम् । "साधकतमं करणम्" इति सूत्रात् । साधकतमत्वं चाव्यवधानेन फलजनकव्यापारवत्कारणत्वम् । फला-

योगव्यवच्छिन्नत्वं वा । तेनात्मना जानातीत्यादावात्मनोपिकरणत्वमविरुद्धम् । फलोद्देशप्रवृत्तकर्तृव्यापारोपकार्यत्वं वा । अस्ति चेदं कुठारादौ । एवं च कुठारेण छिनत्ति दर्शपूर्णमासाभ्यां स्वर्गामत्याद्युपपत्तिः । अत्र कर्तृत्वकरणत्वयोः साक्षाद्भावनायां सम्बन्धात्तदर्थकतृतीया कारकविभक्तिः ।

भावनाभिन्नपदार्थान्वय्यर्थिकोपपदविभक्तिः । यथा—

"सहयुक्तेऽप्रधाने" । साहित्ययुक्ताप्रधानवाचकशब्दसमभिव्याहृततृतीयाया निरूपितत्वमर्थः । शिष्येण सहागतो गुरुः । शिष्यनिरूपितसाहित्यविशिष्टगुरुकर्तृकमागमनमिति बोधः । एव च तृतीयार्थस्य भावनान्वयाभावादुपपदविभक्तिः ॥

"येनाङ्गविकारः" । विकारयुक्ताङ्गवाचकपदसमभिव्याहृततृतीया सम्बन्धे । यथा अक्ष्णा काण इत्यत्र अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः । अत्र च अक्षिनिष्ठकाणत्वस्य परम्परासम्बन्धेन चैत्रे प्रकारता ।

"इत्थंभूतलक्षणे" ॥ इत्थंभूतलक्षणे तृतीया । इत्थंभूतलक्षणं ज्ञापकत्वम् । जटाभिस्तापस इत्यत्र जटाज्ञाप्यतपोवानित्यर्थः । अत्र ज्ञाप्यत्वस्य तपोविशिष्टेऽन्वयः । अन्यथा एकदेशेऽन्वयापत्तेः ॥

"संज्ञोऽन्यतरस्यां कर्मणि" ॥ संपूर्वस्य ज्ञाधातोः कर्मणि तृतीया द्वितीया वा स्तः । मात्रा मातरं वा संजानीते । मातृविषयकपूज्यत्वादिप्रकारकज्ञानवानित्यर्थः । अत्र मातृपदार्थस्य पूज्यत्वप्रकारकज्ञानक्रियायामन्वयात् । पूज्यत्वरूपक्रियान्वय आर्थिकः । फलजनकज्ञानान्वयो वा । तेनात्रोपपदविभक्तित्वम् ॥

"हेतौ" ॥ हेत्वर्थे तृतीया । पुण्येन दृष्टो हरिः । अत्र तृतीयार्थस्य सहकारित्वस्य दर्शनेऽन्वयः । पुण्यसहकृतेन्द्रियजन्यं दर्शनम् ॥

"अकर्तर्यृणे पञ्चमी" । शतेन बद्धः शताद्बद्धः । अत्र शतस्य ऋणक्रियाद्वारा बन्धनक्रियायामन्वयादुपपदविभक्तित्वम् । शताभिन्नऋणजन्यबन्धनवान् इति बोधः ॥

"षष्ठी हेतुप्रयोगे" ॥ हेतौ द्योत्ये षष्ठ्येव न तृतीया । अध्ययनस्य हेतोर्वसति । अध्ययनाभिन्नहेतुको निवासः ॥

"सर्वनाम्नस्तृतीया च" । कस्य हेतोः केन हेतुना वसति ॥

इति तृतीयार्थनिरूपणम् ॥

सम्प्रदानं चतुर्थ्यर्थः । "चतुर्थी सम्प्रदाने" इति सूत्रात् । सम्प्रदानत्व च धात्वर्थकर्मणा व्याप्यमानत्वम् । व्याप्यमानत्वमभिप्रेयमाणत्वम् । धात्वर्थकर्मजन्यव्यापारोद्देश्यत्वमिति यावत् । यथा विप्राय गां

ददाति दानकर्मीभूतगोजन्यपयोदोहनादिव्यापारोद्देश्यत्वाद्विप्रस्य स-म्प्रदानत्वम् । रजकाय वस्त्रं ददातीत्यत्र तु ददातेर्लाक्षणिकत्वात् चतुर्थ्यपि सम्बन्धमात्रे लाक्षणिकी । एवं च दानकर्मीभूतगवादिप्रतिग्रहीतृत्वं सम्प्रदानत्वम् ।

"कर्मणा यमभिप्रैति स सम्प्रदानमि"ति सूत्रस्याप्ययमर्थः । दानकर्मणा गवादिना यमभिव्याप्नोतीति जीर्णाः ।

अभिनवास्तु दृष्टद्वारकधात्वर्थोद्देश्यत्वं सम्प्रदानत्वम् । धात्वर्थजन्यदृष्टफलशालित्वमिति यावत् । तत्फलं सकर्मकेषु धात्वर्थतावच्छेदकमकर्मकेषु धात्वर्थजन्यमात्रम् । सूत्रस्थापि कर्मणा धात्वर्थेनेत्यर्थः । तेन विप्राय गां ददाति पत्ये शेते कृष्णाय रोचते भक्तिरित्यादौ मुख्यः प्रयोगः । अत्र विप्रनिष्ठस्वत्वोत्पत्त्युद्देश्यको दानानुकूलो व्यापारः । पतिनिष्ठसुखोद्देश्यकशयनानुकूलो व्यापार इत्यादिविभ्रमः । एवं च कर्मकारकापेक्षया सम्प्रदानस्य प्राधान्यम् । अत एव मैत्रावरुणाय दण्डं प्रयच्छतीत्यत्र न दानस्य दण्डप्रतिपत्त्यर्थत्वं किं तूपयोक्ष्यमाणसंस्कारत्वं सिद्धान्तितम् । आत्रेयाय हिरण्यं ददातीत्यत्र तु आत्रेयस्य सम्प्रदानत्वेऽपि न भावनोद्देश्यत्वम्, भूतभाव्युपयोगाभावेनेष्टत्वाभावादिति दिक् ॥

"रुच्यर्थानां प्रीयमाणः" । रुच्यादिधातुसमभिव्याहारे तु प्रीयमाणस्यैव सम्प्रदानत्वम् । देवदत्ताय वने रोचन्ते फलानीति । रुचिमत्त्वस्यावच्छेदकतासम्बन्धेन वननिष्ठत्वेपि न सम्प्रदानत्वम् ॥

"श्लाघन्हुङ्स्थाशपां ज्ञीप्स्यमानः" । ज्ञीप्स्यमानस्य सम्प्रदानत्वम् । गोपी स्मरात्कृष्णाय श्लाघते, न्हुते, तिष्ठते, शपते वेति । स्मरहेतुकगोपीकर्तृकश्लाघनादिज्ञापनवत्त्वात् कृष्णस्य सम्प्रदानत्वम् । 'इतीव पान्थं शपतः पिकान् द्विजानि'त्यत्र पान्थस्य शापज्ञापनाभावान्नसम्प्रदानत्वम् । श्लाघनं स्तवनं निन्हवोऽपनयः ॥

"धारेरुत्तमर्णः" । धारयतिसमभिव्याहारे उत्तमर्णस्य सम्प्रदानत्वम् । मह्यं सुवर्णशतं धारयति देवदत्तः । देवदत्तकर्तृकधारणकर्मीभूतसुवर्णशतव्याप्यमानत्वात्सुवर्णशतधारणजन्यदुःखवत्त्वाद्वा । अत एव वने धारयतीत्यत्र वनस्य न तत् । उत्तमर्णत्वं च गृहीतधनवृद्धिभागित्वं वृद्धिजन्यसुखभागित्वं वा । एतेन भक्ताय धारयति मोक्षं कृष्ण इत्युदाहरणं सूत्रविरुद्धम् ॥

"स्पृहेरीप्सितः" । स्पृहयतिसमभिव्याहारे इच्छासामान्यविषयस्य सम्प्रदानत्वम् । प्रकृष्टेच्छाविषयस्य कर्मत्वम् । पुष्पेभ्यः स्पृहयति,

पुष्पाणि स्पृहयति वने स्पृहयतीति वने तदभावः ॥

"क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" । "क्रुधद्रुहोरुपसृष्टयोः कर्म" । अस्मै क्रुध्यति द्रुह्यति ईर्ष्यति असूयति । उपसर्गरहितक्रोधाद्यर्थकधातुसमभिव्याहारे कोपकर्मणो हरेः सम्प्रदानत्वम् । वने क्रुध्यतीत्यादौ वनस्य न तत् । शिष्यमभिक्रुध्यतीत्यादावपि न । क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्याऽक्षमा । असूया गुणेषु दोषाविष्करणम् । एते क्रोधविशेषा एव ॥

"राधीक्ष्योर्यस्य विप्रश्नः" । राधीक्ष्योः समभिव्याहारे विविधप्रश्नविषयशुभाशुभाधिकरणकस्य सम्प्रदानत्वम् । कृष्णाय राध्यति ईक्षते वा । गर्गकर्तृकगोपीकृतविविधप्रश्नविषयशुभाशुभपर्यालोचनाधिकरणहरिसम्प्रदानकं राधनमीक्षणं वेति बोधः ॥

"प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता" । आङ्प्रतिपूर्वकश्रुधातुसमभिव्याहारे धात्वर्थप्रतिज्ञाजनकव्यापारकर्तुः सम्प्रदानत्वम् । देवदत्ताय गामाशृणोति प्रतिशृणोति वा । प्रतिश्रवणादिधात्वर्थेन व्याप्यमानत्वाद्याचकस्य ॥

"अनुप्रतिगृणश्च" । प्रत्यनुपूर्वकगृणातेः समभिव्याहारे पूर्वशंसनादिकर्तुर्होतुः सम्प्रदानत्वम् । अध्वर्युर्होत्रेऽनुगृणाति, प्रतिगृणातीति, धातुलक्ष्यप्रोत्साहनव्याप्यमानत्वात् । एवञ्च मुख्यैव चतुर्थी ॥

यत्र तु धात्वर्थकर्मव्याप्यमानस्यासम्भवेनान्यत्रान्वयस्तत्रोपपदविभक्तिस्तादर्थ्यादिलक्षणा । उपपदार्थेऽन्वयेन प्रधानक्रियायामनन्वयात् । मुक्तये हरिं भजति, भक्तिर्ज्ञानाय कल्पते इत्यादौ । अत्र कल्पितप्राप्तिक्रियान्वयेन श्रुतभजनादिक्रियायां कारकत्वेन साक्षादनन्वयात् । साध्यत्वमात्रे लाक्षणिकत्वाच्चेति वैयाकरणाः ॥

अन्ये त्वत्र चतुर्थ्या नोपपदविभक्तित्वं, किं तु साध्यत्वलक्षणया कारकविभक्तित्वमेव । अत एव सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यादौ साध्यत्वेन भावनान्वयोऽङ्गीक्रियते इत्याहुः ॥

परे तु तत्रापि सर्वान्कामानित्यर्थादुपपदविभक्तित्वमेवेत्याहुः तदग्निमाधत्त इत्यादौ द्वितीयाया अपि उपपदविभक्तित्वापत्त्योपेक्षणीयमेव ॥

एवं वाताय कपिला विद्युदित्यत्र कल्पितज्ञानक्रियान्वयेन फलेभ्यो यातीत्यादौ अप्रयुज्यमानतुमुन्नन्तकर्तृककल्पिताहरणक्रियान्वयेनोपपदविभक्तिः ॥

"तुमर्थाच्च भाववचनात्" । यागाय यातीत्यादौ कल्पितदर्शनादिक्रियान्वयेनोपपदविभक्तित्वम् । यागसाध्यकं यानमित्यर्थे तु पूर्ववत्का-

रकविभक्तित्वमेव । जनार्दनायार्घमित्यत्राप्युपपदविभक्तित्वम् । पक्षे कारकत्वं च ॥

"नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च" इति विहिता नमःपदादियोगे चतुर्थ्युपपदविभक्तिः । यथा हरये नमः, स्वयम्भुवे नमस्कृत्य, हरिमनुकूलयितुमित्यर्थः । नारायणं नमस्कृत्येत्यत्र तु छान्दसः प्रयोगः । प्रजाभ्यः स्वस्ति । स्वस्तिपदं कल्याणवाचकमिदं, द्वितीयं सुबन्तं, "स्वस्ति न इन्द्रो वृद्धश्रवाः" "वैश्वानरो वसुरग्निः स्वस्तये" इत्युभयथा प्रयोगात् । उभयत्रापि मङ्गलवाचकमेव । अग्नये स्वाहा । पितृभ्यः स्वधा । इन्द्राय वषट् । स्वाहापदं स्वधापदं वषट्पदं च प्रदानार्थकम् । अलमिति पर्याप्त्यर्थसमर्थादिपदान्तरोपलक्षणम् । अत एव स्वामिवाचकप्रभुपदसमभिव्याहारे षष्ठ्येव साधुर्न चतुर्थी ॥

"इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता ।
अधिभूर्नायको नेता प्रभुः परिवृढो ऽधिपः" ॥

इत्याद्यनुशासनात्प्रभुपदस्य स्वामिनि शक्तिग्रहात् 'प्रभुर्बुभूषुर्भुवनत्रयस्ये'ति प्रयोगाच्च । तस्मै प्रभवतीति त्वलंपदार्थकप्रभुपदसमभिव्याहाराच्चतुर्थ्येव साधुः । सापि जानयितुं पालयितुं वेति कल्पितक्रियान्तरान्वयादुपपदविभक्तिरेव । प्रभ्वादियोगे षष्ठ्यपि साधुरिति वार्त्तिकस्य तु भावं नाकलयामः ।

"मन्यकर्मण्यनादरे विभाषाऽप्राणिषु" । मन्यधातुसमभिव्याहारे तद्धात्वर्थकर्मणि विकल्पिता चतुर्थ्युपपदविभक्तिः । न त्वां तृणाय तृणं वा मन्ये । अत्र कल्पितानादरक्रियान्वयादुपपदविभक्तित्वम् । एवं ग्रामं ग्रामाय वा गच्छतीति विकल्पिता चतुर्थी कल्पितचेष्टाध्वादिपदार्थान्तरान्वयादुपपदविभक्तिः । मनसा हरिं व्रजतीत्यत्र चेष्टात्वाभावाद् द्वितीयैव साधुरिति दिक् ॥

अत्र मीमांसकाः—चतुर्थ्यां देवतात्वे शक्तिः ।

"तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः ।
देवताया विधिस्तत्र दुर्बलं तु परम्परम्" ॥

इति वार्त्तिकात् । तथाहि । 'सूक्तहविषोरि'ति वार्त्तिकादाग्नेयं सूक्तमाग्नेयोऽष्टाकपाल इत्यादिप्रयोगाच्च सूक्तप्रकाश्यत्वं त्यज्यमानहविःसम्बन्धित्वरूपं च देवतात्वं द्विविधं तद्धितवाच्यं, सास्य देवतेत्यनुशासनेन देवताधिकारे अग्नेर्ढगित्यादिभिः सूत्रैरनेकढगादिप्रत्ययविधानात् । सास्य देवतेत्यत्र सूक्तहविषोः षष्ठ्यन्तनिर्दिष्टत्वेन विशेषणत्वप्रतीतावपि उक्तप्रयोगेषु सामानाधिकरण्येनाग्न्यादिपदार्थविशेष्यत्वेन प्रतीते-

स्तत्पदानिर्दिष्टाग्न्यादीनां देवतात्वमात्रबोधकत्वात् । तेन तद्धितस्य देवतात्वविशिष्टाग्न्यादिविशिष्टसूक्तहविर्वाचकत्वे सिद्धे "ना गृहीतविशेषणा"न्यायेन देवतात्वे शक्तिः । एवमग्नये स्वाहेत्यादावपि स्वाहाशब्दार्थहविस्त्यागे अग्नेश्च विशेषणत्वेन प्रतीतेः सम्बन्धान्तरस्याभावेन देवतात्वेनैव विशेषणतेति तत्र चतुर्थ्याः शक्तिः । एवं मन्त्रवर्णस्यापीति जीर्णाः ॥

अत्र पितृचरणाः—नेदं वार्त्तिकं चतुर्थ्या देवतात्वे शक्तिबोधकं, किं तु देवताप्रतिपादकान्तरोपलक्षणं सच्चतुर्थीमन्त्रवर्णादौ देवतालाक्षणिकत्वपरं, दुर्बले तु परंपरमित्यभिधानात् । तथाहि । देवताशब्दतद्धितचतुर्थीद्वितीयामन्त्रा देवतात्वबोधकाः । तत्राग्निर्देवता वातो देवतेत्यादावग्न्यादीनां देवतात्वप्रकारकभानात् उभयरूपे देवतात्वे शक्तिः । सूक्तप्रकाश्योऽग्निर्द्रव्यत्यागसम्बन्धी वेति बोधः । तद्धितस्य तु हविषोऽग्न्यादिनिष्ठत्वबोधान्तरं त्यागादिकल्पनात् ततो दुर्बलत्वं । चतुर्थ्यास्तु त्यज्यमानद्रव्योद्देश्यत्वविशिष्टप्रतिग्रहीतृत्वरूपसंप्रदानत्ववाचिन्याः प्रतिग्रहीतृत्वत्यागेनैकदेशलक्षणया ततोऽपि दुर्बलत्वम् । विष्णुं यजतीत्यादौ द्वितीयायास्तूद्देश्यत्वमात्रवाचिन्याः विशिष्टे लाक्षणिकत्वाद् दुर्बलत्वम् । मन्त्रकर्मसम्बन्धज्ञानानुपपत्तिकल्प्यमन्त्रप्रकाश्यकर्मसम्बन्धज्ञानानुपपत्तिकं देवतात्वमित्यत्यन्तं दुर्बलत्वम् । तेन सम्प्रदानत्वे एव चतुर्थ्याः शक्तिर्न देवतात्वे इत्याहुः ।

अत्र तद्धितादियुक्तवाक्येषु देवताविधिरपूर्व इति केचित् यागविधिनैव द्रव्यसामान्यस्येव देवतासामान्यस्याप्याक्षेपादिन्द्रादिदेवताविशेषनियमपरतया नियमविधिरित्याहुः ।

तद्धितचतुर्थ्यादिभिरुक्तव्युत्पत्त्या स्वप्रकृत्यर्थस्य देवतात्वं प्रतिपाद्यते । अत एव इन्द्राग्नीतिप्रातिपदिकोत्तरतद्धितेनेन्द्राग्निरूपप्रातिपदिकार्थद्वयनिष्ठमेकं व्यासज्यवृत्ति देवतात्वं प्रतिपाद्यते । एवं महेन्द्रपदोत्तरतद्धितेन महेन्द्रस्यैव देवतात्वमिति तत्र नेन्द्रस्य देवतात्वमिति

उद्देश्यत्वं च त्यागाव्यवहितपूर्वकालीनस्ववाचकवैधपदोच्चारणवत्त्वं तेन देवतायाः प्रयोगसम्बन्धित्वमिति प्रकृतिविकृतिसम्बन्धिनिगमेष्वपि वैधपदसिद्धिरिति दिक् ॥

अधिकं मत्कृतकुसुमाञ्जलावववधेयम् ॥

॥ इति कारकवादे चतुर्थ्यर्थनिरूपणम् ॥

अपादानत्वं पञ्चम्यर्थः । "अपादाने पञ्चमी"ति सूत्रात् । अपादानत्वं च परसमवेतक्रियाजन्यविभागाश्रयत्वं, विभागहेतुक्रियानाश्रयत्वे सति विभागाश्रयत्वमिति भावार्थः । "ध्रुवमपायेऽपादानम्" इति सूत्रात् । अपायो विश्लेषः विभागवियोगादिशब्दवाच्यः । अन्यस्य विभागवियोगानुकूलक्रियाश्रयस्य विभागादौ सति विभागवियोगाश्रयत्वेन ध्रुवं स्थिरं विभागवियोगादिनिरूपकाभिमतं यावत्, तदपादानमिति सूत्रार्थः । यथा वृक्षात्पर्णं पतति, अधः संयोगानुकूलक्रिया पतेरर्थः । अधः संयोगप्रयोजकविभागानुकूलक्रिया वा । अत्र चाधः संयोगप्रयोजकविभागानुकूलक्रिया वा । एवं चाधःसंयोगानुकूलक्रियानाश्रयत्वे सति तादृशक्रियाजन्यविभागाश्रयत्वात् वृक्षस्यापादानत्वम् ।

इत्थं च तत्तद्धात्वर्थतावच्छेदकफलजनकक्रियानाश्रयत्वे सति तादृशक्रियाजन्यफलनिरूपकत्वं तादृशक्रियानिरूपकत्वं चेति निष्कर्षः ।

एवं चौराद्व्याघ्राद्बिभेति, चौरात्त्रायते, अध्ययनात्पराजयते, यवेभ्यो गां वारयति, मातुर्निलीयते, उपाध्यायादधीते, ब्रह्मणः प्रजाः प्रजायन्ते, हिमवतो गङ्गा प्रभवति, इत्यादौ भयादिहेतुचौरस्य व्याघ्रादीनां "भीत्रार्थानां भयहेतुः" । "पराजेरसोढः" । "वारणार्थानामीप्सितः" । "अन्तर्धौ येनादर्शनमिच्छति" । "आख्यातोपयोगे" "जनिकर्तुः प्रकृतिः" "भुवः प्रभवः" । इत्याद्यनुशासनिकं मुख्यमेवापादानत्वम् । अत्र चापन्निवृत्त्यनुकूलक्रिया बिभेतेरर्थः । तदनुकूलरक्षणं त्रायतेः । ग्लानिजनकक्रिया पराजयतेः । दूरदेशसंयोगानुकूलक्रिया वारयतेः । दर्शनाभावानुकूलक्रिया निलीयतेः । गुरुमुखोच्चारणानुकूलक्रियाऽधीतेः । उत्पत्त्यनुकूलक्रिया जायतेः । प्रकाशजनकचक्षुर्ग्राह्यक्रिया प्रपूर्वकभवतेरर्थः । तदनाश्रयत्वे सति तत्तत्क्रियानिरूपकत्वात्, भीत्रार्थानां भयहेतुरित्याद्यनुशासनानामपादानत्वबोधकता, न तु पञ्चम्या उपपदविभक्तित्वबोधकतेति वैयाकरणाः ।

मीमांसकास्त्वारण्यादेर्निरूपकत्वाभावान्नापादानत्वम् । अत एव अरण्याद्बिभेति इति न प्रयोगः । यदि च तादृशप्रयोगः तदा वनपदस्य वनस्थव्याघ्रादौ लक्षणा । मध्यादवयतीत्यादौ विभागप्रयोजकक्रियानाश्रयस्य तन्निरूपकस्याधोभागस्यापादानत्वम् ॥

नैयायिकास्तु विभागाश्रयत्वमेवापादानत्वमिच्छन्तो व्याघ्राद्बिभेतीत्यादौ लक्षणया प्रयोगं क्रियान्तरकल्पनेन वा उपपदविभक्तित्वमिच्छन्ति ।

एवं धावतोऽश्वात्पतति इत्यत्राश्वस्योक्तक्रियाश्रयत्वेऽपि तस्य विभागहेतुत्वाभावादपादानत्वोपपत्तिः । न चैवं मेषान्मेषोऽपसरति इत्यत्र

मेषस्य कथमपादानत्वम्, उभयकर्मजविभागस्यैक्येन तज्जनकक्रियानाश्रयत्वाभावादिति वाच्यम् । विभागजनकक्रियाभेदादेकक्रियामादायापादानत्वम् । अन्योन्यस्मादपसरत इत्यत्रोभयकर्मजविभागस्यैक्येपि तत्तज्जनकक्रियामादाय परस्परस्य तदनाश्रयत्वोपपादनात् । वृक्षाद्वस्त्रं पततीत्यत्र पतनक्रियाधात्वर्थमादाय सङ्गमनीयम् । न चैवं वृक्षात्स्पन्दत इत्यापत्तिः । गृहाच्चलितः राज्याच्चालित इत्यादिवदिष्टत्वात् ॥

(१)केचित्तु पञ्चमीजन्यापादानत्वबोधेन द्वितीयाया असाधुत्वादित्याहुः ॥

वलाहकाद्विद्युद्विद्योतते इत्यत्र निसृत्येत्यध्याहारेणोपपदविभक्तिः । एवमन्यादिपदसमभिव्याहारे तु पञ्चम्युपपदविभक्तिः । "अन्याराादितरर्ते दिक्छब्दाञ्चूत्तरपदाजाहियुक्ते" इति सूत्रात् । अन्यपदेन अन्यार्थकेतरादिपदग्रहणम् । कृष्णादन्यस्तिष्ठति, आराद्वनात्, कृष्णादितरः, ऋते कृष्णात् । कालदेशसमभिव्याहारे—ग्रामात्पूर्वश्चैत्रात्पूर्वः । अञ्चूत्तरपदं प्राक्प्रत्यगादिपदं तत्समभिव्याहारे–ग्रामात्प्राक् । आच्प्रत्ययान्तदक्षिणासमभिव्याहारे—दक्षिणा ग्रामात् । दूरवाचकाहिपदसमभिव्याहारे दक्षिणाहि ग्रामात् । अत्र पञ्चम्यर्थस्य उपपदार्थेऽन्वयः । इदं च प्रभृत्यादिपदानामुपलक्षणम् । भवात्प्रभृति आरभ्य । ग्रामाद्बहिः । एवं विनापृथगित्यादिपदसमभिव्याहारे–द्वितीयातृतीयाभ्यां विकल्पिता पञ्चम्युपपदविभक्तिः । एवं दूरान्तिकार्थकपदसमभिव्याहारे–द्वितीयाषष्ठीभ्यां विकल्पिता पञ्चम्युपपदविभक्तिः । ग्रामस्य ग्रामाद् ग्रामं दूरेणान्तिकेनेति ॥

॥ इति कारकवादे पञ्चम्यर्थनिरूपणम् ॥

सप्तम्या अधिकरणत्वमर्थः । "सप्तम्यधिकरणे चे"ति सूत्रात् । अधिकरणत्वं चाधारत्वम् । "आधारोधिकरणमि"ति सूत्रात् । तच्चाश्रयत्वं, तच्च साक्षात्परम्परासाधारणम् । परम्परा कर्तृकर्माद्याश्रयत्वद्वारा । तेन–स्थाल्यां पचति, भूमौ वसति, कटे शेते, इत्यादिप्रयोगः ।

अधिकरणं च त्रिविधम्, औपश्लेषिकं वैषयिकमभिव्यापकं चेति, तेन गुरौ वसति, घटे ज्ञानं, तिलेषु तैलमित्यादिप्रयोगः ।

चर्मणि द्वीपिनं हन्ति इत्यत्र निमित्तत्वे लक्षणा । चर्मनिमित्तं हन्तीत्यर्थः । निमित्तत्वं च धात्वर्थजनकेच्छादिविषयत्वम् । गोषु दुह्यमानास्वागत इति सतिसप्तमी । "यस्य च

(१) 'केचित्तु पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वाद् वृक्षात्स्पन्दत इति न प्रयोग इत्याहुः' इति पाठोऽत्र रम्यः प्रतिभाति ।

भावेन भावलक्षण"मिति सूत्रात् । क्रियान्तरोपलक्षणं यत्रा- न्या क्रिया तद्वाचकपदोत्तरं सप्तमीति तदर्थः । तेन क्रियान्तरोपलक्ष- णत्वं सप्तम्यर्थः । उपलक्षणत्वं च क्रियाकालान्तरव्यावर्त्तकत्वम् । एवं मुख्यक्रियाप्रतिबन्धकक्रियानादरे लक्षणा । यथा रुदति प्राव्राजीदिति । रोदनमनादृत्येत्यर्थः । अत्र षष्ठ्या अपि लक्षणा । "षष्ठी चानादरे" इति सूत्रात् । एवं गोषु गवां वा स्वामी, ईश्वरः, अधिपतिः । वैश्वा- मित्राणां वैश्वामित्रेषु वा दायादो देवरात इत्यादिषु च । साक्षी चैत्र- स्य धने वा प्रतिभूः गवां गोषु वा प्रसूत इत्यादौ षष्ठीसप्तम्योरुपपद- विभक्तित्वं, श्रूयमाणस्वामित्वादिक्रियासम्बन्धेन मुख्यक्रियासम्बन्धि- त्वात् । गोषु प्रसूत इत्यत्र कल्पितज्ञानक्रियायामन्वयाच्च । गोज्ञानार्थं प्रसूत इत्यर्थः । एवं हरिपूजने आयुक्तः आसक्तः कुशल इत्यत्रापि । एवं निर्धारणमपि षष्ठीसप्तम्यर्थः । जातिगुणक्रियाणामेभिरभिव्यज्य- मानभेदनिरूपकत्वं निर्द्धारणत्वम् । अत्र भेदाधिकरणभेदनिरूपकयो- र्व्याप्यव्यापकरूपावच्छिन्नत्वं बोध्यम् । तेन नराणां नरेषु वा क्षत्रियः शूरः, गोषु कृष्णा सम्पन्नक्षीरा, गच्छत्सु धावन् शीघ्रः, छात्रेषु मैत्रः प्रिय इति प्रयोगो न तु विप्रेषु क्षत्रियः शूर इत्यादिप्रयोगः । नरत्वाव च्छिन्ननिरूपितभेदानधिकरणत्वे सति क्षत्रियत्वावच्छिन्ननिष्ठमन्यनर- भेदसमानाधिकरणं शूरत्वमिति बोधः ।

न चैवम्—

इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥

इत्यत्र—

मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः ।
स्थावरस्य तु सर्वस्य न पिता न पितामहः ॥

इत्यत्र च निर्धारणषष्ठी न स्यादभेदभानादिति वाच्यम् । कर्मभेद- स्य आत्मदर्शने निर्धारणसम्भवात्, द्वितीये तु सर्वस्येति षष्ठ्या नि- र्धारणत्वसम्भवात् । अत एव माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यत्र निर्धारणैकदेशे पञ्चम्या लक्षणा । अभेदभानाभावात् । एवं मा- तरि साधुर्निपुणो वेत्यत्रापि । हरिं हरौ वा उत्सुकः प्रसितः । मूलेना- वाहयेदित्यत्रापि लक्षणेति दिक् । अत्र चोपपदविभक्तितः कारकविभ- क्तेर्बलीयस्त्वम् । कारकविभक्त्यर्थस्य श्रुतक्रियान्वयित्वात् । उपपदवि भक्त्यर्थस्य कल्पितक्रियान्वयित्वादिति दिक् ॥

इति गागाभट्टकृते भाट्टचिन्तामणौ कारकवादः ॥

अथ समासवादः ।

समासश्चतुर्विधः । अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात् । तत्र पूर्वपदार्थप्रधानोऽव्ययीभावः । यद्वा अव्ययार्थप्रधानोऽव्ययीभावः, तेन सूपप्रतीत्याद्यव्ययीभावे नाव्याप्तिः । उत्तरपदार्थप्रधानस्तत्पुरुषः । उभयपदार्थप्रधानो द्वन्द्वः । अन्यपदार्थप्रधानो बहुव्रीहिः । इति लक्षणानि ।

उपकुम्भं, राजपुरुषः, धवखादिरौ, चित्रगुरित्याद्युदाहरणानि । नीलोत्पलमिति कर्मधारयः पञ्चमूलीति द्विगुश्च तत्पुरुषस्यैव भेदौ ।

ननून्मत्तगङ्गमित्यव्ययीभावे तल्लक्षणमव्याप्तमतिव्याप्तं च बहुव्रीहिलक्षणम् । एवं सुपप्रतीत्यादावव्ययीभावे सुप्प्रतिना मात्रार्थे इति सूत्रविहिते तत्पुरुषलक्षणातिव्याप्तिरुत्तरपदार्थप्राधान्यात् । एवमर्द्धं नपुंसकम् इत्यादिसूत्रविहिते ऽर्धपिप्पली पूर्वकाय इत्यादितत्पुरुषे ऽव्ययीभावलक्षणातिव्याप्तिः । एवं द्वित्रा इति बहुव्रीहौ तल्लक्षणाव्याप्तिः द्वन्द्वलक्षणातिव्याप्तिश्च । एवं शशकुशपलाशमिति समाहारद्वन्द्वे समाहारप्राधान्याद् द्वन्द्वलक्षणस्याव्याप्तिः। बहुव्रीहिलक्षणस्य चातिव्याप्तिरिति चेदु-

न, तेषां प्रायिकत्वेन लक्षणत्वाभावात् । तत्तदधिकारपठितत्वमेव तत्तल्लक्षणमिति वैयाकरणाः ॥

वस्तुतो (१)ऽव्ययार्थप्रधानत्वाविद्यमानावयवार्थत्वविशिष्टान्यपदार्थप्रधानत्वान्यतरत्वमव्ययीभावत्वं, तेनोन्मत्तगङ्गं सूपप्रतीत्याद्यव्ययीभावे नाव्याप्तिर्न वा तत्पुरुषलक्षणातिप्रसङ्गः । समस्यमानान्यतरपदार्थप्रधानत्वे सति सुब्लोपाभाववत्पदान्तत्वं तत्पुरुषत्वं, तेन राजपुरुषोऽर्द्धपिप्पलीत्यादितत्पुरुषे न लक्षणाव्याप्तिर्न वाऽव्ययी(२)भावे लक्षणातिप्रसङ्गः । एवमन्यपदार्थप्रधानत्वं बहुव्रीहित्वम , द्वित्रा इत्यत्रापि समस्यमानपदार्थसङ्ख्येयप्राधान्येन बहुव्रीहित्वमन्यपदार्थतावच्छेदकं चात्रा-(३)ल्पत्वम् । एवं च सङ्ख्ययाव्ययेति सूत्रं सङ्ख्येयप्राधान्यगमकं सङ्ख्या-

(१) उपकुम्भं सूपप्रतीत्यादौ अव्ययार्थस्य प्रधानत्वम्, उन्मत्तगङ्गमित्यादौ अविद्यमानावयवार्थत्वेसति अन्यपदार्थप्रधानत्वम् अन्यपदार्थे च संज्ञायामिति सूत्रेण संज्ञाया मव्ययीभावबोधनेन रूढत्वावगमेनावयवानां निरर्थकत्वावगमादिति बोध्यम् ।

(२) ननु उपकुम्भम् उपशरदम् इत्यादौ सुब्लोपाभाववद्यत् पदं तदन्तत्वस्य सत्त्वेनाव्ययीभावे तत्पुरुषलक्षणातिप्रसङ्गः स्यादिति चेन्न सुप्त्वावच्छिन्नोद्देश्यताको यो लोपस्तद्योग्यत्वाभाववद्यत्पदं तदन्तत्वमिति तदर्थ इति स्वीकारेण प्रकृते नाव्ययीभावादिति लोपनिषेधेऽपि तद्योग्यत्वात् ।

(३) कति ब्राह्मणा इति पृष्टे द्वित्रा इत्युत्तरेण अल्पे ब्राह्मणा इति गम्यते तदाह अन्यदार्थेति । वस्तुतस्तु द्वित्रा इत्यस्य द्विव्यन्यतरा इत्यर्थ इति अन्यपदार्थप्राधान्यं स्फु-

वाचकाव्ययादिपदानां बहुव्रीहिविधायकमिति सङ्गच्छते । एवं दिङ्नामान्यन्तरालइत्यादिसूत्राण्यन्यपदार्थप्राधान्येन बहुव्रीहिविधायकानि भवन्ति । यथा उत्तरपूर्वा केशाकेशि भुजाभुजि सपुत्र इति । अत्रांशे तुल्यसम्बन्धित्वमन्यपदार्थतावच्छेदकम् ।

अत एव—

एकद्वैरथ वा द्वित्रैर्भ्रमरा मधुसीकरैः ।
कुक्षिम्भराः परं तेऽपि न सन्ति खलु केतके ॥

इत्यादावल्पत्वपरिच्छिन्नव्यक्तीनां बोधः । एवमुपदशा इत्यत्रान्यपदार्थनवैकादशव्यक्तीनां बोधः । अतोऽत्राप्यन्यपदार्थप्राधान्यमव्याहतम् । एवं तेन सहेति तुल्ययोगे इति सूत्रविहिते सपुत्र इति बहुव्रीहौ तुल्यक्रियान्वयी पिताऽन्यपदार्थ इति बहुव्रीहित्वं सुस्थम् । समाहारद्वन्द्वे तु समाह्रियमाणानामेव क्रियान्वयित्वेन समाहारस्याप्राधान्यान्न द्वन्द्वलक्षणाव्याप्तिर्बहुव्रीहिलक्षणातिव्याप्तिश्चेति युक्तम्(१) ॥

अन्ये तु उन्मत्तगङ्गमित्यादीनां बहुव्रीहित्वं द्वित्रा इत्यादौ द्वन्द्वत्वादिकमेव । अव्ययीभावबहुव्रीह्यधिकारपाठस्तु तद्धर्मनपुंसकत्वस्वरादिप्राप्त्यर्थः । अन्यथाधिकारसूत्रविरोधापत्तेः । न च तत्रापि प्रकरणविरोधापत्तिः । अधिकारसूत्रश्रुत्यनुरोधेन प्रकरणबाधस्य न्याय्यत्वात् । अन्यपदार्थे च संज्ञायामित्यव्ययीभावस्य समभिव्याहारविशेषे ऽन्वर्थताबाधवत् तेन प्रकरणबाधाच्च । अत (२)उक्तान्येव लक्षणानीत्याहुः ॥

अत्र वैयाकरणाः राजपुरुष इत्यादितत्पुरुषादीनां राजविशिष्टपुरुषादौ शक्तिः । न तु समासान्तर्गतराजादिपदशक्त्या राजादिबोधः । समर्थः पदविधिरिति महाधिकारेण एकार्थीभावलक्षणे सामर्थ्ये समासादिसकल(३)वृत्तिविधानात् । पदोद्देशेन विधीयमानः समासादिः समर्थः विग्रहवाक्यार्थाभिधाने शक्तिं प्राप्त इति सूत्रार्थः ।

टम्, अत एव न बहुव्रीहाविति सूत्रे शब्दरत्ने एकद्वा इत्यत्र द्विशब्दस्योपसर्जनत्वमुक्तम् अतएव च अन्यपदार्थप्राधान्यमाश्रित्य 'अनेकमन्यपदार्थे' इत्यनेन सिद्धिं कृत्वा संख्ययाव्ययासन्नेति सूत्रं भाष्ये प्रत्याख्यातमिति बोध्यम ।

(१) युक्तमिति । विशेषणीभूतसमाहारगतैकत्वमादाय चैकवचनम् । इतरेतरयोगेतु समाहारोविशेषणतयापि नभासते इति द्विवचनाद्युत्पत्तिः विग्रहे चशब्दस्त्वशब्दार्थविवरणमिति बोध्यम् ।

(२) उक्तानीति । पूर्वपदार्थप्रधानोऽव्ययीभाव इत्यादीनीत्यर्थः । आहुरित्यत्रारुचिबीजं तु सकलाभियुक्तव्यवहारविरोध एवेति ।

(३) सकलवृत्तीति । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपसकलवृत्तीत्यर्थः ।

एकार्थीभावश्च समस्यमानपदद्वयस्य स्वार्थपरित्यागेनैकार्थ-प्रतिपादकत्वम् । स चार्थोऽराजकीयभिन्नो राजसम्बन्धवांश्चायमिति भेदरूपः संसर्गरूपश्च(१) ।

न च क्लृप्तराजादिपदशक्तित एव तादृशोपस्थितिसम्भवे किं समासशक्तिकल्पनेनेति वाच्यम् । राजपुरुषादिपदे उक्तरूपेणोप-स्थितये चित्रग्वादिपदे स्वामित्वेनोपस्थितये च तत्कल्पनात् । अन्यथा पङ्कजादिपदेऽपि पद्मत्वेनोपस्थितये ऽतिरिक्तशक्तिकल्पनं न स्यात् । किं च समासगतराजपदेन राज्ञः (२)स्वतन्त्रोपस्थिते राजा पुरुष इत्यत्रेव विशेषणान्वयापत्तिः ।

न च सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति निषेधेन तदनापत्तिः । तस्य विशिष्टशक्तिसिद्धपदार्थैकदेशत्वकृतानन्वयानुवा-दकत्वात् । अपि चैवं वाक्यसमासयोस्तुल्यार्थत्वेन विभाषावचनस्य स-मासनियमनिवारणार्थत्वं कल्प्यमिति गौरवम् । किं च कृतविश्वः प्रा-प्तोदक उद्धृतौदन इत्यादिबहुव्रीहिषु विश्वजनककृतिमान् उदककर्तृ-कप्राप्तिकर्म ओदनोद्धारणावधिरित्याद्यर्थकेषु कृतादिपदानां लक्षणास-म्भवात् । चित्रग्वादिपदे च विनिगमनाविरहेण चित्रपदे गोपदे वा ल-क्षणाऽसम्भवादुभयत्र लक्षणायां बोधावृत्तिप्रसक्तेः ।

न च प्रत्ययार्थान्वयानुरोधेन चरमपदे लक्षणेति वाच्यम् । अने-कपदानामन्यपदार्थप्रतिपादकत्वाभावेन बहुव्रीहित्वभङ्गापत्तेः । न च तात्पर्यग्राहकतयाऽन्येषां तत्प्रतिपादकत्वम् । घटादिपदेष्वप्याद्यवर्णानां तात्पर्यग्राहकतयान्त्यवर्णे शक्त्यापत्तेः । किं च शिवो नामगायको यस्ये-ति शिवनामगायक इति बहुव्रीहौ शिवकर्तृकगानकर्मीभूतनामवानिति बोधस्य शक्तिकल्पनं विना सुतरामनुपपत्तिः ।

---

(१) संसर्गरूपश्चेति । जहत्स्वार्थाऽजहत्स्वार्थे द्वेवृत्ती ते पुनस्त्रिधा । भेदः संसर्ग उ-भयं वेति वाच्यव्यवस्थितेरित्यभियुक्तोक्तेरिति भावः । अयमाशयः यदि राजपुरुष इत्यतो-राजसम्बन्धमात्रं पुरुष बुध्यते तदा राजपुरुषो देवदत्तस्य चेति प्रयोगापत्तिः राजेतरस म्बन्धस्य तेनानिवारणात यदि च राजेतरसम्बन्धिभिन्न इति भेदमात्रं बुध्यते तदा राज-स्वामिके पुरुषे इवास्वामिकेऽपि राजपुरुष इति प्रयोगापत्तिरतः राजेतरसम्बन्धिभिन्नः राजसम्बन्धवाँश्च पुरुष इति बोधः स चावयवशक्त्या न निर्वहतीति एकार्थीभावरूपा शक्तिः स्वीक्रियते अराजकीयभिन्न इत्यत्र नञोराजशब्देन समासे छ इति बोध्यम् ।

(२) स्वतन्त्रोपस्थितेः विशेष्यतयोपस्थितेरित्यर्थः मम तु पदार्थैकदेशत्वान्नपदार्था-न्तरान्वयः ।

अतः समासेषु विशिष्टशक्तिरङ्गीक्रियते। किं च तत्र शक्त्यनङ्गीकारेऽर्थवत्त्वाभावेन प्रातिपदि(१)कसंज्ञा न स्यात्।

न च चित्रगुमानयेत्यादिषु कर्मत्वाद्यर्थबोधकत्वं समस्यमानोत्तरपदार्थगतस्वार्थबोधकत्वं वा समासोत्तरविभक्तीनामिति वाच्यम्। अर्धपिप्पलीत्यादौ व्यभिचारात्। क्लृप्तव्युत्पत्ति(२)भङ्गापत्तेश्च। किं च समासस्य प्रातिपदिकतया तदेकदेशपुरुषादिपदार्थस्य पुरुषादेः प्रातिपदिकार्थत्वाभावेन तत्प्रकारकबाधो न (३)स्यात्। न स्याच्च समस्यमानपदार्थयोः परस्परान्वयः, विभक्तिजन्योपस्थित्यभावेन राजपदार्थप्रकारकबोधायोगात्। अभेदातिरिक्तसम्बन्धेन नामार्थप्रकारकबोधे विभक्तिजन्योपस्थितेर्हेतुत्वात्। किं च राजपदस्य सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः। राज्ञः पुरुष इति वाक्यस्य (४)समासाभिन्नार्थकतया तेन विवरणविरोधात्। नान्त्यः, विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्त्या राजसम्बन्धरूपः पुरुष इति बोधापत्तेः। अतः समासेषु शक्तिरङ्गीकार्येत्याहुः॥

अत्र गौतमीयाः—समासेषु क्लृप्तराजपदादेरेव सम्बन्धिलक्षणया राजसम्बन्ध्यभिन्नः पुरुष इति बोधसम्भवे न शक्तिकल्पनं युक्तम्। महाधिकारस्याप्यजहत्स्वार्थलक्षणव्यपेक्षारूपसामर्थ्यं सामासादिविधानेनोपपत्तेः। पदोद्देशेन विधीयमानः समासादिः समर्थः स्वार्थवाचकपदनिष्ठ इति सूत्रार्थः(५)।

एतेन राजपदार्थे शोभनादिविशेषणान्वयापत्तिः, निष्कौशाम्बिः गोरथ इत्यादौ क्रान्तयुक्तादिपदकल्पनापत्तिश्च परास्ता।

राज्ञः पदार्थैकदेशतया तत्र विशेषणानन्वयात्। लक्षणया क्रान्ताद्युप-

(१) वृत्त्याऽर्थविषयकबोधजनकत्वरूपार्थवत्त्वास्यार्थवत्सूत्रे ग्रहणेन समासे शक्त्यभावे प्रतिपदिकत्वानापत्तिरिति भावः। न च समासग्रहणात्तदिति वाच्यम् समासग्रहणस्य भाष्यादौ नियमार्थत्वस्थापनात्।

(२) प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गेत्यर्थः।

(३) राजपुरुषो देवदत्त इत्यादावित्यर्थः। वस्तुतस्तु समासस्य प्रातिपदिकत्वेऽपि अवयवस्य प्रातिपदिकत्वे बाधकाभावादिदं चिन्त्यम्।

(४) वाक्ये 'राजा, सम्बन्धः, पुरुष' इत्येतत्त्रयं समासे च 'राजा, सम्बन्धी, पुरुष' इत्येतदिति भिन्नार्थकत्वमित्यर्थः।

(५) तथा च 'व्यपेक्षासामर्थ्यमेके' इति भाष्यम्।

स्थितिसम्भवाच्च ।(१)लक्षणाशक्तिभ्यां बोधेच्छायां समासविग्रहनियमेन विभाषासूत्रोपपत्तेः । राजादिपदशक्त्यग्रहे राजपुरुषश्चित्रगुरित्यादौ बोधाभावेन तत्र शक्तिग्रहस्यावश्यकतया पङ्कजादिपदेष्ववयवशक्त्यग्रहेपि बोधोदयेन तच्छक्तिग्रहस्यानावश्यकतया पङ्कजादिपदवैलक्षण्यस्य स्पष्टत्वात् । किं च चित्रगुरिति समासस्य न स्वामित्वादौ शक्तिः सम्भवति, तत्तत्पदेन (२)सेवकदेशादिप्रतीत्या नियमेन तदप्रतीतेः तत्रतत्र शक्तिकल्पनायां नानार्थतापत्तेः, पद्मत्वस्य तु नियतप्रतीत्या तत्र शक्तिरिति वैलक्षण्यम् । किं च प्राप्तोदक इत्यादावपि उदकपदे लक्षणा, प्राप्तादिपदस्य धातुप्रत्ययतदर्थज्ञानविलम्बेन तत्र लक्षणाया विलम्बितत्वात्। प्रत्ययार्थस्य सन्निहितपदार्थगतत्वानुरोधाच्च । अत एव चित्रग्वादिपदेऽपि गोपदे लक्षणा, विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वय व्युत्पत्त्यङ्गीकाराच्च चित्रराजादिपदार्थान्वयसिद्धिः ।

न चैकपदलक्षणायामनेकमन्यपदार्थइति व्याकरणविरोधः तेनानेकस्यान्यपदार्थे वर्त्तमानस्य समासानुशासनादिति वाच्यम् । सर्वपदस्यापि तात्पर्यग्राहकतया परंपरया अन्यपदार्थबोधकत्वात् ।अन्तोऽन्त्यपदे लक्षणा। घटादिपदशक्तिस्तु विशिष्टस्य सङ्केतितत्वाद्विशिष्टे कल्प्यते । अस्तु वान्त्यवर्णे शक्तिः अत्र क्लृप्तराजादिपदादेव लक्षणया तादृशार्थबोधसम्भवे शक्तिकल्पनमन्याय्यम् ।

यत्तु समासेऽर्थवत्त्वाभावात् प्रातिपदिकसंज्ञा न स्यादिति । तत्र- कृत्तद्धितसमासाश्चेति तद्विधानात् (३)शशशृङ्गमित्याद्यनर्थकेषु तद्विधानस्य सप्रयोजनकत्वात् ।

एतेन तत्र कर्मत्वानन्वयदूषणमपास्तम् । समस्यमानपदलक्ष्यार्थगतस्वार्थबोधकत्वव्युत्पत्त्यङ्गीकारात् । विशिष्टशक्तिस्वीकारे उक्तरीत्या (४)उक्तस्मृतिविरोधः । विशिष्टस्यातिरिक्ततयानेकत्वासम्भवात् । अतो लक्षणैव युक्तेत्याहुः ॥

आचार्यादयस्तु बहुव्रीहौ शक्तिरेव, तस्य मतुबर्थसमानार्थकत्वात् मतुपो

---

(१) लक्षणया बोधनेच्छायां समासः शक्त्या बोधनेच्छायां विग्रह इत्यर्थः ।

(२) देवो नाथो यस्येत्यत्र सेवकः चित्रागावो यस्मिन्देश इत्यत्र देश इत्यर्थः ।

(३) समासग्रहणस्य नियमार्थत्वं परिहरति शशेति । शशश्रृङ्गस्यालीकतया सन्मात्रविषयिण्या ईश्वरेच्छारूपशक्तेरभावेन पूर्वसूत्रस्याप्राप्त्या समासग्रहणं विध्यर्थमिति समासे शक्त्यभावेऽपि प्रतिपदिकत्वासिद्धिः ।

(४) उक्तस्मृतीति । 'अनेकमन्यपदार्थे' इति स्मृतीत्यर्थः ।

गोमांश्चैत्र इत्यादावभेदान्वयाय सम्बन्धिवाचित्वनिश्चयात् । अत एवे-न्द्रपीताधिकरणे तत्पुरुषाद्बहुव्रीहौ लाघवमङ्गीकृतमित्याहुः(१) ॥

अत्र मीमांसकैकदेशिनः—"सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते" इति वार्त्तिकात् सर्वेषां कृत्तद्धितसमासरूपयौगिकशब्दानां द्रव्ये शक्तिमाहुः ॥

परे तु अनिर्ज्ञातशक्तिकैकदेशयौगिकपदपरमिदं वार्त्तिकं तेन पाचको गोमानित्यादिकृत्तद्धितानां द्रव्यवाचित्वेऽपि बहुव्रीहेर्न तद्वाचित्वं तत्रापि विशेष्ये द्रव्याविनाभूतगुणवाचकपदबहुव्रीहेरेकहायनी पिङ्गाक्षीत्यादे र्द्रव्यवाचित्वे द्रव्याक्षेपकत्वे वा चित्रगुरित्यादौ तदसम्भवेन द्रव्यलक्ष-णाया आवश्यकत्वात् । अतः क्वचिद्बहुव्रीहौ लक्षणा । न चैवमिन्द्रपी-ताधिकरणविरोधः । इन्द्रपीतपदे तत्पुरुषेपि पूर्वपदलक्षणया पीतपदे हुताहुतशेषलक्षणया लक्षणाद्वयापत्त्या लाक्षणिकबहुव्रीह्यपेक्षया तत्पु-रुषस्य दुर्बलत्वात्सिद्धान्तासिद्धिः । अत एव निषादस्थपत्यधिकरणे लक्षणापत्त्या तत्पुरुषापेक्षया कर्मधारयस्य प्राबल्यमुक्तम् । अन्यथा तत्र (२)ज्ञानोपायाक्षेपलाघवेन बहुव्रीह्यापत्तेर्दुरुद्धरत्वात् । अतः क्वचिद्ब-हुव्रीहौ लक्षणेत्याहुः ॥

ये तु सर्वत्र(३) बहुव्रीहौ शक्तिं मन्यन्ते तेषां भावं नाकलयामः ॥

अन्ये तु मतुपोपि सम्बन्धो वाच्यः । तस्य चैत्रे प्रकारतयाऽन्वयः । सम्बन्धिनि वा लक्षणा । तेन बहुव्रीहेर्न मतुबर्थकत्वमित्याहुः ।

अहं तु ब्रुवे—समासेषु न शक्तिर्न वा लक्षणा, किं तु समासोप स्थितविग्रहवाक्यादेव बोधः । श्लोकादावन्वयवाक्यादिवत् । अत एव रामेश्वर इत्यादौ—

रामस्तत्पुरुषं प्राह बहुव्रीहिं महेश्वरः ।
अन्ये तु ऋषयः सर्वे कर्मधारयमूचिरे ॥

---

(१) आहुरिति । इन्द्रपीतपदं तत्पुरुषेण इन्द्रेण पीतमित्यर्थपरम्, इन्द्रेण पीतः सोमो यस्मिन्निति बहुव्रीहिणा प्रातः सवनपरं वेति सन्देहे तत्पुरुषे पूर्वपदे लक्षणारूपगौरवेण बहुव्री-हिरङ्गीकृतः सच बहुव्रीहौ शक्तिमन्तरा नोपपद्यते उत्तरपदेलक्षणाङ्गीकारस्य तत्रापि सत्त्वात् ।

नच पूर्वपदप्रकृतिस्वरादेव बहुव्रीहिनिर्णये उक्ताधिकरणसिद्धान्तसिद्धौ किमर्थं बहुव्रीहौ शक्तेरङ्गीकार इति शङ्क्यम्, तत्पुरुषेऽपि तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरसम्भ वात् । नच समानाधिकरणानां बहुव्रीहिरिष्यते इति वार्तिकात्कथमत्र बहुव्रीहिरिति वाच्यम् सप्तमीविशेषणे बहुव्रीहाविति सूत्रेण व्यधिकरणबहुव्रीहेरपि क्वचिज्ज्ञापनादित्यलम् ।

(२) सङ्करजातिविशेषस्य तदुपयोगिमन्त्राध्ययनाधिकारकल्पने गौरवमिति भावः ।

(३) सर्वत्रेति एकहायन्यादि शब्दे शक्त्यङ्गीकारेऽपि अन्यत्र तदङ्गीकारे माना-भाव इति भावः ।

इत्यादौ तादृशविग्रहवाक्योपस्थित्यैव बोधः । एवं च विग्रहसंदेहे बोधसंदेहो ऽप्युपपद्यते । अतः समासवाक्यस्य विग्रहवाक्योपस्थित्या बोधजनकत्वं युक्तम् ।

न च बहुव्रीहौ (१)विग्रहवाक्यात्पुरुषप्रकारको बोधः समासे तु पुरुषस्य विशेष्यत्वेन भानमिति कथं वैषम्यमिति वाच्यम् । चित्राणां गवां यः प्राप्तस्योदकस्य यः कृतस्य विश्वस्य य इति विग्रहवाक्यस्यापि तादृशस्याङ्गीकारात् । न चैवं सर्वत्र षष्ठीबहुव्रीह्यापत्त्या शेषो बहुव्रीहिरिति सूत्रानुपपत्तिरिति वाच्यम् । तस्योक्ताऽव्ययीभावादिसंज्ञसमासभिन्नपरत्वात् ।

अत एव(२) निषादस्थपतिमित्यादौ व्यधिकरणतत्पुरुषात् समानाधिकरणतत्पुरुषस्य ज्यायस्त्वं सङ्गच्छते । समानाधिकरण्यवैयधिकरण्ययोर्विग्रहवाक्याधीनत्वादिति ।

विशेषणपदे समानाधिकरण्यं च विशेष्यसमानलिङ्गरूपत्वानुरोधकृतसमानविभक्तिविशेषकत्वम् । तेन देवदत्तस्य पत्न्या इत्यत्र विशेष्यलिङ्गकत्वाभावाद्देवदत्तः पचतीत्यादौ समानविभक्तिकत्वाभावान्नातिप्रसङ्गः । सामानाधिकरण्यं च भिन्नप्रवृत्तिनिमित्तकानामेकत्र प्रवृत्तिः । अत्र लिङ्गनियमाननुशिष्टविभक्त्यन्तत्वं विवक्षणीयम् । तेन देवदत्तो मित्रमित्यादौ न व्यभिचार इति दिक् ॥

अथ राजपुरुष इति तत्पुरुषे पूर्वपदे लक्षणा । न च तत्र लुप्तषष्ठ्यैव संम्बन्धबोधान्न शक्तिर्न वा लक्षणेति वाच्यम् । षष्ठीलोपमजानतोऽप्यर्थप्रत्ययात् । किं चैवं साधुशब्दस्मारकत्वेनापभ्रंशोपयोगवद्विग्रहस्मारकत्वमात्रेण समासोपयोगः स्यात् ।

न च सम्बन्धस्य संसर्गतया भानोपपत्तेर्न लक्षणेति वाच्यम्, विग्रहसमासयोर्भिन्नार्थत्वापत्तेः। विग्रहवाक्ये सम्बन्धस्य प्रकारतया भानेन समासे संसर्गत्वायोगात् । अतो लक्षणावश्यिकेति—

---

(१) विग्रहेति । पीतमम्बर यस्येति विग्रहात् यत्सम्बन्धि पीतमम्बरमिति बोधः समासात्तु पीताम्बरसम्बन्धीति भावः ।

(२) रौद्रं वास्तुमयं चरुं निर्वपेदिति प्रकृत्य श्रूयते 'एतया निषादस्थपतिं याजयेत्' इति वास्तुमयं—वास्तुशाकबीजप्रकृतिकमित्यर्थः । याजयेदित्यत्र णिजर्थोऽविवक्षितः याजनस्य रागतः प्राप्तत्वेन विधानस्यानर्थक्यात् । इदमत्राधिकरणस्वरूपम् यदि निषादस्यस्थपतिरितिषष्ठीतत्पुरुषः स्यात्ततः त्रैवार्णिकस्याधिकार इति संकरजातिविशेषस्य निषादस्याधिकारित्वाभावाद्यद्यपिनापूर्वविद्याकल्पनं तथापि निषादपदस्य निषादसम्बन्धिनि लक्षणायां गौरवमितिकर्मधारयोऽङ्गीक्रियते इत्यपूर्वविद्याकल्पनमिति ।

अत्र पक्षधरः । राजपदेन राजसम्बन्धी लक्ष्यते । राजसम्बन्धी पुरुष इत्यनुभवात् । विरुद्धार्थकाविभक्त्यवरुद्धयोः प्रातिपदिकार्थयोर्भेदान्वयस्य व्युत्पत्तिसिद्धत्वात् । एवं घटो नेत्यत्रापि घटपदेन घटप्रतियोगिकलक्षणया घटप्रतियोगिकाभावयोरभेदान्वयानुभवः । अतो राजपदेन सम्बन्धी लक्ष्यत इत्याह ।

अन्ये तु राजपदेन सम्बन्ध एव लक्ष्यते, लाघवात् । न चात्राभेदस्य नियमतः प्रतीतिः । नीलोत्पलमित्यादिसमानाधिकरणतत्पुरुषेऽपि नीलस्यैव समवायेन प्रकारत्वाद्भेदान्वयः । नीलमुत्पलमिति वाक्ये तु समानविभक्त्यवरुद्धत्वस्य विरुद्धविभक्त्यनवरुद्धत्वापेक्षया लघुतया तन्त्रत्वादस्त्वभेदान्वयः । एव च भिन्नप्रवृत्तिनिमित्तकत्वे सति एकधर्म्युपस्थापकत्वरूपं समानाधिकरण्यं नीलघटयोरभेद इत्यादिव्यवहारश्च युज्यते । नीलरूपघटत्वयोराश्रयाभेद इति वाक्यार्थः । तेन समासे समानविभक्तिकत्वाभावादभेदप्रत्ययायोगेन सम्बन्धमात्रं लक्ष्यते । अर्धपिप्पलीत्यत्रापि पिप्पलीपदेन सम्बन्ध एव लक्ष्यत इत्याहुः ॥

परे तु नीलोत्पलमिति कर्मधारये नीलपदस्य नीलवति लक्षणा । अभेदश्चोत्पले प्रकारतया भासते व्याससमासयोः समानप्रकारकभानजनकत्वनियमात् । यदि च व्यासेपि कर्मत्वार्थकद्वितीयाया अभिन्नेलक्षणा तस्य चोत्पलेऽभेदेनान्वयस्तदा समासेऽप्यभिन्ने लक्षणेति समानार्थकत्वोपपत्तिरित्याहुः ॥

अन्ये तु विशेषणविभक्तेः साधुत्वार्थत्वादभेदस्य व्यासे समासेपि संसर्गतयैव भानम् । अन्यथाऽभिन्नलक्षणायां नीलाभिन्नाभिन्नमुत्पलमिति बोधः स्यात् । अभेदलक्षणायामपि लक्षणैव दोषः । अतः कर्मधारये न लक्षणा । अत एव निषादस्थपतिशब्दे तत्पुरुषबहुव्रीह्यपेक्षया लक्षणाभावलाघवेन कर्मधारयोऽङ्गीकृतः । अङ्गीकृतं च फलमुखमध्ययनप्रयुक्तं गौरवमित्याहुः ॥

चार्थे द्वन्द्व इति विहिते द्वन्द्वे पदद्वये लक्षणा । तथाहि । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चत्वारश्चार्थाः । तुल्यवदुभयोः क्रियाप्रयोजकत्वे समुच्चयः । अन्यतरस्याप्रयोजकत्वेऽन्वाचयः । चकारसमभिव्याहार एवैतद्बोधक इति न तयोः समासः । चार्थे द्वन्द्व इति सूत्रेण चकारमात्रबोधितेर्थे द्वन्द्वविधानादनयोश्चकारं विना अपिशब्देनापि बोधाच्च । इतरेतरयोगसमाहारयोस्तु चकारमात्रार्थत्वात्तत्रैव समासः । यथा धवखादिरौ छिन्धि कुशपलाशमानयेति । अत्रेतरेतरयोगद्वन्द्वस्थपदोपस्थितयोर्धवखादिरयोश्छिदादिक्रियान्वयेन द्वित्वान्वयेन च

कुत्रापि न शक्तिर्लक्षणा वा, घटौ घटा इत्यादिसरूपैकशेषेपि न लक्षणा, घटपदाच्च शक्त्यैव युगपन्नानाघटोपस्थितौ द्वित्वबहुत्वान्वयसम्भवात्, पितराविह्यादिविरूपैकशेषेषु पितृपदेन जनकदाम्पत्ये लक्षिते द्वित्वान्वये लक्षणैव, पाणिपादमित्यादौ समाहारद्वन्द्वेप्येकत्वान्वयानुरोधेन तावत्पदार्थवृत्तिरेकबुद्धिविषयरूपः समाहारो लक्षणयोपस्थाप्यते इति सिद्धान्तः ।

अत्र केचित्—इतरेतरयोगे विभक्त्युपस्थिते द्वित्वादिसंख्याया धवे खदिरे चान्वयः । तत्र च न धवत्वाद्यन्वयितावच्छेदकं द्वित्वपर्याप्त्यधिकरणत्वानवच्छेदकत्वाद्, विभक्तेः प्रकृत्यर्थतावच्छेदकव्याप्यसंख्याभिधायकत्वनियमात् ।अतो (१)धवपदं साहित्याश्रयतया धवखदिरौ लक्षणयोपस्थापयतीति साहित्यावच्छिन्ने द्वित्वान्वयः । नचैवं खदिरपदवैयर्थ्यम् । साहित्याश्रयविशेषलाभतात्पर्यकत्वात् । (२)वृत्तिद्वयविरोधापत्त्या धवेपि लक्षणैव, अत इतरेतरयोगद्वन्द्वे लक्षणा आवश्यका । एवं च मित्रावरुणपदे मित्रयोर्वरुणयोरिति विग्रहोपदर्शकं वाक्यमुपपद्यते । अन्यथा द्विवचनानुपपत्तेः ।

(३)एवं समाहारद्वन्द्वेप्येकत्वान्वयार्थं साहित्ये लक्षणावश्यिका ।

---

(१) अतो धवपदमिति । अयंभावः—आकाशघटगतद्वित्वस्य प्रत्येकावृत्तेः समुदायावृत्तित्वमिति नियमेन आकाशेऽपि सत्त्वमतः आकाशावित्यस्य प्रामाण्यापत्तिरतः प्रकृत्यर्थतावच्छेदकव्याप्यसंख्याबोधकत्वं सुपामिति नियम आस्थीयते एवं च धवखदिरावित्यत्र यदि धवत्व खदिरत्वं च प्रकृत्यर्थतावच्छेदकं स्यात्तदा धवद्वयस्य खदिरद्वयस्य च प्रतीतिः स्यादतो धवपदं साहित्याश्रयत्वेन धवखदिरौ लक्षणयोपस्थापयति साहित्याश्रये च द्वित्वान्वयस्ततश्च प्रकृत्यर्थतावच्छेदकसाहित्यव्याप्यत्वं न धवद्वयगतद्वित्वस्य नापि खदिरद्वयगतद्वित्वस्य किन्तु धवखदिरगतद्वित्वस्यैवेति ।

(२) ननु धवपदेन शक्त्यैव धवोपस्थितिसम्भवे साहित्याश्रयखदिरमात्रे लक्षणाऽस्तु किं साहित्याश्रयधवखदिरलक्षणयेत्यत आह—वृत्तिद्वयेति ।

(३) एवमिति । इतरेतरयोगे साहित्याश्रये लक्षणा द्वित्वस्य च साहित्याश्रयेऽन्वयः समाहारद्वन्द्वे च साहित्ये लक्षणा तत्र चैकत्वान्वय इति विशेषः ।

वैयाकरणास्तु—धवखदिरावित्यादावितरेतरयोगद्वन्द्वे उद्भूतावयवभेदः समूह एव समासशक्यः पाणिपादमिति समाहारद्वन्द्वे च अनुद्भूतावयवभेदः समूह एव समासशक्यः, अत एव गोस्त्रियोरिति सूत्रे भाष्ये समासार्थेऽवयवार्थस्य विशेषणत्वात् प्रथमानिर्दिष्टत्वाच्चोपसर्जनत्वेन कुक्कुटमयूर्याविमे इत्यत्र प्राप्तस्य 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वस्य वारणाय 'द्वन्द्वे प्रतिषेधो वक्तव्य' वार्तिकमारब्धम् एवं च उभयत्रापि समूह एव विशेष्यः उभयपदार्थप्रधानो द्वन्द्व इति व्यवहारस्तु समूहस्यावयवभेदेनाप्रतीतत्वादुपपाद्यः ।

परं त्वितरेतरयोगद्वन्द्वे साहित्याश्रये लक्षणा, एवं च विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तिरपरित्यक्ता भवति । एवं सरूपैकशेषस्थलेपि साहित्योपस्थित्या द्वित्वान्वय्यर्थे लक्षणेत्याहुः ॥

(१)तत्र प्रत्यक्षेणैव पदद्वयेनोपस्थितेऽर्थद्वये द्वित्वान्वयसम्भवात् । (२)योग्यतावच्छेदकप्रकारकज्ञानस्य शाब्दबोधहेतुत्वे मानाभवात् विभक्तेः पदार्थतावच्छेदकधर्मसमानाधिकरणसंख्याभिधायकत्वाच्च । अत एव (३)घटेन जलमाहरतीत्यसच्छिद्रेतरत्वेन न घटोपस्थितिः किं तु घटत्वेनैव, घटश्च पटश्च स्त इति द्वित्वान्वयश्च ।

एतेन सुप्तिङोरेकसंख्याभिधायकत्वलक्षणसमानाधिकरण्यनियमादेकत्वेनोपस्थिते द्वित्वान्वयासम्भवाच्चैत्रो मैत्रश्च गच्छत इत्यादौ चकारोपात्तसाहित्यान्वयिनि द्वित्वान्वयेन क्रियायां वा द्वित्वान्वयेन

यत्तु—इतरेतरयोगद्वन्द्वे साहित्य विशेषणं समाहारे द्वन्द्वे च विशेष्यमिति तन्न—'चार्थे द्वन्द्व' इति सूत्रे भाष्ये 'चार्थेविधीयमानस्य द्वन्द्वस्य चार्थवदेवालिङ्गसङ्ख्यतामाशङ्क्य शब्दशक्तिस्वभावेन गुणवचनानामिवाश्रयतोलिङ्गवचनानीत्यनेन वा परिहृतम् तच्चेतरेतरयोगद्वन्द्वे समूहस्य विशेष्यत्वे एवोपपद्यते विशेषणत्वे तु धवखदिरयोर्विशेष्ययोरालिङ्गसंख्यत्वाभावेन शङ्कासमाधाने निर्दले स्याताम् नच समाहारद्वन्द्वविषयक तद्भाष्यमिति भ्रमितव्यम् समाहारद्वन्द्वे वाचनिकलिङ्गवचनयोः सत्वेन शङ्काया एवानुत्थितेः ।

सचाय समूहो न पूर्वपदलक्ष्यः, उत्तरपदलक्ष्यः पूर्वपदलक्ष्यो वेत्यत्र विनिगमकाभावात्, नच प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वमिति व्युत्पत्तेरेवोत्तरपदलक्षणायां विनिगमकत्वमिति वाच्यम् । तादृशव्युत्पत्तिस्वीकारे राज्ञः पुरुषः इत्यत्र षष्ठ्याः पुरुषगतसम्बन्धबोधकत्वापत्तेः । नापि समुदायलक्ष्यः, अनुपपत्तिप्रतिसन्धानं विनापि समूहबोधादिति वदन्ति ।

(१) साहित्याश्रये लक्षणाया अनावश्यकत्वं बोधयन् विभक्तेः प्रकृत्यर्थतावच्छेदकसमानाधिकरणसंख्याबोधकत्वमभ्युपगम्य पदद्वयोपस्थितेऽर्थद्वये संख्यान्वयमुपपादयति तत्रेत्यादिना ।

(२) ननु साहित्यस्य इतरेतरयोगद्वन्द्वेऽभाने द्वित्वान्वययोग्यतावच्छेदकसाहित्यमन्तरा द्वित्वान्वयो दुर्लभ इत्यत आह—योग्यतावच्छेदकेति ।

(३) अयं भावः—उपस्थिते योग्ये एव द्वित्वान्वयः नतु योग्यतावच्छेदकोपस्थित्यपेक्षेति एतदेव दृष्टान्तेन द्रढयति—घटेन जलमाहरतीत्यत्रेति ।

नच तादृशनियमानभ्युगमे आकाशावित्यस्य प्रामाण्यापत्तिरिति वाच्यम् द्वित्वं द्वयोरेव पर्याप्तं नत्वेकत्रेति प्रतीत्या पर्याप्तेः प्रत्येकावृत्तेरपि समुदायवृत्तित्वस्वीकारेणाकाशावित्यस्य प्रामाण्यापत्तेरयोगात ।

बोधः। अन्यथा एकत्वेनोपस्थिते द्वित्वान्वये एको द्वाविति प्रतीत्याप त्तिरिति परास्तम्।

वस्तुतो यत्र सुबुपस्थाप्यसंख्या तिङुपस्थाप्यसंख्याविरोधिनी तत्र सामानाधिकरण्यानुपपत्तिः। सुब्द्वयोपस्थाप्यैकत्वद्वयस्य तिङुपस्थाप्यद्वित्वेन विरोधाभावाद् घटश्च पटश्च स्त इति प्रयोगो युक्तो न त्वेको द्वाविति तत्रैकत्वस्य विरोधित्वादिति। न च समाहारलक्षणायां पाण्यादीनां क्रियान्वयो न स्यादिति वाच्यम्। (१)परंपरासम्बन्धेन पाण्यादौ क्रियान्वयाङ्गीकारात्।

केचित्तु एवं नञ्तत्पुरुषेऽप्यघटः पट इत्यादौ घटप्रतियोगिकान्योन्याभावे नञो लक्षणा, तत्राप्यन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य व्युत्पत्तिलभ्यत्वादन्योन्याभावमात्रे लक्षणा। एवं च घटप्रतियोगिकान्योन्याभाववान् पट इति बोधः। एवं न घट इति वाक्येऽपि लक्षणैव। नञः संसर्गाभावे शक्तत्वादिति दिक्॥

इति भाट्टचिन्तामणौ समासवादः॥

अथ नञर्थवादः।

अथ नञर्थो विचार्यते। घटो नास्तीत्यादौ घटपदस्य घटप्रतियोगिकाभावे लक्षणा, नञ् तूपसर्गवल्लक्षणातात्पर्यग्राहक इति नास्त्येव नञर्थ इति केचित्॥

> तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
> अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥

इत्युक्तेः षट्सु शक्तिरित्यन्ये।

संसर्गाभाव एव नञर्थो न भेदः। (२)घटो न पट इत्यादौ नञर्थभेदस्याभेदातिरिक्तसम्बन्धेन पटेऽन्वया(३)सम्भवात्तद्भेदवति लक्षणाया

(१) परम्परासम्बन्धेनेति। स्वाश्रयवृत्तित्वरूपेणेत्यर्थः स्वंसमाहारः।

(२)घटो न पट इत्यादाविति। इदमुपलक्षणम् अघटं द्रव्यमानयेत्यस्य, तत्र भेदसम्बधेनान्वये राज्ञः पुरुषमानयेत्यत्र राजपदोत्तरमिव अघटपदोत्तरमपि द्वितीया न स्यात् प्रकृते तु नञर्थभेदस्य स्वरूपसम्बन्धेन पटेऽन्वयेऽपि बाधकाभावः नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इत्यस्य निपातातिरिक्तनामार्थविषयकत्वादित्यलम्।

(३) असम्भवादिति। नच नञर्थान्योन्याभावस्य स्वरूपसम्बन्धेन पटेऽन्वयसम्भवस्तथाच भेदवति लक्षणाव्यर्थेति वाच्यम्। नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति न्यायविरोधेन तथान्वयासम्भवात्।

आवश्यकत्वात् अतः संसर्गाभाव एव नञर्थ इत्यन्ये ।

संसर्गाभावोऽन्योन्याभावश्च नञर्थः । तादात्म्यसंसर्गावच्छिन्न प्रतियोगिताकाभावत्वं तादात्म्यारोपजन्यप्रतीतिविषयाभावत्वं प्रति-(१)योग्यवच्छेदकदेशकालावच्छेदेन प्रतियोगिसमानाधिकरणाभावत्वं वान्योन्याभावत्वम् । तदन्याभावत्वं संसर्गाभावत्वम् । आरोपश्च प्रत्यक्ष इव शाब्दोपि ग्राह्यः । तेनातीन्द्रियप्रतियोगिकाभावे नाव्याप्तिः । अभावबु-(२)द्धौ प्रतियोग्यारोप एव नियामको नतु तदारोपसम्बन्धो नियामकः। तत्संसर्गे गौरवाद् । घटो भविष्यति घटो नष्ट इत्यादिप्रतीतिविषययोः प्रागभावध्वंसयोर्नञर्थत्वायोगात्कपाले घटो नेत्यादौ अत्यन्ताभावस्यैव प्रतीतेरत्यन्ताभावान्योन्याभावावेव नञर्थौ न संसर्गाभावत्वेन तस्य-शक्तिरिति पितृचरणाः ।

एतेन पीतघटवति नीलघटो नास्तीति प्रयोगः घटो नास्तीत्य प्रयोगश्च । तत्र च नञर्थान्वयितावच्छेदकस्य प्रतियोगितावच्छेदकत्व-नियमः । घटो नास्तीत्यत्र घटत्वस्योभयरूपत्वात् कम्बुग्रीवादिमान्ना-स्तीत्यत्र कम्बुग्रीवादिमत्त्वमेव तथा । न च तस्यान्वयितावच्छेदकत्वेपि गौरवान्न प्रतियोगितावच्छेदकत्वमिति वाच्यम् । उपस्थितस्यैव प्रति योगितावच्छेकत्वे लाघवात् । अननुप्रविष्टत्वेन गौरवाभावात् । अन्वयि-तावच्छेदकता च पर्याप्तिसम्बन्धेन बोध्या तेन घटवति घटपटौ न स्त इति प्रत्ययप्रयोगौ, घटत्वपटत्वयोरन्वयितावच्छेदकत्वेपि तत्पर्याप्त्यनधिकर-णत्वात् । द्वित्वस्यैव तादृशत्वेन प्रतियोगितावच्छेदकत्वादिति केचित् ।

अन्ये तु कम्बुग्रीवादिमान्नास्तीत्यत्रान्वयितावच्छेदकं न प्रतियोगि तावच्छेदकं गौरवात् । घटपटौ न स्त इत्यत्रान्वयितानवच्छेदकमपि प्रतियोगितावच्छेदकं प्रतीतिबलादित्याहुः ।

---

(१) प्रतियोग्यवच्छेदकेति । घटभेदप्रतियोगिनोऽवच्छेदकौ यौ देशकालौ तदवच्छेदेन भेदोऽपि तिष्ठतीति भावः । घटवति भूतले 'घटो न' इति प्रतीतिसाक्षिको भेदस्ति-ष्ठतीति यावत् ।

(२) अभावबुद्धाविति । अभावबुद्धौ प्रतियोग्यारोपस्य हेतुता च प्रतियोग्यनालिङ्गि-ताभावबुद्धेरभावात् कल्प्यते ।

नच नञ्सूत्रे भाष्ये 'नन' एक प्रियम्' इति प्रयुक्तमतः प्रतियोग्यनालिङ्गिताप्यभाव-बुद्धिर्भवतीति वाच्यम् तस्य नोऽस्माकमेकं प्रियं नेत्यर्थस्य कैयटेन करणात् प्रतियोग्य नालिङ्गितत्वासिद्धेः । यच्च आबाधेचेति सूत्रे नन' इति द्वित्वे उदाहृतं भाष्ये तदपि 'नन जागर्ति' इत्यस्यैकदेश इति कैयटेन वर्णनान्न भवदुक्तार्थसाधकम् इत्यलम् ।

अत्र चाभावाधिकरणभूतलादिप्रकारकाभावविशेष्यकबोधेऽधिकरणप्रकारकप्रतियोगिविशेष्यकबोधसामग्रीहेतुः । सा च सप्तम्यन्तभूतलादिपदसमभिव्याहारः । एवमभावप्रकारकाधिकरणविशेष्यकबोधेऽपि तेन—'भूतले घटः, भूतले न घटः, चैत्रः पचति, न पचति चैत्र, इत्यादिप्रयोगप्रत्ययाः । अन्यथा भूतलं न घटः चैत्रो न पाककृतिरित्यत्राधिकरणवाचिसप्तम्यन्तपदाभावेऽप्यत्यन्ताभावबोधः स्यात् । अत एव पृथिव्यां गन्धो न जले इत्यादौ (१)गन्धविशेष्यक एव बोधः।

अन्ये तु नञोऽभावमात्रे शक्तिः। शक्यतावच्छेदकं च लाघवादभावत्वम् अतो नान्योन्याभावे लक्षणा।

(२)न चैवमपि घटपदान्नीलघटत्वप्रकारकप्रतीतौ घटपदलक्षणेवान्योन्याभावप्रकारकप्रतीत्यर्थं नञो लक्षणावश्यिका। अन्यथा न घट इत्यत्राभावप्रकारकप्रतीतौ पटः घटो नेति प्रतीत्यनन्तरं पटः घटो न वेति संशयः स्यात्, भिन्नप्रकारकत्वेनाभावनिश्चयस्याप्रतिबन्धकत्वात् । एवं वाक्ये प्रतिषेधस्थलेऽपि संसर्गाभावप्रतीत्यर्थं लक्षणावश्यिकेति वाच्यम् । प्रतियोग्यधिकरणवाचकपदयोः समानविभक्तिकत्वस्यान्योन्याभावबोधहेतुत्वस्य तयोः प्रथमादिविभक्तिकत्वस्यात्यन्ताभावबोधहेतुत्वस्य च कल्पनया लक्षणाया अभावात् ।

यद्वा नञ्समभिव्याहारे यत्पदार्थयोराधाराधेयभावसंसर्गेणान्वयः। तत्रात्यन्ताभावप्रत्ययः । यत्राभेदसंसर्गेणान्वयस्तत्रान्योन्याभावभानमिति व्युत्पत्तिः । तेन न पचति चैत्र इत्यत्रात्यन्ताभावबोधः सुवचः । किं चात्रात्यन्ताभावबोधो न नियतः । कदा चिदस्मादेव वाक्यात्पाकानुकूलकृतिमद्भिन्नश्चैत्र इत्यन्योन्याभावस्यापि बोधात् अतस्तादृशतात्पर्यज्ञानात्तादृशो बोध इति न लक्षणावश्यिकेति। (३)न चैवं प्रतिषेध

(१) गन्धविशेष्यक एवेति । पृथिवीनिरूपितवृत्तित्ववान् जलनिरूपितवृत्तित्वाभाववांश्च गन्ध इति बोधः। भूतले न घट इति वाक्यात्तात्पर्यवशात् कदाचिद्भूतलवृत्तिर्घटाभाव इति बोधः कदाचिद्भूतलवृत्तित्वाभावान्घट इति बोध इति बोध्यम्,

(२) नचैवमपीति—यथा घटपदस्य घटत्वावच्छिन्नशक्ततया नीलघटत्वप्रकारकबोधजननाय घटपदस्य नीलघटे लक्षणा स्वीक्रियते तथा नञ् पदस्य अभावत्वावच्छिन्ने शक्तत्वेऽपि भेदत्वप्रकारकबोधस्य अभावत्वप्रकारकबोधस्य च जननाय लक्षणावश्यिका अन्यथा भूतलं घटवदिति निश्चयसत्त्वे भूतलं नीलघटवन्नेति संशय इव घटः पटभेदवान्नवेति संशयो दुर्वारः स्यात् ।

(३) नानुयाजेष्वित्यत्र नञः प्रसज्यप्रतिषेधत्वं पर्युदासत्वं वेतिविकल्प्य पर्युदासपक्षे नञ्पदानुयाजपदाभ्यामनुयाजव्यतिरिक्ता यागालक्षणीया इति लक्षणाप्रसङ्गः प्रतिषेधपक्षे च

पर्युदासयोस्तुल्यत्वापत्तिः, इष्टापत्तेः। 'यजतिषु येयजामहं करोति नानुयाजेषु' 'नार्षेयंवृणीते न होतारं वृणीते' इत्यत्र वाक्यभेदकरोत्यनुषङ्ग (१)विकल्पपरिहाराणां पर्युदासबीजत्वात्। एवं च समासे वाक्ये वा क्वापि न लक्षणेति केचित्।

दीधितिकारास्तु संसर्गाभावत्वमन्योन्याभावत्वं च नञः शक्यतावच्छेदकमिति नञो नानार्थत्वं, तथाऽप्यघट इति समासे ऽन्योन्याभाववदुपस्थित्यर्थं नञो लक्षणा। अत एव प्रतिषेधापेक्षया पर्युदासो दुर्बलत्वेन गीयते। नानुयाजेष्वित्यत्र प्रतिषेधेपि न विकल्पापत्तिः। अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यापि विशेषविधिनिषेधयोर्विशेषनिषेधाभ्यनुज्ञाफलकत्वनियमस्य व्युपत्तिसिद्धतया विधिप्रतिषेधयोरेकविषयत्वात्। नानुयाजेष्वित्यत्र तदभावेन वैषम्यात्। अतोऽत्र पूर्वोक्तयुक्त्यैव पर्युदाससिद्धिरित्याहुः।

केचित्तु निषेधस्य प्रसक्तिपूर्वकतया इष्टसाधत्वेन प्रमितस्य निषेधविषयत्वनियमः। एवं च विध्यर्थव्यतिरेकबोधकनिषेधेनानिष्टसाधनत्वं निष्फलत्वं वा निषेधस्य बोध्यत इत्युभयोः प्रामाण्यायोगात् व्रीहिशास्त्रयवशास्त्रयोरिवांशतः पाक्षिकप्रामाण्याङ्गीकारेण विकल्पापत्त्या सामान्यविधेर्विशेषविधिसमभिव्याहारेण तदितरपरत्वरूपपर्युदासाङ्गीकारइत्याहुः।

अनुयाजे न करोतीति श्रुतिवृत्तमेव एवमार्षेयम्वृणीते इति आर्षेयवरणकर्तव्यता प्रतिपाद्यते सा च नञा प्रतिषिध्यते निषेधपक्षे, पर्युदासपक्षे च आर्षेयपदनञ्पदवृणोतिपदैर्लक्षणया आर्षेयवरणव्यतिरिक्ते लक्षणा स्यात्। किंच नञः अनुयाजशब्दसम्बन्धे नञ्समासप्रसङ्ग इति प्रतिषेधत्वमाशङ्क्य, निषेधपक्षे निषेधस्य प्राप्त्यपेक्षतया अनुयाजेषु येयजामहङ्करोतीति शास्त्रेणैव प्राप्तिर्वक्तव्या साच निर्दोषशास्त्रकारितत्वान्मिथ्या कर्तुं न शक्यते इति विकल्प आस्थेय इति गौरवम् पर्युदासे तु लाघवम् अस्मिन्पक्षे समासापत्तिस्तु न नञ्समासस्य वैकल्पिकत्वात्। किं च निषेधपक्षे करोतीत्यस्य अनुषङ्गः वाक्यभेदश्च कर्तव्य इति पर्युदास एवेतिसिद्धान्तितम् शास्त्रदीपिकादौ। तत्र पर्युदासाश्रयणबीजं 'नञः संसर्गाभावेशक्तिः अन्योन्याभावे च लक्षणा इति निषेधाश्रयणे लक्षणापत्तिरेवेति' कस्यचिदभिमतं दूषयितुमुपक्रमते न चैवमित्यादिना।

(१)विकल्पापत्त्येति। प्रथमेप्रयोगे व्रीह्यनुष्ठाने यवशास्त्रे अप्राप्ताप्रामाण्यस्वीकारः प्रतीतप्रामाण्यत्यागः व्रीहिशास्त्रे च प्राप्ताप्रामाण्यत्यागः अप्राप्तप्रामाण्यस्वीकारश्च प्रयोगान्तरे यवानुष्ठाने व्रीहिशास्त्रे अप्राप्ताप्रामाण्यस्वीकारः प्राप्तप्रामाण्यत्यागः यवशास्त्रे च प्राप्ताप्रामाण्यत्यागः अप्राप्तप्रामाण्यस्वीकारश्चेत्यष्टदोषो विकल्पः सचायुक्त इतिभावः।

अत्रेदमाभाति—सर्वत्र नञर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिः अन्यथा नीलघटवति नेह घट इत्यत्यन्ताभावव्यवहारस्य, नीलघटो न घट इत्यन्योन्याभावव्यवहारस्य चापत्तिः, न च पदार्थैकदेशस्य(१) घटत्वस्य कथमभावान्वयः । अभावस्यैव घटेन समन्वये घटत्वावच्छिन्नप्रतियोगितायाः संसर्गत्वात् । सा च विलक्षणप्रतियोगिताविशेष इति केचित् । यत्रानुयोगिवाचकपदे सप्तमी तत्रात्यन्ताभावबोधः, यत्र प्रथमा तत्रान्योन्याभावबोध इति व्युत्पत्तिमाहुः।

परे तु तादृशव्युत्पत्तेः 'न पचति चैत्र' इत्यादावत्यन्ताभावप्रत्यये व्यभिचारात् , एवं वाच्यं—नञ्समभिव्याहाराभावे यत्पदार्थयोराधाराधेयभावसंसर्गेणान्वयस्तत्रात्यन्ताभावप्रत्ययः (यत्राभेदसंसर्गेणान्वयस्तत्रान्योन्याभावप्रत्ययः) इति । एवं च चैत्रः पचतीत्यादावाख्यातार्थयत्नस्य समवायेन चैत्रे भानम् । न पचतीत्यत्र यत्नाभावः तत्सम्बन्धावच्छिन्न एवाधाराधेयभावनियामकस्वरूपसम्बन्धेन चैत्रे भासत इति ।

(२)एवं चैत्रस्य धनमित्यत्रापि षष्ठ्यर्थस्वामित्वस्य धने निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावो विशेषणतया भासते ।

यदि तु (३)स्वत्वं षष्ठ्यर्थस्तदा चैत्रनिरूपितस्वत्वाभाव आश्रयतासम्बन्धेन भासत इति ।

एवं नञ्समभिव्याहाराभावे यादृशप्रतियोग्यनुयोगिवाचकपदयोर्विरुद्धविभक्त्यनवरुद्धयोरभेदान्वयव्युत्पत्तिः तत्समभिव्याहृतनञाऽन्योन्याभावबोधः । अत एव समानविभक्तिकप्रतियोग्यनुयोगिवाचकसमभिव्याहृतनञ्पदजन्यबुद्धिविषयत्वमन्योन्याभावलक्षणमित्याहुः ।

अन्ये तु भूतले न घटः, घटो न पट इत्यत्र भूतलाधिकरणको घटप्रतियोगिकोऽभावः घटप्रतियोगिकभेदवान् पट इति बोधः । यत्र तु घटो नास्ति घटपटौ न स्त इति क्रियासमभिव्याहारस्तत्र लडर्थवर्तमानत्वेन नञर्थान्वयः, तत्रैव च भूतलाधेयत्वान्वयः, एकत्वान्वयस्तु प्रथ-

---

(१) पदार्थैकदेशस्येति । घटत्वस्य घटेऽन्वयात् एकत्र विशेषणतयाऽन्वितस्यापरत्र विशेषणतयाऽन्वयायोग इति न्यायविरोधात् घटत्वस्याभावेऽन्वयो न युज्यते इति भावः । संसर्गत्वादिति । अर्थाद् घटे एवान्वितस्य घटत्वस्याभावे धर्मिपारतन्त्र्येणान्वय इति भावः ।

(२) प्रतियोगिवृत्तिधर्मस्य संसर्गतामभ्युपगच्छतां प्राचीनानां मतेनाह—एवं चैत्रस्येति ।

(३) वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वादिदं मतमयुक्तमित्याशयेनाह—यदि त्विति ।

मान्तघटपदार्थे, तथा च भूतलवृत्तिवर्तमानत्वाभावाश्रय एकत्वाश्रयो घटः, भूतलवृत्तिवर्तमानत्वाभाववन्तौ द्वित्वावाच्छन्नौ घटपटाविति बोधः। एवं जातौ सत्ता नास्तीत्यत्र सत्ताभावो जाताविति बोधो जात्याधेयः सत्ताभाव इति वा बोध इत्याहुः।

अत्र च सर्वत्र प्रातिपदिकार्थे नञर्थे घटपटादीनामभेदातिरिक्तेन-प्रतियोगित्वसम्बन्धेनान्वयः। निपातेषु (१)भिन्नव्युत्पत्तिस्वीकारा-दितिके चित्। घटपदस्य घटप्रतियोगिके लक्षणाङ्गीकारे न कोपि-दोष(२) इति दिक्(३)।

इति भाट्टचिन्तामणौ नञर्थवादः।

उपसर्गरूपा निपातरूपाश्चोपशब्दाः(४)।

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप,

इत्युपसर्गा द्वाविंशतिः। एतद्भिन्ना नञादयो निपाताः। प्रादीनां च धातुसमभिव्याहार एवोपसर्गत्वं निपातत्वं(५)च। तत्रापि कश्चिद्धात्वर्थमतिक्रम्य वर्त्तते, कश्चित्तमेव विशिनष्टि यथा प्रस्थानं पराजयः

---

(१) भिन्नव्युत्पत्तीति। नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति व्युत्पत्तेः निपातातिरिक्तविषयकत्वस्वीकारादित्यर्थः।

(२) दोष इति। तथा च निपातातिरिक्तत्वविशेषणमुक्तव्युत्पत्तौ न देयमितिभावः।

(३) दिगिति। दिगर्थस्तु–भूतले न घट इत्यतस्तात्पर्यवशात् भूतलवृत्तिर्घटाभाव इति बोधस्येव भूतलवृत्तित्वाभाववान् घट इति बोधोऽप्यनुभवसिद्धः अन्यथा भूतले घट इति वाक्यजन्यं भूतलवृत्तितावान् घट इति बोधं प्रति भूतले न घट इति वाक्यजन्यबोधस्य ग्राह्याभावानवगाहित्वेन विरोधित्वं न स्यात् एवं च नञर्थाभावस्य स्वरूपसम्बन्धेन घटेऽन्वयादुक्तव्युत्पत्तौ निपातातिरिक्तत्वविशेषणमावश्यकं ततश्च तेनैव सिद्धौ घटपदस्य घट प्रतियोगिके लक्षणायां मानाभावः। न च भूतले न घट इत्यत्रापि नञोऽभाववति लक्षणया घटेऽभेदान्वय एवेति वाच्यम् तथा सति सर्वत्राभाववत एव नञर्थतया मुख्यर्थपरनञो दुर्लभत्वापत्तेः। अभाववतोऽभेदान्वयबोधोपगमेन भूतले घट इति वाक्यजबोधे भूतले न घट इति वाक्यजन्यबोधस्याविरोधितापत्तेश्च लाघवात् स्वरूपसम्बन्धेन ग्राह्याभावनिश्चयस्यैव विशिष्टबुद्धिविरोधित्वादिति।

(४) उपशब्दाः–द्योतका इत्यर्थः। शब्दाः वाचकाः।

(५) निपातत्वं चेति। उपसर्गाः क्रियायोगे इति पाणिनिस्मरणेन क्रियायोगे एव निपातत्वोपसर्गत्वयोर्विधानात् निपातसंज्ञा तु प्रादीनां क्रियायोगाभावेऽपि प्रादय इति सूत्रेण भवतीत्यवगन्तव्यम्। द्योतका इति। द्योतकत्व च स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम्।

प्रवेशो विजय इति । अत्र गमनजयाभावावुपसर्गार्थौ, प्रविशतीत्यादौ तन्निष्ठः प्रकर्षः विजयत इत्यादौ जयत्यर्थे विशेषः । चादिनिपातानां केषांचित्केवलप्रयोज्यत्वेपि सहप्रयुज्यमानपदार्थान्वयित्वं तदर्थानाम् । यथा–

तटस्थः स्वानर्थान्घटयति च मौनं च भजते ।
विकारः कोप्यन्तर्जडयति च तापञ्च कुरुते ॥

इत्यादौ लोके, मैत्रावरुणः प्रेष्यति चान्वाहेत्यादौ वेदे, समुच्चयः । चार्थो भावनान्वयी, घटं च पटं चानयेत्यादौ लोके यदग्नये प्रजापतये चेत्यादिवेदे चोपपदार्थान्वायित्वं, तेनाग्निनिरूपितसमुच्चयस्य प्रजापतौ विशेषणत्वेन समुच्चयस्य भावनान्वयाभावेन न विधिः, किं तु समुच्चयविशिष्टप्रजापतिविधिः । न चैवं गौश्चाश्वश्च इत्यत्र दक्षिणोद्देशेन समुच्चयविधिर्न स्यात् । इष्टापत्तेः । विशिष्टदक्षिणाविध्यङ्गीकारात् । तस्याश्च ऋत्विग्भ्यो ददातीति विनियोगश्चमलाध्वर्युश्याबृत्त्यर्थः । एतच्च दशमे(१) स्फुटम् ॥

तत्रोपसर्गा द्योतका न वाचकाः । प्रजयतीत्यादौ प्रकृष्टजयादौ जिधात्वादेर्लक्षणयैवोपपत्तेः, तत्र शक्तिकल्पने गौरवात् । प्रतितिष्ठत इत्यत्र गमने प्रशब्दार्थे विभक्त्यर्थानन्वयप्रसङ्गात् । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् । न चैवं नञोप्यभावे शक्तिर्न स्यादिति वाच्यम् । भूतलं न घट इत्यत्र घटपदलक्षितभेदस्य नामार्थयोर्भेदान्वयाव्युत्पत्त्या भूतलेऽनन्वयापत्तेः । भेदस्य नञर्थत्वे तु निपातार्थातिरिक्ते तन्नियमान्न भेदान्वयानुपपत्तिः । न च घटपदस्य घटभिन्ने लक्षणया भूतलेनान्वयोस्त्विति वाच्यम् । भेदप्रकारकबोधस्यानुभविकत्वा(२)दिति केचित्(३) ॥

अन्ये तु धातौ शक्तिलक्षणयोरुपसर्गसमभिव्याहारतदभावहेतुकत्वस्य उपसर्गाणां द्योतकत्वशक्तेश्च कल्पनायां गौरवाद् वाचकतैव युक्ता ।

---

(१) ज्योतिष्टोमे श्रूयते 'गौश्चाश्वश्चाश्वतरश्च गर्दभाश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा' इति । तत्र किमेकैकस्य गवादेर्द्रव्यस्य द्वादशशतसंख्या उतैकस्य यस्य कस्य चिद् गोर्वेति सन्दिह्य प्रथमातिक्रमे मानाभावात् गोरेव द्वादशशतशतसंख्येति सिद्धान्तितम् अ० १० । पा० ३ । अ० ११ ॥

(२) आनुभविकत्वादिति । घटाभिन्नलक्षणायां तु घटभिन्नाभिन्नः पट इति बोधः स्यात् इष्यते च घटाभिन्नः पट इत्येव बोध इति भावः ।

(३) केचिदिति । एतत्सर्वं नञर्थवादे दिगर्थनिरूपणव्याजेन मया प्रदर्शितम् ।

एवं चैवकारादावन्ययोगव्यवच्छेदायोगव्यवच्छेदयोरिवकारादीनां सादृश्यादौ शक्तिप्रदर्शनमुपपन्नम् । अत एवात्र ह्येवावपन्त्यत एवोद्गायन्तीति वैदिकप्रयोगस्य, तत्रैवायाति इत एवाभिवर्त्तत इति लौकिकप्रयोगस्य, चोपपत्तिरतो वाचकत्वमित्याहुः ।

त्वतलादिभावप्रत्ययानां घटत्वं पटत्वमित्यादौ घटत्वत्वेन घटत्वादिकमर्थः । (१)घटत्वत्वं च घटेतरासमवेतत्वे सति घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे सति समवेतत्वम् । अत्रेतरत्व, समवेतत्वा, भाव, निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वा, भाव, समवेतत्वे षट् शक्तयः । संसर्गः समभिव्याहारलभ्यः । सत्त्वमित्यादावेकदेशे लक्षणा । तत्र सदितरासमवेतत्वस्याप्रसिद्धेः । एवं प्रमेयत्वमित्यत्रापि । एवमन्यत्राप्यूह्यम् ।

के (२)चित्तु—भावप्रत्ययस्य धर्मत्वेन धर्मे शक्तिः । धर्मत्वमाधेयत्वं शक्यतावच्छेदकं, शक्तावच्छेदकं तु त्वतलत्वादिकं न भावप्रत्ययत्वम् । घटत्वमित्यादौ घट(३)धर्म इति बोधः । पटे घटत्वं नास्तीत्यत्र तु नञ

(१) तदितरावृत्तित्वे सति सकलतद्वृत्तित्वम् भावप्रत्ययप्रवृत्तिनिमित्तम् । उभयत्र वृत्तित्वं प्रकृत्यर्थतावच्छेदकतावच्छेदकसम्बन्धेन बोध्यम् समवेतत्वकथनं तु प्रकृताभिप्रायेण । प्रकृत्यर्थमन्तर्भाव्य त्वप्रत्ययार्थनिर्वचने शक्त्यानन्त्यम् अतः इतरावृत्तित्वे सति वृत्तित्वम् प्रवृत्तिनिमित्तम् । सत्त्वमित्यत्र समवायेन तदितरावृत्तित्वाप्रसिद्ध्या नोक्तं प्रवृत्तिनिमित्त सम्भवीत्यत आह—घटनिष्ठेति । तदितरासमवेतत्वं तदितरत्वव्यापकत्वरूपं ग्राह्यं न तु यथा श्रुतमिति भावः सामान्यत इतरत्वव्यापकत्वस्य केवलान्वयिमात्रवृत्तित्वेन घटत्वादौ द्वितीय दलस्य बाधः अतः इतरत्वादौ भावप्रत्ययस्य खण्डशः शक्तिः । एवं वृत्तिमद्भेदप्रतियोगितानवच्छेदकत्वरूपप्रथमदलमपि प्रमेयत्वाद्यनवच्छिन्ने तत्र बाधितमिति तत्र खण्डशः शक्तिः ।

(२) पूर्वोदीरितपक्षापेक्षया लाघवमभिप्रेत्याह—केचित्त्विति । धर्मत्वं च प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन सम्बद्धत्वम् ।

(३) घटधर्म इति बोध इति । ननु द्रव्यत्वस्यापि घटधर्मतया घटत्वमित्यत्र द्रव्यत्वबोधः कुतो न, नचायं दोषः पूर्वोदीरितपक्षेऽपि समान इति वाच्यम् तदितरावृत्तित्वेन भासमाने धर्मे तत्तत्प्रकृत्यर्थतावच्छेदकनिष्ठाधेयतासम्बन्धेन प्रकृत्यर्थस्यान्वयोपगमेन पूर्वोदीरितपक्षे दोषाभावादिति चेन्न—धर्मत्वेन धर्मे शक्तिमतेऽपि प्रकृत्यर्थतावच्छेदकनिष्ठाधेयतानिरूपितत्वसम्बन्धेन धर्मत्वे प्रकृत्यर्थस्यान्वयोपगमेन दोषाभावात् ।

न च लाघवेन घटत्वादिनिष्ठाधेयतासम्बन्धेन घटादेः धर्मे एवान्वयोऽस्तु किमिति घटत्वनिष्ठाधेयतानिरूपितत्वसम्बन्धेन धर्मत्वे घटादेरन्वयः स्वीक्रियते इति वाच्यम् । प्राचीनैर्घटस्य सिद्धतया नीलघटो घट इति यथा नेष्यते तथा आधेयत्वस्य सिद्धतयाऽसिद्धनिरूपितत्वसम्बन्धेनैवान्वय इत्याशयात् ।

र्थस्य घटमात्रवृत्तित्वविशिष्टभावप्रत्ययार्थे धर्मेऽन्वयः। भावप्रत्ययसमभिव्याहृतनञः प्रकृत्यर्थमात्रवृत्तित्वविशिष्टप्रतियोगिताकाभावबोधकत्वव्युत्पत्तेः । एवं समासादुत्तरभावप्रत्ययेपि नीलोत्पलत्वमित्यत्र नीलोत्पलधर्म इति बोधः। समासोत्तरभावप्रत्ययस्य प्रकृत्यर्थवृत्तित्वविशिष्टधर्मबोधकत्वव्युत्पत्त्या न रक्तोत्पले नीलोत्पलत्वमिति बोध इत्याहुः।

(१)अन्ये तु कृत्तद्धितसमासोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्ये शक्तिः, लोके पाचकत्वमौपगवत्वं नीलोत्पलत्वमित्यादौ वेदे च वैश्वदेवीत्वं निषादस्थपतित्वमित्यादौ पाककृतिपुरुषत्वयोरुपगुसम्बन्धित्वापत्यत्वयोर्नीलत्वोत्पलत्वयोर्विश्वदेवदेवताकत्वामिक्षात्वयोर्निषादत्वस्थपतित्वयोः समानाधिकरण्यस्य विशेषणतया भानादिति ॥

(२)अन्ये तु सामानाधिकरण्यस्योत्तरपदार्थतावच्छेदकविशेषणतया भानम्। सामानाधिकरण्यमात्रे शक्तिः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्। प्रत्ययार्थप्राधान्यनियमस्य भावप्रत्ययार्थातिरिक्तपरत्वात्तेन नीलत्वसमानाधिकरणमुत्पलत्वमिति बोध इत्याहुः ॥

परे तु नीलादिपदस्य तत्समवायिनि लक्षणा। अभेदः संसर्गः। नीलत्वसमवाय्यभिन्नसमवेतोत्पलत्वमिति बोध इत्याहुः॥

वैश्वदेवीत्यादितद्धितस्य देवतात्वविशिष्टे सर्वनामार्थे शक्तिः, सर्वनामार्थश्च बुद्धिस्थप्रकारविशेषावच्छिन्नं पयस्त्वादि, एवं च प्रातिपदिकार्थविश्वदेवानां देवतात्वे देवतात्वस्य च निरूपकत्वेन सर्वनामार्थद्रव्यविशेषत्वेऽन्वयः । ससम्बन्धिकत्वादेकदेशान्वयेपि न दोषः । आमिक्षापदे तु प्रकारविशेषोपस्थापने तद्धितस्य तात्पर्यग्राहकत्वमिति प्राञ्चः।

केचित्तु तद्धितस्य सर्वनामार्थे शक्तिर्देवतात्वे तु निरूढलक्षणा, कृत्प्रत्ययानामाश्रयवाचिनां (३)कृताविव विश्वदेवप्रातिपदिकार्थस्य ल-

---

(१) यज्ञपत्युपाध्यायमतमाह—अन्येत्विति । तथाच दाधितिः कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वादिति । सम्बन्धसम्बन्धस्यापि विशिष्टधीविषयतायाः प्राचीनैरुपगमेन नीलोत्पलमिति पदजन्यबोधे नीलत्वसमानाधिकरणवदुत्पलमिति बोधान्नीलोत्पलत्वमित्यादौ नीलत्वोत्पलत्वयोः सामानाधिकरण्यमिति बोधः ।

(२) ननु उत्पलत्वनिष्ठनीलिमादिसामानाधिकरण्यस्य प्रकृत्यर्थावृत्तितया न भावप्रत्ययार्थत्वसम्भव इत्यपरितोषादाह—अन्येत्विति ।

(३) कृताविवेति । पाचक इत्यत्र विक्लित्त्यनुकूला भावना विक्लित्तिर्वा पचधात्वर्थः आश्रयः प्रत्ययार्थः कृतौ च प्रत्ययस्य निरूढलक्षणा तद्वदिति भावः ।

क्षितदेवतात्वेऽन्वयो व्युत्पत्तिवैचित्र्यादित्याहुः।

अन्ये तु तद्धितार्थो द्रव्यविशेष एव, देवतात्वं तु प्रातिपदिकार्थतद्धितार्थयोः संसर्ग इत्याहुः॥

परे तु देवतात्वमेव तद्धितार्थः, सर्वनामार्थस्य व्यक्तिन्यायेन(१) बोध इत्याहुः॥

अपरे तु तद्धितेनानिर्धारितविशेषद्रव्यसामान्यप्रतीतेर्न द्रव्यविशेषवाचित्वं, किं त्वामिक्षापदादेव विशेषनिर्णय (२)इत्याहुः॥

देवतात्वबोधकानि च देवताशब्दस्तद्धितश्चतुर्थी द्वितीया मन्त्रवर्णश्चेति, देवतास्तर्पयति प्रजापतिर्ब्रह्मा देवता इत्यादौ रात्रिदेवतामेके नक्षत्रदेवतामेके इत्यादौ च द्रव्यत्यागोद्देश्यत्वरूपदेवतात्वस्य देवतापदवाच्यस्यान्वयः। धात्वर्थत्यागांशेऽनुवादः। एवमाग्नेय इत्यादितद्धितस्य देवतात्वविशिष्टद्रव्यविशेषवाचित्वम्। न च द्रव्यविशेषवाचित्वमसिद्धमिति वाच्यम्। बुद्धिस्थप्रकारावच्छिन्नबोधकसर्वनामार्थे सास्यदेवतेति तद्धितविधेः। एवं च तद्धितस्य देवतात्वविशिष्टे बुद्धिस्थप्रकारे ऽष्टाकपालत्वादौ तद्व्यक्तित्वादौ वा शक्तिस्तदवच्छिन्नस्य तु व्यक्तिन्यायेन लाभः। बुद्धिस्थत्वेन भानाभावात्तु न बुद्धिस्थत्वे शक्तिः। तेषां प्रकाराणां नानात्वेपि बुद्धिस्थत्वस्योपलक्षणत्वेन शक्तिग्रहसम्भवः, शक्तिग्रहोपलक्षणस्य न शक्यतावच्छेदकत्वमिति दिक्।

तदादिपदानां बुद्धिस्थत्वेन बुद्धिस्थे शक्तिः। न च बुद्धिस्थमानयेति बोधापत्तिः, पदार्थस्मरणशाब्दबोधयोः समानप्रकारकत्वनियमादिति वाच्यम्। पदान्तरे तादृशनियमेऽपि तदादिपदेषु घटत्वादिरूपेणैव पदार्थोपस्थितेः शाब्दबोधस्य च कल्पनं फलानुरोधादिति केचित्।

अन्ये तु तदादेर्घटत्वादिनैव शक्तिरिति नानार्थतैवे(३)त्याहुः।

---

(१) व्यक्तिन्यायेनेति। यथा आकृतौ शक्तिः व्यक्तेस्त्वाक्षेपाद्भानम् तथा सर्वनामार्थस्य आमिक्षादेराक्षेपाद्भानम्।

(२) इत्याहुरिति। अमुमर्थमेवाहुर्वैयाकरणभूषणकृतः।

'देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा।
प्रदेय एव वा शक्तिः प्रकृतेस्त्वस्तु लक्षणा॥
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः॥ इति।

(३) इत्याहुरिति। न च नानार्थतोपगमे यद्रूपावच्छिन्नविषयकव्यवहारजनकत्वं येन पुंसा तदादिपदे न गृहीतं तेन तच्छक्यग्रहेण प्रकान्तस्यापि तदवच्छिन्नस्य तत्पुरुषीयतदादिपदजन्यबोधाविषयत्वानुपपत्तिरिति वाच्यम् बुद्धिस्थत्वं प्रकारीभूतघटत्वादीनाम-

त्वंपदस्य तत्कालीनसम्बोध्यत्वविशिष्टचैत्रादावस्मत्पदस्य तत्कालीनस्वतन्त्रोच्चारयितृत्वविशिष्टचैत्रादौ शक्तिः, स्वातन्त्र्यं चान्यबोधतात्पर्येणानुच्चारयितृत्वं, तेनान्यतात्पर्येणोच्चारिते 'वाच्यस्त्वया मद्वचनात्स राजे'(१)त्यादौ लक्षणया सीताप्रतीतिः, न कविप्रतीतिरुच्चारयितृप्रतीतिर्वा । अत्रापि सम्बोध्यत्वादिकं न भासते भासते चेति। वयं याम इत्यत्र स चाहं च त्वं च वयमित्येकशेषादन्यतात्पर्यकेपि सर्वस्वारोपि तत्स्वातन्त्र्यप्रतीतिः ।

एवमिदमवच्छिन्नेऽदः पदस्य शक्तिः ।

यत्किञ्चिच्छब्दस्य पर्याप्तिसम्बन्धेन बुद्धिविषयत्वविशिष्टघटत्वाद्यवच्छिन्ने शक्तिः । यत्किञ्चित्प्राचीनमग्नीषोमीयाद् यत्किञ्चित्सोमलिप्तमित्यादौ तथैव बोधात् । अत एव शक्यतावच्छेदकतावच्छेदकस्य विषयत्वस्यैक्यान्न वाक्यभेदः, यत्किञ्चिदानयेत्यादौ तु पर्याप्तिसम्बन्धेनोपेतबुद्धिविषयत्वविशिष्टे लक्षणा ।

केवलकिञ्चित्पदस्याज्ञातप्रकारावच्छिन्ने शक्तिः ।

एवं सर्वपदस्य पर्याप्तिसम्बन्धेन बुद्ध्यवच्छिन्ने शक्तिः । सर्वेषु घटेषु द्रव्यत्वमित्यत्र घटपर्याप्तिभानं, सर्वेषु रूपमित्यत्र व्यापकत्वे लक्षणा । कस्यापि रूपस्य सर्वघटवृत्तित्वाभावात् । सर्वेषु सत्त्वं प्रमेयत्वमित्यादौ भेदप्रतियोगितानवच्छेदकत्वे लक्षणा । एवं सर्वेभ्यो दर्शपूर्णमासौ सर्वं ब्रह्मणे परिहरतीत्यादावपीति दिक् ॥

क्त्वाप्रत्ययस्य समानकर्तृकत्वे पूर्वकालत्वे च शक्तिरिति वै(२)याकरणाः।

नैयायिकास्तु भुक्त्वा व्रजतीत्यादौ भोजनोत्तरकालीनं व्रजनमिति

नुगमकमाश्रित्य बुद्धिप्रकारवाँस्तत्पदशक्य इत्याकारकशक्तिग्रहस्य सामान्यलक्षणाप्रत्यासत्त्या तद्धर्मप्रकारेण सकलधर्मविषयकस्य सम्भवेन अपूर्वप्रकारेण बोधानुपपत्तेरभावात ।

(१) वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम् ।

मां लोकवादश्रवणादहासीः श्रुतस्य तत्किं सदृशं कुलस्य ॥

इति रघुकाव्ये कालिदासः ।

(२) वैयाकरणा इति । समानकर्तृकयोः पूर्वकाले इति सूत्रादिति शेषः, अन्यथा ओदनं पक्त्वाऽहं भोक्ष्ये इत्यत्र पाककर्तृत्वस्यानुक्तत्वात् मयेति—तृतीया स्यादिति भावः । वस्तुतस्तु 'अव्ययकृतो भावे' इति स्मरणात् क्त्वाप्रत्ययस्य भाव एव शक्तिः समानकर्तृकत्वं पूर्वकालत्वं च संसर्गमर्यादयैव भासते न तु तत्र क्त्वाप्रत्ययस्य शक्तिः । मयेति तृतीयापत्तिस्तु न पाककर्तृत्वस्यानुक्तत्वेऽपि भुजिकर्तृत्वस्योक्तत्वेन पाककर्तृत्वस्यापि उक्तत्ववद्भानात् । तथा च हरिः—

बोधादुत्तरकालत्वं समानकर्तृकत्वे च शक्तिरिति।

समानकर्तृकत्वं समभिव्याहृतधात्वर्थजनकव्यापारयोरेकनिष्ठत्वं, तेन रथो गत्वा तिष्ठतीत्यादिप्रयोगः ।

उत्तरकालत्वं च तात्पर्यविषयीभूताव्यवधानविशिष्टं बोध्यम् । तेनाद्य गत्वा श्वस्तिष्ठतीत्यादिप्रयोगः ।

मुखं व्यादाय स्वपितीत्यादौ समानकर्तृकत्वमात्रे सामानाधिकरण्ये वा लक्षणा।मुखं व्यादत्त इति वैपरीत्येन बोध इति कश्चित्। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादौ त्वव्यवहितत्वभानमिति दिक् ।

आयुधपदस्य युद्धसाधनत्वे शक्तिः । साधनत्वमात्रे लक्षणा । स्तोमपदस्य स्तोत्रसाधनऋक्समुदाये शक्तिः । त्रिवृदादिपदानामभ्याससाध्यनवत्वविशिष्टऋक्समुदाये शक्तिः । त्रिवृद्बहिष्पवमानमित्यत्रानभ्यस्ते लक्षणा । एवं पञ्चदशादिपदानां संस्थापदस्य तद्विषयकव्यापारोपरमे शक्तिः । आरम्भपदस्याद्यपदार्थे शक्तिरिति केचित् । आद्यप्रवृत्तौ शक्तिरित्यन्ये । आद्यत्वं तत्समानविषयकप्रवृत्तिध्वंसव्यधिकरणत्वम् । एवमन्यदूह्यम् ॥

इति श्रीगागाभट्टकृतभाट्टचिन्तामणौ शब्दखण्डः ॥

धर्मे वेदप्रामाण्याधिकरणम् ।

"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थे ऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्" ॥ ५ ॥

'प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते ॥' इति ।
स्पष्टं चेदं भूषणे ।

अथ वृत्तिः ।

अथातो धर्मजिज्ञासा ॥ १ ॥

(१) अथ गुरुकुलवासपुरस्सरं साङ्गवेदाध्ययनानन्तरम् अतः वेदाध्ययनस्य अर्थज्ञानरूपदृष्टफलकत्वाद्धेतोः धर्मजिज्ञासा वेदार्थरूपस्य धर्मस्य विचारः कर्तव्यः॥ १॥

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

(२) चोदना विधायकवाक्यं लक्षणं प्रमाणं यस्य स चोदनालक्षणः अर्थः पुरुषैरर्थ्यमानः यः सः धर्मः ॥ २ ॥

एवं प्रत्यक्षादिलक्षणकथनेन तेषां धर्माधर्मप्रमायामकारणत्वमित्युक्तम् । इदानीं चोदनासूत्रप्रतिज्ञातस्य विधिप्रामाण्यस्य परीक्षा क्रियते कारणदोषबाधकज्ञानरहितमगृहीतग्राहिज्ञानं प्रमेति पूर्वमुक्तम् । विधिजन्यज्ञाने तथात्वमस्ति न वेति चिन्ता ।

तत्र पूर्वः पक्षः—नैतादृशप्रमाजनकत्वं विधीनां सम्भवति, स्वर्गाद्यामुष्मिकफलककर्मबोधकानामपूर्वकल्पकार्थापत्तिरूपप्रमाणसापेक्षतया निरपेक्षतज्जनकत्वरूपप्रामाण्यासम्भवात् । ऐहिकफलकचित्रादिकर्मबोधकानामपि प्रत्यक्षादिप्रमाणान्तरेण बाधात् । न हि तत्रापि द्वारभूतादृष्टकल्पनं, मानाभावात् । कारीर्यादौ तात्कालिकफलदर्शनात् हिरण्यधारणस्य भ्रातृव्यदुर्वर्णत्वजनने दृष्टद्वारस्वसम्भवे तत्कल्पनायोगाच्च । अतो न बाधकराहित्यम् । स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं यातीति यज्ञायुधपदवाच्यस्फ्यादिसंयोगविशिष्टस्य यजमानशरीरस्य दाहेन भस्मीभूतस्य स्वर्गलोकगमनवादस्याशक्यपरिहारः प्रमाणान्त-

---

धर्मे वेदप्रामाण्याधिकरणम् ।

तस्य निमित्तपरीष्टिः ३

(३) **तस्य** धर्मस्य यत् **निमित्तं** ज्ञानकरणं तस्य **परीष्टिः** परीक्षा प्रस्तूयते॥ ३॥

धर्मे प्रत्यक्षाद्यगम्यत्वाधिकरणम् ।

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमविद्यमानोपलम्भत्वात् ॥ ४ ॥

(४) **इन्द्रियाणां** चक्षुरादीनां सति वर्तमाने विषये सम्प्रयोगे सन्निकर्षे सति **पुरुषाणां बुद्धेः जन्म** ज्ञानोत्पत्तिः यत् भवति **तत्** तादृशं **प्रत्यक्षं अनिमित्तं** न धर्मप्रमितिकारणं **विद्यमानोपलम्भनत्वात्** इन्द्रियाणां वर्तमानवस्तुमात्रप्रत्यायकत्वात् भाविनमपि धर्मं प्रमाणेन प्रतीत्य पुरुषाणां प्रवृत्तेरनुभूयमानत्वादिति भावः ॥ ४ ॥

धर्मप्रमाणपरीक्षाधिकरणम् ।

(५) **शब्दस्य** वाचकस्य **अर्थेन** वाच्येन सह **सम्बन्धः** वाच्यवाचकभावरूपः **औत्पत्तिकस्तु** स्वाभाविक एव न साङ्केताद्यधीनः, **उपदेशः** आप्तोपदेशः **तस्य** तादृशसम्बन्धस्य **ज्ञानं** ज्ञानसाधनम् , आप्तोपदेशः न तादृशसम्बन्धस्य कारकः अपि तु ज्ञापक एवेति भावः । यतः **अनुपलब्धे** प्रत्यक्षादिप्रमाणानधिगते अर्थे चोदनाप्रतिपाद्ये **अव्यतिरेकः** व्यतिरेकस्य प्रामाण्यव्यतिरेकहेतोरव्यभिचारस्याभावः वर्तते **तत्** तस्मात् **चोदना प्रमाणमिति बादरायणस्य** अनुमतम् **अनपेक्षत्वात्** अप्रामाण्यशङ्काहेतुभूतस्य सङ्केतयितृपुरुषादिसापेक्षत्वस्याभावात् ॥ ५ ॥

रविरोधः। किं चात्र कारणदोषो ऽप्यस्ति। तथाहि—विधिस्थसोमादिपदानां स्वार्थेन संयोगतादात्म्यादिसम्बन्धासम्भवात् प्रत्यायकत्वं सम्बन्धः। तच्च 'अयं शब्दो ऽस्य वाचक'इति पुरुषान्तरोपदेशाधीनमेवार्थज्ञानम्। एवं च विधिवाक्यार्थज्ञानस्य पुरुषोपदेशाधीनत्वेन पुरुषाणां च भ्रान्त्यादिसम्भवेन कारणदोषवत्त्वम्। न च पदपदार्थयोर्नित्यः स्वाभाविकः सम्बन्धः सम्भवति। प्रथमश्रवणे ऽप्यर्थप्रत्ययप्रसङ्गात्। आधुनिकैः पुरुषैरिदं पदमत्र शक्तमिति व्यवहारकरणाच्च। न चाधुनिकैः पुरुषैर्नित्यस्य सम्बन्धस्योपदर्शनेऽपि न तत्कल्पनमिति वाच्यम्। आधुनिकैरकल्पनेऽपि सर्गाद्यकालिकपुरुषेण तत्कल्पनासम्भवः। न च सर्गादौ मानाभावः। "स ऐक्षत बहु स्यां प्रजायेय" इति "नासदासीन्नो सदासी"दिति श्रुतेरेव मानत्वात्। तथा च—सर्गादौ भगवता स्थावरं जङ्गमं जगत् धर्माधर्मौ च सृष्ट्वा व्यवहाराय तत्तच्छब्दानां तेन तेनार्थेन सम्बन्धं कल्पयित्वा धर्माधर्मप्रतिपादकपदे वेदान्कल्पयित्वा हिरण्यगर्भादिभ्यः प्रतिपादितास्तैरन्येभ्य इत्येवमुत्तरोत्तरं शब्दार्थप्रतीतिरिति॥

सिद्धान्तस्तु प्रथमे श्रवणे ऽर्थप्रत्ययाभावस्य नित्यसम्बन्धानवगममूलकत्वेनोपपत्तेरीदृशार्थकल्पने मानाभावात्। सर्गत एकरूपस्यानुभवसिद्धत्वेन सर्गादौ नाशाभावान्मन्त्रार्थवादेतिहासपुराणानामपि पौरुषेयसम्बन्धापेक्षितया पौरुषेयतया च शाक्यग्रन्थवदतीन्द्रियार्थे प्रामाण्यासम्भवेनाप्रमाणप्रतिपादितसर्गादेर्दूरापेतत्वात्। अतो न सर्गादिकाले पदपदार्थसम्बन्धकरणं सम्भवति। किं च सर्वपदानामर्थानां च सम्बन्धसिद्धौ वाक्येन तत्सम्बन्धकरणं स्यात्। अज्ञातार्थसम्बन्धकपदघटितवाक्येन तदसम्भवात्। न चैवं श्रोतॄणामप्रसिद्धसम्बन्धत्वात्सम्बन्धविशेषकथनमप्यनुपपन्नमिति वाच्यम्। सतः सम्बन्धस्योपायाभावादज्ञातस्य वाक्येन ज्ञापनसम्भवात्। वृद्धव्यवहारेणैव सम्बन्धज्ञानसम्भवे तज्ज्ञापकवाक्यकथनस्यानावश्यकत्वाच्च। तस्मान्न पौरुषेयः सम्बन्ध इति सम्बन्धस्य नित्यतया पुरुषापेक्षा नास्तीति सिद्धं चोदनाप्रामाण्यम्।

न च तथापि चित्रादीनामनन्तरफलादर्शनेन विसंवादादप्रामाण्यमिति वाच्यम्। शब्दोक्तसाधनत्वमात्रस्यापूर्वद्वारेण कालान्तरेपि तैलपानवत्सम्भवेनाविसंवादात्। अपूर्वद्वारकत्वस्याङ्गप्रधानमेलनान्यथानुपपत्त्या वाक्यार्थबोधे संसर्गलभ्यत्वात्। पशूत्पत्तिमात्रस्याफलतया

तदुपयोगस्य फलत्वेन तत्पर्यन्तस्यापि द्वारकल्पनावश्यम्भावेनापूर्वबोधाच्च । अतो न विसंवादः ।

न च तथापि स एष यज्ञायुधीत्यत्र दृष्टविरोधादप्रामाण्यमिति वाच्यम् । शरीरशरीरिणामत्यन्तभेदाभावेनैव तत्पदव्यपदेश्यस्य शरीरस्य यज्ञायुधैः परम्परया यज्ञायुधवत आत्मनः स्वर्गगमनलिप्सितभोगोत्पादविरोधाभावात् । फलवाचकफलभोक्तृवाचकपदयोः सामानाधिकरण्यस्य "अग्निं चिनुत ऋध्नोत्येव" "द्विरात्रेण यजते स्वर्गमेव लोकमेती"त्यादौ बहुशो दर्शनात् । एवमत्रापि यजमानः स्वर्गं यातीत्युपपन्नम् । एवं सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीति सङ्कल्पनिरूपितकर्तृत्वबोधकषष्ठ्याऽऽत्मनः सङ्कल्पं प्रति कर्तृत्वम् ।

न च व्यापकस्य स्पन्दो न सम्भवतीति वाच्यम्, प्रयत्नद्वारा प्रयोजकत्वसम्भवात् । सर्वधात्वर्थस्य क्रियात्वेन तत्र कर्तृत्वसम्भवाच्चेति । तस्मात्कारणदोषबाधकज्ञानरहितागृहीतग्राहित्वेन वेदप्रामाण्यम् । बादरायणग्रहणं पूजार्थम् ॥

शब्दनित्यताधिकरणम् ।

कर्मैके तत्र दर्शनात् ॥ ६ ॥ अस्थानात् ॥ ७ ॥ करोति शब्दात् ॥ ८ ॥ सत्त्वान्तरे च यौगपद्यात् ॥ ९ ॥ प्रकृतिविकृत्योश्च ॥ १० ॥ वृद्धिश्च कर्तृभूम्नाऽस्य ॥ ११ ॥

वृत्तिः ।

पूर्वाधिकरणोक्तं शब्दार्थयोः सम्बन्धस्य नित्यतामाक्षेप्तुं शब्दस्य नित्यत्वमाक्षिपति—**एके** अक्षपादादयः **कर्म** कार्यं शब्दं मन्यन्ते । कुतः, **तत्र** तस्मिञ्शब्दे विषये कण्ठताल्वादिव्यापारे सत्येव शब्दस्य **दर्शना**दित्यर्थः । 'तदुदितः स हि यो यदनन्तरः' इति न्यायेन पुरुषप्रयत्नानन्तरं शब्दोपलम्भात् पुरुषप्रयत्नजन्यत्वस्य शब्दे निश्चयादिति भावः ॥ ६ ॥ हेत्वन्तराण्याह—**अस्थानात्** अस्थिरत्वात्, नित्यत्वे उच्चारणानन्तरं चिरकालं शब्द उपलभ्येत नचोपलभ्यतेऽतोऽनित्यः ॥ ७ ॥ **करोतिशब्दात्** शब्दं कुरु इति व्यवहारात् घटं कुरु इति वत् ॥ ८ ॥ **सत्त्वान्तरे** प्राण्यन्तरे शब्दस्य प्राण्यन्तरशब्देन सह **यौगपद्यात्** समानकालिकत्वदर्शनात् । अयं भावः शब्दस्य नित्यत्वमते लाघवादेकत्वमप्यङ्गीकार्यम् ततश्च नानादेशेषु युगपदुपलम्भोऽनेकपुरुषैरुच्चारणसमये शब्दस्य भवति स चैकत्वे विरुध्येत एकस्य नानादेशस्थत्वासम्भवादिति ॥ ९ ॥ **प्रकृतिविकृत्योः** दध्यत्रेत्यादौ प्रकृतेरिकारस्य विकृतेर्यकारस्य दर्शनात् 'इकोयणची'ति शास्त्रेण उपदेशाच्चेत्यर्थः ॥ १० ॥ **कर्तृभूम्ना** उच्चारयितृबाहुल्येन **अस्य** शब्दस्य

समन्तु तत्र दर्शनम् ॥ १२ ॥ सतः परमदर्शनम् विषयानागमात् ॥ १३ ॥ प्रयोगस्य परम् ॥ १४ ॥ आदित्यवद्यौगपद्यम् ॥ १५ ॥ वर्णान्तरमविकारः ॥ १६ ॥ नादवृद्धिपरा ॥१७॥ नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥१८॥ सर्वत्र यौगपद्यात् ॥ १९ ॥ संख्याभावात् ॥ २० ॥ अन-

---

वृत्तिः ।

वृद्धिः महत्वं यतोऽनुभूयतेऽतोऽपि शब्दोऽनित्यः उच्चारणस्य शब्दव्यञ्जकत्वाङ्गीकारे महत्वं न स्यात् व्यञ्जकवृद्ध्या व्यङ्ग्यवृद्धेरदर्शनात् एवं च शब्दार्थसम्बन्धस्य सुतरामनित्यत्वमितिभावः ॥ ११ ॥ सिद्धान्तमाह—**तत्र** ताल्वादिव्यापारे सत्येव शब्दस्य **दर्शनम् समं तु** कार्यत्वनित्यत्वपक्षसाधारणम् ताल्वादिव्यापारस्य व्यञ्जकत्वेऽपि उपपत्तेः हेतोरनैकान्तिकत्वम् ॥ १२ ॥ **सतः** विद्यमानस्यैव शब्दस्य **अदर्शनम् परं** युक्तम् उच्चारणपूर्वोत्तरकालयोः **विषयानागमात्** विषयं शब्दं प्रति व्यञ्जकस्याप्राप्तेः एवं चास्थिरत्वहेतुः स्वरूपासिद्धः ॥ १३ ॥ **परम्** अन्यत् यत 'शब्दं करोती'ति व्यपदेशरूपं शब्दानित्यत्वे कारणमुक्तम् तत **प्रयोगस्य** शब्दप्रयोगस्य 'गोमयं कुरु' इति व्यपदेशो यथा गोमयपिण्डविषयकः तथा उपचारात् 'शब्दं कुरु' इति व्यपदेशोऽपि 'शब्दोच्चारणं कुरु' इत्येतद्विषयकः ॥ १४ ॥ **आदित्यवत** यथाऽऽदित्यस्य एकस्यापि नानादेशेषु युगपदुपलब्धिः तथा एकस्यापि शब्दस्य व्यापकतया नानादशेषु अनेकपुरुषोच्चारणवशेन **यौगपद्यम्** युगपदुपलब्धिर्न विरुध्यते ॥ १५ ॥ दध्यत्रेत्यादौ इकारस्य यकारो विकृतिरिति नोपदिश्यते इकोयणचीतिशास्त्रेण किन्तु इकारप्रयोगे प्रसक्ते यकारः प्रयोक्तव्य इत्युपदिश्यते तथाच इकाराद्यकारः **शब्दान्तरम् अविकारः** नेकारविकारः शब्दस्य विभुत्वेन द्रव्यान्तराप्रकृतिकत्वादिति । अयं भावः 'सिद्ध तु नित्यशब्दत्वात्' इति कात्यायनस्मरणेन शब्दस्य नित्यत्वे सिद्धे व्याकरणशास्त्रमनर्थकमिति शङ्कायां 'कार्यानिवर्तकत्वात्सिद्धम्' किमिदं कार्यानिवर्तकत्वादिति कार्या बुद्धिः सा निवर्तत इति व्याकरणभाष्येण बुद्धेरेव निवर्तक शास्त्र नत्विकारादेः तथाच दधिशब्दोऽपि नित्यः दध्यशब्दोऽपि तत्र किं क प्रयोक्तव्यमित्येव शास्त्रेण बोध्यते इति ॥ १६ ॥ उच्चारणकर्तृबाहुल्ये या 'महान् शब्द' इति प्रतीतिः सा **नादवृद्धिपरा** नादस्य ध्वनेर्याबृद्धिस्तद्विषयिणी शब्दस्य निरवयवत्वेन वृद्ध्यसंभवात् । एवं शब्दानित्यत्वसाधकहेतूनामन्यथासिद्धिमुक्त्वा स्वमतेन शब्दनित्यतां हेतुभिः साधयति तुरवधारणे शब्दः **नित्य एव स्यात् दर्शनस्य** दृश्यते श्रूयतेऽनेनेति दर्शनमुच्चारण तस्य **परार्थत्वात्** परं प्रति अर्थप्रत्यायनार्थत्वात् शब्दस्य अनित्यत्वे चार्थप्रतिपत्तिपर्यन्तमनवस्थानात् परस्यार्थप्रतीतिरेव न स्यात् ॥ १८ ॥ **सर्वत्र** सकलेषु गोशब्देषु **यौगपद्यात** 'स एवायं गकार' इति अबाधितप्रत्यभि-

पेक्षत्वात् ॥ २१ ॥ प्रख्याभावाच्च योग्यस्य ॥ २२ ॥ लिङ्गदर्शनाच्च ॥ २३ ॥

पूर्वपक्षः।

ननु कथं पदार्थसम्बन्धस्य नित्यत्वम्, वर्णानामनित्यत्वेन पदानामप्यनित्यत्वात्, तथाहि—वर्णा अनित्याः प्रयत्नानभिव्यङ्ग्यत्वे सति प्रयत्नोत्तरमुपलभ्यमानत्वाद् (१), घटादिवदित्यनुमानेनानित्यत्वम्। न च स एवायं गकार इति प्रत्यक्षरूपप्रत्यभिज्ञाबलेनाभिव्यङ्ग्यत्वकल्पनमिति वाच्यम्। उत्पन्नो गकारो विनष्टो गकार इति प्रतीत्या प्रत्यभिज्ञाया एव जातिविषयत्वस्य कल्पनात्। अत एव कदाचित्तज्जातीयोयमिति प्रत्यभिज्ञोपपद्यते। अन्यथैकव्यक्तिकत्वेन(२) तज्जातेरभावात्ताद्दशप्रत्यभिज्ञानुपपत्तिः। स्वरूपेण जात्युपस्थितौ सोयमिति प्रत्यभिज्ञा जातित्वेन जात्युपस्थितौ तज्जातीयोऽयमिति प्रत्यभिज्ञेति विशेषः। किं च जात्यतिरिक्तस्यैकस्य मूर्त्तस्य युगपन्नानादेशोपलम्भो नास्तीत्यनुभवः। एवं च वर्णानां युगपन्नानादेशोपलम्भाद्भेदसिद्धिः। तस्मात्प्रत्यभिज्ञाबाधेनानित्यत्वसिद्धिरिति चेद्—

---

(१) 'तदुदितः सहि यो यदनन्तर' इति नयेन प्रयत्नजन्यत्वं वर्णानामितिभावः।

(२) व्यक्त्यैक्यस्य जातिबाधकत्वादितिभावः।

वृत्तिः।

ज्ञाया युगपदुत्पत्तेः न ह्यनेकेषां युगपद् भ्रान्तिकल्पनं युक्तम् यद्वा सर्वव्यक्तिषु बोधस्य यौगपद्यात् नित्यः गोशब्देऽप्युच्चारिते युगपत्सर्वासां गोव्यक्तीनां प्रतीतिर्भवतीति आकृतिवचनत्व शब्दस्याध्यवसीयते न चाकृत्याऽनित्यशब्दस्य शक्तिग्रहः सम्भवति नित्यत्वे तु पूर्वपूर्वप्रयोगात्स शक्यग्रहः ॥ १९ ॥ दशकृत्वो गोशब्द उच्चारित इत्येव व्यवहारो भवति न तु दशगोशब्दा उच्चारिता इति अतः **संख्याभावात्** शब्दे द्वित्वादिसंख्याव्यवहाराभावात् शब्दस्यैकतया नित्यत्वम् ॥ २० ॥ **अनपेक्षत्वात्** अपेक्षा शब्दपगमहेतोरीक्षादर्शनं तद्रहितत्वात् लोके घटादेरिदं नाशकमित्यनुभूयते तथाशब्दनाशक मिदमिति न किंचिदपि केनचिदनुभूयतेऽतो नित्यः शब्दः। यद्वा यथा घटादिकार्यं स्वोत्पत्तौ समवाय्यसमवायिनिमित्तकारणमपेक्षते न तथा शब्दः तस्य समवायिकारणाभावात् तस्मान्नित्यः ॥ २१ ॥ **योग्यस्य** श्रोत्रजसाक्षात्कारयोग्यस्य **प्रख्याभावात्** प्रख्यायाः साक्षात्कारस्य सद्भावात् नित्यः शब्दः न तु वायुसंयोगजन्यतया वायुविकारः तथासति वायोरिवास्यापि श्रोत्रेण साक्षात्कारो न स्यात् ॥ २२ ॥ 'वाचा विरूप नित्यया' इति वाचो नित्यत्वे लिङ्गं दृश्यते तस्मादपि नित्यः शब्दः ॥ २३ ॥

सिद्धान्तः ।

न, अनभिव्यङ्ग्यत्वस्यासिद्धतया हेतोरसिद्धेः । प्रयत्नाभिव्यङ्ग्यत्वस्यैवाङ्गीकारात् ।

न च श्रोत्रनिष्ठग्रहणयोग्यताजनकसंस्कारोत्पादकत्वेन तन्निष्ठग्रहणप्रतिबन्धकदोषनिराकरणेन चाभिव्यञ्जकत्वे श्रोत्रस्याकाशाहङ्कारादिगन्धतमरूपस्य(१) नित्यव्यापकशब्दस्य वा संस्कृतत्वात्सर्वग्रहणापत्तिरिति वाच्यम् । अवच्छेदककर्णशष्कुल्यामेव संस्कारोत्पत्त्यङ्गीकारात् । उत्पत्त्यादिप्रतीतेरभिव्यञ्जकध्वनिस्वरादिविषयत्वेन प्रत्यभिज्ञाया जातिविषयकत्वायोगाच्च ।

न चानेकोत्पादादिप्रत्ययानां विषयभेदकल्पनमपेक्ष्यैकस्याः प्रत्यभिज्ञाया एव विषयभेदकल्पनमुचितमिति वाच्यम् । उत्पादविनाशप्रत्ययवद्भेदाभेदप्रत्ययस्यापि नानात्वात् । भेदस्यान्योन्याभावव्यावर्तकधर्मादिरूपतया नानात्वेन तदभावप्रत्ययस्यापि नानात्वात् । ध्वनीनां भेदस्योभयसिद्धत्वेन गकारादिव्यक्तिकल्पनाधिक्याच्च ॥

केचित्तूत्पादविनाशप्रत्यययोर्भ्रान्तित्वकल्पने व्यञ्जकध्वनिनिष्ठयोस्तयोः परम्परासम्बन्धेन(२) वर्णनिष्ठत्वेन भानमभ्युपेयम् । तथा च परम्पराघटकवायोरपि विषयतापत्त्या गौरवम् । प्रत्यभिज्ञाया गत्वगकारभेदविषयिण्या जातिविषयत्वकल्पनेऽपि नातिरिक्तविषयताकल्पनमिति लाघवमाहुः ।

तदपि गकारादिव्यक्तितत्प्रागभावध्वंसकल्पनागौरवेण निरस्तम् ॥

चिन्तामणिस्तु तारत्वमन्द्रत्वविरुद्धधर्माध्यासेन प्रत्यभिज्ञाया न प्रामाण्यं सम्भवतीति जातिविषयत्वं तस्याः । तथाहि । सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकतया तत्प्रतिबध्यतावच्छेदकतया वा गत्वादिव्याप्यनानातारत्वमन्द्रत्वादिजातिसिद्धौ पूर्वगकारापेक्षयोत्तरगकारो मन्द्र इत्यनुभवः पूर्वापरगकारयोरैक्ये न सम्भवति । अतोऽस्ति गकारयोर्भेदः । एवं गकारनिष्ठशुकपुरुषजन्यतावच्छेदकवैजात्यभेदेनापि तद्भेदः । अन्यथा तच्छ्रवणे शुकाद्यनुमितिर्न स्यात् । अतः प्रत्यभिज्ञाया एव जातिविषयकत्वकल्पनमित्याह ।

तदपि "मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्" इत्यक्षरशिक्षायां मन्द्रत्वादिधर्मस्य स्वरनिष्ठत्वोक्तेरकिञ्चित्करम् ॥

अन्ये तु वर्णोऽनित्यः स्वाधिकरणनिष्ठाधेयतानिरूपकत्वसम्बन्धाव-

(१) श्रोत्रस्याकाशत्वमिति तार्किकाः, आहङ्कारिकत्वमिति सांख्याः, दिक्त्वमिति मीमांसकाः, इति विवेकः ।

(२) स्वाश्रयाभिव्यञ्जकत्वसम्बन्धेन । ध्वनेरपिनित्यत्वे वायुसंयोगघटितापरम्परा ग्राह्या तदाशयेनाह––वायोरपीति ।

च्छिन्नव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकाभावप्रतियोगिगुण- त्वात् । संयोगसम्बन्धावच्छिन्नप्रतियोगिताकगगनपरिमाणाभावप्रति- योगिनि व्यभिचारवारणायाधेयतानिरूपकत्वसम्बन्धावच्छिन्नेति । उभ याभावप्रतियोगिनि तत्रैव व्यभिचारवारणाय व्यासज्येति । ईश्वरज्ञा- नस्य नाव्याप्यवृत्तित्वम् । संयोगाभावस्य न गुणत्वमिति । संयोगदृष्टा- न्तेनानित्यत्वमाहुः ।

तदपि गुणत्वाभावेन हेत्वासिद्ध्या प्रत्युक्तम् । वर्णात्मकशब्दस्याका- शवद्व्यापकत्वेन द्रव्यत्वाङ्गीकारात् । सामान्यवत्वे सति मनोभिन्नेन्द्रि- यजन्यलौकिकप्रत्यक्षविषयत्वादिति हेतुस्त्वाकाशकालदिशां षडिन्द्रि- यजन्यप्रत्यक्षविषयत्वेनानैकान्तिकः । इष्यते हि विशेषगुणसम्बन्धित्वे- नात्मन इव बाह्यविषयसम्बन्धित्वेन कालादिप्रत्यक्षम् । इदानीं घटो ज्ञातो घटाकाशे ध्वनिरुत्पन्न इत्याद्यनुभवात् । अतो नानित्यत्वम् ॥

यत्तु वर्णानां नित्यत्वे युगपन्नानादेशोपलम्भो न स्यादित्युक्तम् , तन्न आदित्योपलम्भवदुपपत्तेः । एकस्यैवादित्यस्य दूरस्थतया सर्वैः स्वसांमुख्येन ग्रहणम् । एवं व्यापकवर्णानामपि तत्तद्ध्वनिभिस्त- द्देशाभिव्यक्तानां स्वसामीप्योन्मुखादिक्रमेण च ग्रहणमुपपन्नम् । तस्मा न्नित्यः शब्दः । अनुमान च नित्य । शब्दः, ध्वनिभिन्नत्वे सति श्रावण- त्वात् , शब्दत्ववत् । अनेनैवानुमानेन वर्णानां द्रव्यत्वसिद्धिः । न चैवं सैवेयं गुर्जरीति प्रत्यभिज्ञानाद् ध्वनीनामपि नित्यत्वं स्यादिति वाच्यम् । रथन्तरादिगीतीनां नित्यताङ्गीकारेणेष्टापत्तेः । वर्णाभिव्यञ्जकध्वनीना- मेवानित्यत्वाङ्गीकारात् । गुर्जर्यादीनां तु वर्णाभावेपि प्रतीयमानानां रथ- न्तरादिवन्न गीतिरूपता । अतस्तेषामपि न बाधकम् । दर्शनस्य, उत्प- त्यादिदर्शनस्य, परार्थत्वाद् , ध्वनिविषयत्वादित्यर्थः ।

वेदप्रत्यायकत्वाधिकरणम् ॥ ६ ॥

उत्पत्तौ वा वचनाः स्युरर्थस्यातन्निमित्तत्वात् ॥२४॥

वृत्तिः ।

ननु शब्दस्य नित्यत्वे सिद्धेऽपि वाक्यार्थे चोदनायाः प्रामाण्यं न सम्भवतीत्याक्षिपति— उत्पद्यतेऽवगम्यते इत्युत्पत्तिः वाक्यार्थः तत्र विषये चोदना **अवचनाः** अप्रमाण- भूताः स्युः **अर्थस्य** धर्मावबोधलक्षणकार्यस्य **अतन्निमित्तत्वात्** चोदनाहेतुकत्वा- भावात् चोदनावाक्यस्य धर्मावबोधे असामर्थ्यादिति यावत् । तथा हि किं पदानि प्रत्येकं वाक्यार्थं बोधयन्ति उत समुदितानि पदार्था वा नाद्यः इतरवैयर्थ्यापातात् पदानां वा-

तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥ २५ ॥ लोके सन्नियमात् प्रयोगसन्निकर्षः स्यात् ॥२६॥

नन्वस्तु पदपदार्थयोस्तत्सम्बन्धस्य च नित्यत्वम्। तथापि वाक्यस्य वाक्यार्थप्रतिपादकत्वासम्भवान्न प्रामाण्यं सम्भवति। तथाहि—न तावद् घटादिपदानां प्रत्येकं घटादिकर्मकत्वरूपवाक्यार्थप्रतिपादकत्वं सम्भवति। अनन्तवाक्यार्थसाधारणपदानां वाक्यार्थविशेषसम्बन्धसम्भवात्। एतेन पदसंघातरूपवाक्यस्य प्रत्यायकत्वमपास्तम्। तर्हि वाक्यस्य वाक्यार्थप्रतिपादकत्वासम्भवान्न प्रामाण्यं सम्भवतीति चेद्,

अत्र वैयाकरणाः—कृष्णेहि रक्षैनमित्यादौ वाक्ये पदरूपावयवविभागे मानाभावादेकारघटितानुपूर्वीकस्याऽऽगमनवाचकस्यात्र सत्वे मानाभावाच्च न पदसमुदायस्य वाक्यत्व, किं त्ववयविरूपं तस्यैव विशिष्टार्थेशक्तिः, स एव वाक्यस्फोटः। एवं च एकं वाक्यं सूक्ष्मं वाक्यं महद्वाक्यमित्याद्यबाधितसंख्यापरिमाणा प्रतीतिरुपपद्यते। अन्यथा पदसमुदायस्य वाक्यत्वे समुदायस्य समुदाय्यपेक्षया भेदाभावात्तत्प्रतीत्य

वृत्तिः।

क्यार्थविशेषे संकेतग्रहाभावाच्च संकेतमनपेक्ष्य बोधकत्वे तु व्युत्पत्तिवैयर्थ्यप्रसङ्ग. बालानामपि बोधापत्तिश्च यद्वा पदपदार्थसम्बन्धस्य उत्पत्तौ वा औत्पत्तिकत्वे स्वाभाविकत्वेऽपि चोदनाः **अवचना** अप्रमाणानि **अर्थस्य** वाक्यार्थावबोधस्य **अतन्निमित्तत्वात्** पदपदार्थसम्बन्धातिरिक्तवाक्यवाक्यार्थसम्बन्धनिमित्तकत्वात् तादृशसम्बन्धस्य शक्तिरूपत्वे तात्पर्यरूपत्वे वा पुरुषसम्बन्धापेक्षाया दुर्निवारत्वात् ॥ २४ ॥

तद्भूतानां तेषु पदार्थे भूतानां वर्तमानानां पदानां **क्रियार्थेन** क्रियावाचकेन पदेन सह **समाम्नायः** परस्परान्वितस्वार्थबोधकत्वेन उच्चारणं भवति **अर्थस्य** वक्यार्थप्रतिपत्तेः **तन्निमित्तत्वात्** पदार्थप्रतिपत्तिनिमित्तत्वात तथाच वाक्यानां वाक्यार्थे शक्तिज्ञान नापेक्ष्यते किंतु पदैरभिहिताः पदार्था एव वाक्यार्थं बोधयन्ति न तु पदानां वाक्यस्य वा तत्र व्यापारः पदार्थबोधेनैव कृतार्थत्वात् तात्पर्यं च न पुरुषेच्छाघटितमिति तत्तत्पदसमभिव्याहृतपदरूपं वाक्यं पदार्थज्ञानसहकारेण तत्तत्पदार्थान्वितभावनारूपं वाक्यार्थं बोधयति एवं च वाक्यार्थबोधस्य पदार्थमूलकत्वेन निर्मूलकत्वाभावात पुरुषापेक्षाभावाच्च निष्प्रत्यूहं वाक्यार्थे चोदनानां प्रामाण्यमिति ॥ २५ ॥

लोके सन्नियमात् सति गृहीतशक्तिकपदे समवहिते सति अगृहीतशक्तिकादपि पिकादिपदात् 'इह सहकारतरौ मधुर पिको रौती'त्यादितो नियमात् बोधदर्शनात् वेदेपि **प्रयोगसन्निकर्षः** अप्रसिद्धस्वर्गहेतुभावनावाचिपदघटितस्य 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यस्यापि अर्थावबोधसम्बन्धः स्यात् ॥ २६ ॥

नुपपत्तिः । अतो वाक्ये शक्तिः : एवं घटेनेत्यादिपदैः प्रकृतिप्रत्ययविभागे तदंशे च शक्तिकल्पने मानाभावादवयविरूपपदस्यैव शक्तिरूपः स्फोटः । एवं भवतिपचतीत्यादौ भूधातुलडाद्युपस्थितौ मानाभावादानुपूर्वीविशिष्टवर्णानां शक्तिरिति वर्णस्फोट इत्याहुः ।

तन्मन्दम्—विस्मृतपूर्ववर्णस्यान्तिमवर्णस्मृतिमतः पदार्थप्रत्ययाभाववत्पदार्थस्मृतिमतो विस्मृतपूर्वपदस्य वाक्यार्थप्रत्ययाभावापत्तेस्तत्तत्पदार्थस्मृतिवशेन पदानुमानविलम्बे मानाभावाच्च । किं चैवं पदार्थवद्वाक्यार्थोऽपि निर्भागः स्यात्, तदा—

(१)प्रसङ्गो बाधतन्त्रोहातिदेशाधिक्रियागमाः ।
प्रयुक्तिशेषभेदाश्च न कल्पेरन्निति स्थितिः ॥ इति ।

वाक्यस्य निरवयवत्वं तु पठ्यमानश्लोकार्थानवबोधे सति तदवयवपदार्थप्रदर्शनेन जायमानेन श्लोकार्थानुभवेन विरुद्धत्वात् प्रत्युक्तम् । पूर्वमज्ञाताया वाक्यशक्तेर्वाक्यार्थानुभवजनकत्वायोगात्पूर्वं ज्ञानकल्पने स्मारकत्वापत्तिः । वाक्यशक्तिज्ञानं तद्धेतुकवाक्यार्थानुभवश्चैकदा विरुद्धौ । एवं पदानामपि निरवयवत्वं प्रत्युक्तम् । धातुप्रत्ययविभागानभिज्ञस्य बाधापत्तेः । एवं वर्णस्फोटोऽपि स्फोटवर्णेषु शक्तिकल्पनगौरवमपेक्ष्य धातुप्रत्ययोपस्थापकत्वकल्पनालाघवेन निरसनीयः, धातुप्रत्ययानभिज्ञस्य यङन्तपदैः पदार्थानुपस्थितेश्च । एकत्वमहत्वप्रतीतिस्तु 'एकोमहान्धान्यराशिः' इतिवदौपाधिकी । अतो न वाक्यस्फोटरूपा वाक्यशक्तिरिति ॥

केचित्तु पदानामितरपदार्थान्वित शक्तिः इतरपदार्थश्च तत्समभिव्याहारेण विशेषितोऽननुगत एव । एवञ्चाकाङ्क्षितयोग्यसन्निहितार्थाभिधायकानां पदानां वाक्यार्थप्रतीतिपादकत्वमित्याहुः ॥

गुरवस्तु कार्यान्वयस्य वाक्यार्थतया पदानामेव कार्यान्विते अनुभाविका शक्तिः । स्मारिका च जातिगुणादौ । अनुभावकशक्तिग्रहे च स्मारकशक्तिज्ञानस्य हेतुता, तेनोपपत्तेर्न वाक्यार्थे शक्तिः । तथाहि प्रयोज्यवृद्धप्रयोजकवृद्धव्यवहारेण शक्तिं गृह्णन् बालः, प्रयोज्यवृद्धप्रवृत्तेश्च मातृस्तन्यप्रवृत्तिदृष्टान्तेन कार्यताज्ञानजन्यत्वमनुमाय, तज्जनकापेक्षायां प्रयोजकवृद्धवाक्यानन्तर्यात्तस्यैव हेतुतां ज्ञात्वा, तत्रत्यपदानां कार्यान्विते शक्तिं जानाति, तत आवापोद्वापाभ्यां तत्तत्पदार्थे

(१) प्रसङ्ग इति । पाशुकानां प्रयाजादीनां पुरोडाशेषुप्रसङ्गः, त्रिषु चाग्नेयादिषु तन्त्रमङ्गानि, कृष्णलादीनां चावघातादिषु बाधः, अग्नये इत्यस्यस्थाने सूर्याय इत्यूहः इत्यादयोनिर्भागवाक्यार्थपक्षे नोपपन्ना भवेयुरित्यर्थः ।

शक्तिं जानन्नपि पूर्वावधृतां कार्यान्वितशक्तिं न बाधते। एवं च पदानां कार्यान्वितवाचकत्वादन्वयेपि शक्तिरित्याहुः ॥

एतन्मतद्वयमपि इतरान्विते कार्यान्विते वा तस्यापि शक्तिग्रहस्य गौरवप्रतिसन्धानदशायां चन्द्रतारकापरिमाणज्ञानवद्बाधसम्भवात्कार्यवाचकपदसमभिव्याहाराभावे शाब्दबोधानुदयप्रसङ्गाच्च न युक्तम्।

नैयायिकास्तु घटत्वप्रकारकघटविशेष्यकप्रत्यक्षादौ समवायादेरिव(१) घटकर्मप्रकारकानयनविशेष्यकशाब्दबोधेपि निष्ठत्वादेः संसर्गतया भानं सम्भवति। प्रकारविशेष्ययोरेव शाब्दत(२) वात्संसर्गस्योभयसमभिव्याहारागम्यत्वात्संसर्गमर्यादालभ्य इत्याहुः ॥

सिद्धान्तस्तु घटमानयेत्यादौ घटपदोपस्थितघटसामान्यस्यानयनान्वयबोधासम्भवाद् घटानयनविशेष एव वाक्यार्थः, स च लाक्षणिकः, अतो लाक्षणिक एव वाक्यार्थः, तत्र च नामसु कारकविशेष्यता सर्वत्र च भावनाविशेष्यतेति नियमः स्मृतिगम्यः(३)। एतेनाख्यातसमभिव्याहारे प्रथमान्तार्थविशेष्यकबोधनियमं वदन्तस्तादृशनियमे मानाभावेन परास्ताः। नहि प्रथमान्तपदार्थस्य प्राधान्यबोधकं स्मृत्यादि मानमस्ति। वाक्यार्थसंसर्गस्योभयविधत्वेन विनिगमनायोगात्। तथा च लाक्षणिकवाक्यार्थे पदसमुदायरूपवाक्यस्य पदजन्यपदार्थोपस्थितिद्वारा जनकत्वमिति वाक्यस्य वाक्यार्थबोधे प्रमाण्यमिति युक्तं विधीनां धर्मे प्रामाण्यम् ॥

वेदपौरुषेयत्वाधिकरणम् ॥ ८ ॥

वेदांश्चैके सन्निकर्षं पुरुषाख्याः ॥ २७ ॥ अनित्यद-

(१) तर्हि स्वसंयुक्तविशेषणतासन्निकर्षेण समवायस्य प्रत्यक्षत्वमङ्गीक्रियेत।

(२) शाब्दत्वाच्छब्दाजन्योपस्थितिविषयत्वादित्यर्थः। आकाङ्क्षालभ्यस्यापि संसर्गस्य शाब्दबोधविषयत्वाभ्युपगमेन यथाश्रुतं तु न युक्तम्। संसर्गमर्यादाआकाङ्क्षा तत्पदत्वरूपा।

(३) स्मृतिगम्य इति। 'भावप्रधानमाख्यानं सत्त्वप्रधानानि पामानि' इति यास्कस्मृतिगम्यइत्यर्थः।

वृत्तिः।

एके अन्ये तार्किकाः वेदान् सन्निकर्षं सन्निकृष्टकालान् वदन्ति यतस्ते वेदाः पुरुषाख्याः पैप्पलादं कालापकं काठकमित्याधुनिकपुरुषेण समाख्यायमानाभवन्ति॥२७॥

र्शनाच्च ॥ २८ ॥ उक्तं तु शब्दपूर्वत्वम् ॥ २९ ॥ आख्याः प्रवचनात् ॥ ३० ॥ परन्तु श्रुतिसामान्यमात्रम् ॥ ३१ ॥ कृते वा विनियोगः स्यात्कर्मणः सम्बन्धात् ॥ ३२ ॥

नन्वस्तु पदानां पदपदार्थसम्बन्धस्य च नित्यत्वं, वाक्यार्थप्रमितेश्च वाक्यजन्यतया विधीनां प्रामाण्यं, तथाऽप्यानुपूर्वीरूपवेदानां नित्यत्वासम्भवात्काठकादिसमाख्यया तत्कर्तृकत्वनिश्चयाच्च पौरुषेयत्वं सम्भवति । पुरुषे च दोषसम्बन्धसम्भावनया न प्रामाण्यं सम्भवति । तथाहि । वेदः प्रागभावप्रतियोगितावच्छेदकधर्मवान् वाक्यत्वाद्, भारतवदित्यनुमानेन पौरुषेयत्वम् । न च सामान्यधर्मस्य प्रागभावप्रति-

---

वृत्तिः ।

अनित्यदर्शनात् 'बबरः प्रावाहणिरकामयत' इति भूतार्थकथनेन तस्मिन्समये वेदो नासीदित्यर्थस्यावगमात् **च** अपि पौरुषेया वेदा **इति पूर्वपक्षः** ॥२८॥

अथ सिद्धान्तः शब्दः शब्दनं पूर्वपूर्वाध्ययनम् **तत्पूर्वकत्व** मुत्तरोत्तराध्ययनस्य अध्येतृभिरुक्तं **तु** । अयं भावः विवादाध्यासितं वेदाध्ययनं अध्ययनपूर्वकम् अध्ययनत्वात् इदानींतनाध्ययनवत् इत्यनुमानान्नैव वेदस्य प्रथमः कश्चिदध्येतास्ति येन सुकर्तृकत्वं स्यादिति ॥ २९ **आख्या** पैप्पलादं कालापमित्यादिसमाख्या **प्रवचनात्** प्रवचनातिशयादुपपद्यते । अयमभिप्रायः पैपलादशाखा पिप्पलादेनयथा सम्यगभ्यस्ता न तथाऽन्येनेति कृत्वा पैप्पलादशाखा इति व्यपदिश्यत न तु पिप्पलाद कृतत्वादिति ॥३०॥ **परम्** अन्यत् अप्रामाण्यसाधकम् 'अनित्यदर्शनम्' इति यदुक्तं तत् **श्रुतिसामान्यमात्रम् तु** नार्थो अतो न दोष इत्यर्थः । तथा च प्रतियुगमनुवर्तमाना बबरादयः प्रवाहनित्यतया चन्द्रसूर्यादिवत् वैदिकपदशक्याः सन्तो वेदस्य नित्यतां व्याघ्नन्ति इति भावः ॥३१॥ नन्वेवमपि 'गावो वा सत्रमासत' 'सर्पाः सत्रमासत' इत्यादिवेदवाक्यानां प्रमत्तगीतसदृशानां कथं प्रामाण्यमत आह—**कृते इति** । **कृते** कर्मणि प्रशंसाद्वारा गाव इत्यादीनां **विनियोगः** अन्वयः **स्यात्** अतो धर्मप्रामाण्यमस्ति वा एव **कर्मणः** स्वत्रादिकर्मणः प्रशंसापेक्षाक्विषये । 'वायव्यं श्वेतमालभेत भूति कामः, । वायुर्वैक्षेपिष्ठादेवता वायुमेव स्वेन भागधेयेनोपधावति, सएवैनं भूतिं गमयति' । इत्यादिविहितकर्मभिः **समस्वात्** तुल्यत्वादित्यर्थः । एवं च वेदोऽपौरुषेय इपि सिद्धम् तथाच 'ब्रह्म स्वयंभु' 'वाचा विरूपनित्यया' अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा' स्वयंभूरेषभगवान्वेदोगीत स्त्वयापुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः' इत्याद्याः श्रुतिस्मृतय इति सिद्धम् ।

इति न्यायव्याकरचार्य मीमांसकशिरोमणि सूर्यनारायणशुक्लविरचितायां जैमिनिसूत्रप्रभायां (वृत्तौ) प्रथमाध्याये प्रथमः पादः पूर्णतामभजत् ।

योगितानवच्छेदकत्वेन(१) वेदत्वस्यातथात्वादसिद्धिरिति वाच्यम् । वेदत्वस्याताहशत्वेपि इदानीन्तनवेदत्वादीनां तदवच्छेदकतया नासिद्धिः अन्यथा घटादीनामपौरुषयेत्वप्रसङ्गः ।

वस्तुतो वेदत्वं प्रागभावप्रतियोगितावच्छेदकं कार्यवृत्तिधर्मत्वात् । तद्घटत्ववदित्यनुमानेन वेदत्वस्यापि तथात्वात् । अतो वेदानां पौरुषेयत्वम् । एवं च काठककालापकादिसमाख्या बवरः प्रावाहणिरकामयतेत्याद्यनित्यसंयोगोप्युपपद्यते । तदुक्तं, सन्निकृष्टकाला वेदा इदानीन्तना इति । तत्र चास्मदादीनां कर्तृत्वासम्भवाद्व्यासादिवदीश्वर एव एवं कर्ता च श्रयो "वेदा अजायन्तेत्यग्नेर्ऋग्वेदो वायोर्यजुर्वेद" इत्यादिदर्शनमुप पद्यते अतो न स्वतः प्रामाण्यमिति चेत्, न ।

उक्तानुमानस्य वेदत्वं न प्रागभावप्रतियोगिताच्छेदकं सामान्यधर्मत्वादित्यनुमानेन सत्प्रतिपक्षितत्वात् । प्रतियोगितावच्छेदकभेदाभावेन सकलघटप्रागभावैक्ये प्रतियोग्युत्पत्तिनाशत्वासम्भवेन च नित्यत्वापत्तेः । इष्टापत्तौ तूत्पन्नस्य पुनरुत्पत्तिप्रसङ्गः, प्रागभावनाशस्वीकारे घटानुत्पत्तिप्रसङ्गः । अवयं वशस्तन्नाशस्वीकारो निरवयवत्वादेवायुक्तः । प्रतियोगिभेदनाभावना नात्वकल्पने संसर्गाभावान्योन्याभावयोरैक्यप्रसङ्गः । अतो न सामान्यधर्मस्य प्रागभावप्रतियोगिताच्छेदकत्वम् ।

प्रथमानुमानमपि वेदाः प्रागभावप्रतियोगितावच्छेदकधर्माभाववन्तो, ऽस्मर्यमाणकर्तृकत्वाद्, आत्मवदित्यन्वयिना। अस्मर्यमाणकर्तृकवाक्यत्वादिति व्यतिरेकिणा च सत्प्रतिपक्षितम् । वेदशून्यकालाभावेन वेदप्रागभावासिद्धश्च । तथाहि । पूर्वकालो न वेदशून्यः कालत्वाद्, वर्त्तमानकालवत् । पूर्वकालीनं वेदाध्ययनं गुर्वध्ययनपूर्वकं, वेदाध्ययनत्वाद्, इदानीन्तनवेदाध्ययनवत् । वेदा न पौरुषेयाः अस्मर्यमाणकर्तृकत्वादित्यनुमानेनापौरुषेयत्वसिद्धेश्च ।

---

(१) प्रतियोगितानवच्छेदकत्वेनेति । घटो नास्तीत्यादौ प्रतिबन्ध्यप्रतिबन्धकभावानुरोधेन घटत्वादेः सामान्य धर्मस्य प्रतियोगितावच्छेदकत्वं कल्प्यते न तु घटप्रागभावादौ । तथाहि घटवति भूतले घटो नास्तीति प्रतीतिर्न भवति तद्घटो नास्तीति प्रतीतिश्च भवति इति प्रतीत्योर्वैलक्षण्योपपत्तये एकस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वपरस्य विशेषधर्मावच्छिन्न प्रतियोगिताकत्वे चाङ्गी क्रियते । एकघटवत्यपि भूतले घटान्तरप्रागभावप्रतीतिर्भवतीति तस्य तद्घटोनास्तीति प्रतीतिवद्विशेषधर्मावच्छिन्नप्रतियोगिताकत्वमेवाङ्गीक्रियते इति भावः ।

नन्वस्मर्यमाणकर्तृककूपादौ व्यभिचारः, तत्रापि सामान्यतः कर्तृस्मरणात् । अतः पौरुषेयत्वासम्भवादपौरुषेयत्वम् । एव "वाचा विरूप नित्यये"ति श्रुतिः—

स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा ।
शिवाद्या ऋषिपर्यन्ताः स्मर्त्तारोऽस्य न कारकाः ॥

इति स्मृतिश्चोपपद्यते । काठकादिसमाख्या तु श्रुतिस्मृतिविरोधात्प्रवचननिमित्तत्वेनोपपादनीया । अग्नेर्ऋग्वेद इत्यादिश्रुतिरपि अग्निना ज्ञापितइति व्याख्येया । (१)अनित्यसंयोगोऽपि प्रवाहनित्यतामादायोपपादनीयः । प्रवाहनित्यत्वं च (२)सजातीयप्रागभावसमयव्याप्तसजातीयध्वंसकत्वरूपम् । यद्वा बहुक्षीरादिवाक्यवदसत्यकथादिना विधेयस्तुतिपरत्वेनोपपादनीया । अतोऽपौरुषेया वेदा इति सिद्धं वेदप्रामाण्यम् ॥

विश्वामित्रकुलध्वजः समभवद्यो भट्टनारायण
स्तद्वंशस्य करीरतां दधदयं विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालनात्
तद्ग्रन्थे प्रथमादिमोऽङ्घ्रिरगमच्छ्रीभाट्टचिन्तामणौ ॥ १ ॥
अहो बहु परीक्षितुं निकषणीयमेतन्निजे
न मत्सरकदुष्णिते कषशिलानिभे चेतसि ।
परं तु हृदयालुभिः खलु दयालुभिः स्थाप्यतां
महाद्भुतरसाम्बुधौ निजकृपानिधौ मद्वचः ॥ २ ॥

इति भट्टकुलावतंसमीमांसकमहामहोपाध्यायश्रीगागाभट्टकृतभाट्टचिन्तामणौ प्रथमाध्यायस्य प्रथमः पादः ॥

॥ संपूर्णोयं भाट्टचिन्तामणेस्तर्कचरणः ॥

(१) बर्बरः प्रावाहणिरकामयत इत्यादिरूपः अनित्यसंयोगः प्रवाहनित्यतया संसारस्यानादितयोपपादनीयइत्यर्थः ।

(२) सजातीयेति । सजातीयस्य कस्यचिद्वस्तुनो ध्वंसः कस्यचित्प्रागभावः यस्मिन्समये इत्यर्थः ।

इति भाट्टचिन्तामणिमयूखे तर्कपादः ।

विश्वेश्वरः शरणम् ।

भाट्टचिन्तामणिमयूखः ।

पृ० १ पं० १ अधितदुद्यानम्—अधिसाकेतोद्यानमित्यर्थः ।

पृ० १ पं० ९ मुरविद्विष इति । मुरारेरित्यर्थः । मुरारिमतं मुक्तावल्यां 'प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः' इति कारिकाव्याख्यावसरे प्रामाण्यवादगादाधर्यां च निरूपितम् । गुरोः प्रभाकरस्य कुमारिलभट्टपश्चाद्भावित्वेऽपि वृत्तानुरोधेन प्रथमं निर्देशः । इत्थं च मीमांसकानां प्रस्थानत्रयं कुमारिलप्रस्थानं प्रभाकरप्रस्थानं मुरारिप्रस्थानं चेति । एतदनुरोधेनैव 'मुरारेस्तृतीयः पन्था' इति प्रसिद्धिः ।

पृ० १ पं० १८ सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इति कुमारिलभट्टपादोक्तिमनुसृत्य प्रयोजनादीनाह—तेनेति । तथा च अस्य शास्त्रस्य धर्मज्ञानं प्रयोजनं, धर्मो विषयः, शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, अधीतवेदोऽधिकारी इति बोध्यम् । एत एवानुबन्धचतुष्टयशब्देन व्यपदिश्यन्ते । अनुबन्धत्वं च प्रवृत्तिप्रयोजकज्ञानविषयत्वम् । प्रवृत्तिप्रयोजकं च ज्ञान मिष्टसाधनताज्ञानम् । पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः । प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥ इति मण्डनमिश्रोक्तेः । तत्र इष्टत्वावच्छिन्ना प्रयोजननिष्ठा इदंत्वावच्छिन्ना विषयनिष्ठा साधनत्वत्वावच्छिन्ना साध्यसाधनभावरूपसम्बन्धनिष्ठा अहन्त्वावच्छिन्नाधिकारिनिष्ठा विषयतेति चतुर्ष्वपि समन्वयः ।

पृ० १ पं० २० वेदाध्ययनेति । अयं भावः 'धर्मेण पापमपनुदति' इति वाक्येभ्यः सामान्यतो धर्मे ज्ञाते धर्मविशेषविषयिणी जिज्ञासा जायते विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात् । तद्विषयकेति । कृतिं प्रतीच्छायाः इच्छां प्रति च ज्ञानस्य कारणत्वादित्यर्थः ।

पृ० २ पं० ३ स्वं सूत्रं तेन सूचितो यो न्यायः वेदाध्ययनस्य अदृष्टार्थत्वरूपः तेनानुग्राह्यं यत्प्रमाणं 'स्वाध्यायोऽध्येतव्यः' इति अध्ययनविधिरूपं तत्सापेक्षमिदं सूत्रमित्यर्थः । तेनापि—अध्ययनविधिनापि ।

पृ० २ पं० १२ स्तोभाध्ययन इति । अर्थाभिधानौपयिकेभ्यः ऋगक्षरेभ्योऽधिकं विवर्णं च स्तोभ इति व्यपदिश्यते 'अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात्' (९ अ० २ पा० ३९ सू०) इति जैमिनिसूत्रात् ।

पृ० ४ पं० ३ अङ्गसम्पादनासमर्थस्येति । तथा च शास्त्रदीपिका—

सत्यमध्ययनं नाङ्गं तत्कृता त्वङ्गमर्थधीः ।
तद्वतः क्रतवो लब्ध्वा न तुर्यस्याभिपन्ति ताम् ॥ इति ।

पृ० ४ पं० २७ क्वचित्पाठ इति । एतन्मते ऽधिकरणस्य षडङ्गत्वं बोध्यम् ।

पृ० ५ पं० ३ स्मृतिस्त्विति । अधीत्य स्नायादिति स्मृतिस्त्वित्यर्थः ।

पृ० ५ पं० १२ अथशब्दो मङ्गलार्थक इति । अथ शब्दस्य मङ्गलार्थकत्वं च 'निरस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे । यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयां बभूव ताम् ॥ इति श्रीहर्षपद्यस्थितस्य अथ स्नपयांबभूवेत्यस्य मङ्गलस्नानेन स्नपयाञ्चकारेति व्याख्यानेनावगम्यते ।

पृ० ४ पं १४ आचारानुमेय इति । मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत् इति अनुमानस्वरूपम् । भोजनादौ व्यभिचारवारणायालौकिकेति । रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति । शिष्टपदं स्वरसार्थं न कुर्यान्निष्फलं कर्म इति वचनेन जलताडनादेर्निषिद्धत्वेनाविगीतपदेनैव व्यभिचारवारणात् । न च विधिनिषेधयोर्मनुष्याधिकारीयत्वात् पश्वादिकृतवृथाचेष्टायामलौकिकत्वाविगीतत्वयोः सत्त्वात्तत्र व्यभिचारवारणाय शिष्टपदमावश्यकमिति वाच्यम् , बलवदनिष्टाननुबन्धित्वरूपाविगीतत्वस्य इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तदुःखाजनकत्वपर्यवसन्नस्य विवक्षणेन वृथाचेष्टास्थले इष्टोत्पत्त्यभावेन कष्टं कर्मेति न्यायेन तज्जनितश्रमस्य इष्टोत्पत्त्यनान्तरीयकदुःखजनकतया पश्वादिवृथाचेष्टायामपि अविगीतत्वाभावेन व्यभिचारासंभवादिति ध्येयम् ।

पृ० ५ पं १६ विघ्नसमसंख्याकेति । नन्विदमयुक्तम् यत्र विघ्नापेक्षया मङ्गलानामाधिक्यं वर्तते तत्र विघ्नसमसंख्याकमङ्गलाभावात् समाप्त्यभावापत्तेरिति चेदत्रोच्यते शते पञ्चाशन्न्यायेन तत्रापि विघ्नसमसंख्याकत्वोपपत्तेः । ननु स्थलान्तरीयविघ्नसंख्यामादाय न्यूनसंख्याकमङ्गलादपि समाप्तिः स्यादिति चेन्न तत्स्थलीयविघ्नेतरावृत्तिः तत्स्थलीयसकलविघ्नवृत्तिर्या संख्या तत्सजातीया तत्स्थलीयमङ्गलेतरावृत्तितादृशसकलमङ्गलवृत्तिर्या संख्या तादृशसंख्यावन्मङ्गलत्वेन कारणत्वाङ्गीकारेणादोषात् ।

पृ० ५ पं० २८ तादृशनियमस्येति । इष्टसाधनत्वभाव्यत्वयोः समानप्रकारकत्वनियमस्य व्यभिचारः तुषाणामुपवापकर्मत्वेऽपि तुषाणां प्रतिपत्तिकर्मतया इष्टसाधनत्वाभावादित्यर्थः ।

पृ० ६ पं० ६ धर्मस्वरूपं तत्प्रमाणं चेति । यश्चोदनालक्षणः स धर्म इति योजनया श्रुत्या स्वरूपविधावर्थात्प्रमाणविधिः यो धर्मः स चोदनालक्षणः चोदनैव तस्य लक्षणं प्रमाणम् चोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधावर्थात्स्वरूपविधिरिति भावः ।

पृ० ६ पं० ८ संकरादिति । क्रियात्वाभाववत्यामिच्छायां यागत्वं यागत्वाभाववति गमने क्रियात्वं यागपदार्थक्रियायां यागत्वं क्रियात्वं चेति संकर इत्यर्थः । संकरश्च परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशरूप इति बोध्यम् ।

पृ० ६ पं ११ यागापूर्वोभयनिष्ठोपाधिरेवेति । यागापूर्वान्यतरत्वरूपो धर्मविशेष एवेत्यर्थः ।

पृ० ६ पं० १७ मुख्यवेदेति । तेन 'इतिहासपुराणानि पञ्चमो वेद उच्यते' इत्यनेन गौणवेदप्रयोगविषयत्वस्य इतिहासादिषु सत्त्वेऽपि नातिव्याप्तिः ।

पृ० ८ पं० १ प्रभाकरवचनमिति । यथा चाहुः 'यस्य हि विधिः स्वसिद्ध्यन्यथानुपपत्त्यानुष्ठानमाक्षिपति तद्विधेयमित्युच्यते काम्येषु च कर्मसु कामनाविधिवशादेव प्रवृत्तिसिद्धेस्तत एव विधिः सिद्ध्यन्नन्यथानुपपत्त्यभावान्न स्वयमनुष्ठानमाक्षिपति' इति ।

पृ० ९ पं० १५ अर्थवादानामिति । 'वायुर्वै क्षेपिष्ठा' इत्यादीनामर्थवादानां प्राशस्त्ये लक्षणया विधिवाक्यैः सहैकवाक्यतयाऽन्वयेन 'यागः प्रशस्तः' इति 'यागभावना प्रशस्ता' इति वा बोध इति भावः । प्रकारांशे प्राशस्त्यांशे । विशेष्यांशे—यागांशे ।

पृ० ९ पं० १९ मन्त्राणाम्—'अग्नये त्वा जुष्टं निर्वपामि' इत्यादीनाम् ।

पृ० ९ पं २८ पुरुषान्तरीयज्ञानविषयत्वमादायाव्याप्तिवारणाय स्वसमानाधिकरणेति । उत्तरक्षणवृत्तिज्ञानविषयत्वमादायाव्याप्तिवारणाय स्वाव्यवहितेति ।

पृ० ९ पं० ३० शब्दप्रकारकेति । देवदत्त इत्यादिपदात् 'देवदत्तपदवान्' इति बोधवदग्निहोत्रपदात् 'अग्निहोत्रपदवान्' इति बोध इति भावः ।

पृ० १० पं० ९ तद्वद्विशेष्यकत्वावच्छिन्नेति । तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वं प्रमात्वमित्यर्थः । नन्वेवं यत्र रङ्गरजतयोरिमे रजते इति ज्ञानं तत्रातिव्याप्तिरिति चेन्न तदभाववन्निष्ठविशेष्यताभिन्नविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वं प्रमात्वमित्यङ्गीकारेणादोषात् ।

पृ० १० पं० १७ न गौरवमिति । स्मृतिभिन्नत्वे सति ज्ञानत्वस्यानुभवत्वेन विशेष्यविशेषणभावव्यत्यासेन गौरवं स्यादिति भावः।यद्वा न गौरवमिति । स्मृत्यन्यज्ञानत्वरूपानुभवत्वस्य प्रमात्वघटकत्वे वैयर्थ्यं स्यादिति ज्ञानत्वघटितस्यैव प्रमात्वस्यौचित्यमिति भावः । वैयर्थ्यं च स्वसमानाधिकरणप्रकृतसाध्यव्याप्यतावच्छेदकधर्मान्तरघटितत्वम् । यथा वह्नौ साध्ये धूमत्वघटितत्वेन नीलधूमहेतौ वैयर्थ्यं तथा प्रकृते अनुभवत्वस्य ज्ञानत्वघटितत्वे स्यात् पर तु तदेव न अनुभवत्वस्य जातिरूपत्वाङ्गीकारादिति तत्वम् ।

पृ० १० पं० १८ लाघवादिति । तथा च ज्ञानत्वघटितमेव प्रमात्वं नत्वनुभवत्वघटितमनुभवत्वस्य जातित्वे मानाभावेन वैयर्थ्यात् एवं सति स्मृतेरपि प्रमात्वं स्यादिति चेदिष्टापत्तिरिति गृहाण ।

पृ० १० पं० २२ न चेति । तथा च अनुभवत्वं न स्मृतिजनकतावच्छेदकमिति भावः गौरवादिति । संशयभिन्नज्ञानत्वरूपनिश्चयत्वेन स्मृतिजनकत्वेन गौरवम् । ज्ञानत्वेन स्मृतिजनकत्वे आह बहुतरेति । अयं भावः विशेषरूपेण कारणत्वे व्यभिचाराज्ञाने सामान्यरूपेण करणत्वे ऽन्यथासिद्धत्वम् अत एव दण्डस्य द्रव्यत्वेन न कारणतेति भावः ।

११—३ सुवर्णतृणे इति ज्ञाने अत्यन्ताभावस्याव्याप्यवृत्तितया अंशे उपेक्षात्वमंशे उपेक्षात्वात्यन्ताभावश्च एकस्मिन्ज्ञाने तिष्ठतः भेदस्तु व्याप्यवृत्तिः स तु न तिष्ठतीति उपेक्षान्यत्वमित्यस्य उपेक्षात्वात्यन्ताभाव इत्यर्थो वर्णित इति भावः ।

पृ० ११ पं० २३ शब्दान्तरात् ददाति जुहोतीत्यादौ, अभ्यासात् समिधो यजति इडो यजति इत्यादौ, संख्यायास्तिस्र आहुतीरित्यादौ, नाम्नः अथैष ज्योतिरित्यादौ, गुणात् वैश्वदेव्यामिक्षा वाजिनमित्यादौ, प्रकरणान्तराद्वारवन्तीयादौ कर्मभेद इत्यर्थः ।

पृ० १२ पं० ३ ननु दोषाभाव एव कारणमस्त्वत आह—दोषाभावस्येति । गौरवादिति । विनिगमनाविरहादनन्तदोषाभावस्य कारणत्वे गौरवम् । अनुत्पत्तिप्रसङ्गाच्चेति । तत्र पीतदोषसत्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गादित्यर्थः । ननु गुणसत्त्वेऽपि पित्तेन प्रतिबन्धान्न श्वैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वं वक्तव्यं तथा च किं गुणस्य हेतुत्वकल्पनयेत्यत आह–अन्वयव्यतिरेकाभ्यामिति । गुणसत्त्वे प्रमा गुणाभावे प्रमाभाव इत्यन्वयव्यतिरेकाविति भावः । गुणः—

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः ॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा ।
गुणः स्यात्, भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥

इति कारिकावल्यामुक्तः ।

दोषः—पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥ इति च तत्रैव ।

पृ० १२ प० १० तद्विषयविषयकत्वम्—अर्थक्रियाविषयविषयकत्वमित्यर्थः ।

पं० २३ तस्यापि—अर्थक्रियाज्ञानस्यापि ।

पृ० १३ पं० २ गौरवादिति । यथा घटः इति सविकल्पकानन्तरं घटज्ञानवानहमिति ज्ञानं भवति तथा घटवट्त्वे इति निर्विकल्पानन्तरमपि ज्ञानोत्पत्तिः स्यादिति निर्विकल्प-कप्रत्यक्षवारणाय निष्प्रकारकत्वादिज्ञानं प्रतिबन्धकं वाच्यमिति विनिगमनाविरहेण गौरवमिति भावः ।

पृ० १३ पं० ९ उचितमिति । आत्मनिष्ठगुणप्रत्यक्षे तादात्म्येन ज्ञानं प्रतिबन्धकम् इति ज्ञानस्य प्रत्यक्षं न सम्भवति । उपनीतभानत्वं—ज्ञानलक्षणासन्निकर्षेण भानत्वमि-ति भावः ।

पृ० १३ पं० २९ लाघवेनेति । घटाकाशसंयोगप्रत्यक्षवारणाय संयोगप्रत्यक्षे यावदा-श्रयप्रत्यक्षस्य हेतुताङ्गीक्रियते , न तु व्यासज्यवृत्तिधर्मप्रत्यक्षे धर्मप्रत्यक्षे वा गौरवात् ।

पृ० १४ पं० ११ एकत्वेनाङ्गीकृतास्त्विति । एकैका एव नीलारुणादिव्यक्तयो नित्याः, न च नीलो नष्ट रक्त उत्पन्न इति प्रत्ययात्तासामनित्यत्वमिति वाच्यम् आश्रयनिष्ठनाशा-प्रतियोगित्वस्य गुणे आरोपेण ध्वनिगतनाशप्रतियोगित्वस्य शब्दे आरोपेण उत्पन्नः ककार इति प्रतीतिवत् रक्त उत्पन्नः इति प्रतीतेरुपपत्तेर्गुणानां नित्यत्वमिति मतेनेदम् ।

तदुक्तं काव्यप्रदीपे—'ननु पटादिनिष्ठानां शुक्लादिगुणानां गुडतण्डुलादिनिष्ठानां पाकादिक्रियाणां च भेदस्य प्रत्यक्षतः सिद्धौ व्यक्तिसंकेतपक्षोक्तदोषः (आनन्त्यव्यभि-चाररूपः) समान इति चेद्—न गुणादीनां स्वरूपतः एकरूपाणामाश्रयभेदाद्भेद इव लक्ष्यते यथैकस्य मुखस्य खड्गमुकुराद्यालम्बनभेदात्' इति ।

अत्रोद्योतः 'भेद इवेति प्रत्यभिज्ञालाघवादिभिः शुक्लादीनामैक्यसिद्धौ भेदप्रतीति राश्रयौपाधिकी तत्सम्बन्धस्यैव च नाशोत्पादाविति भावः' इति ।

पृ० १४ पं १३ कपालनाश इति । समवायिकरणनाशस्य द्रव्यनाशं प्रति प्रयोजक-तया कपालनाशानन्तरमेव घटनाशाभ्युपगमेन कपालनाशान्तरं क्षणमात्रं घटस्थिते-र्नैयायिकैरभ्युपगमादिति भावः ।

पृ० १५ पं० १४ सूत्रकार इति । इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति न्यायसूत्रकार इत्यर्थः ।

पृ० १५ पं० १७ ज्ञानकरणकत्वादिति । अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्य-ज्ञानस्य शाब्दे शब्दज्ञानस्य अर्थापत्तावुपपाद्यज्ञानस्य स्मृतौ पूर्वानुभवस्य करणत्व-मित्यर्थः ।

पृ० १५ पं० २१ जन्यज्ञानेति । प्रत्यक्षं जन्यमस्मदादीनां नित्यमीश्वरस्य अनुमित्या-दिकं तु जन्यमेवेति भावः । तादृशानां जन्यज्ञानमात्रवृत्तीनाम् ।

पृ० १६ पं० १ अन्ये त्विति । सुखं द्रव्यान्तरसंयोगासमवायिकारणकं नित्यद्रव्यजन्य-विशेषगुणत्वात् इत्यनुमानाकारः ।

इष्टैवेति । मनसो विभुत्ववादिमते एककालावच्छेदेन पादे मे सुखं शिरसि मे वेदनेति ज्ञानानुभव इष्ट एवेति भावः ।

पृ० १६ पं० १७ ननु बाह्यैकेन्द्रियेति । शब्दो गुणः बाह्यैकेन्द्रियग्राह्यत्वात् रूपादि-

वत् व्यतिरेके घटादिवत् । न च वायौ व्यभिचारः, बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणतया वायोः प्रत्यक्षत्वानभ्युपगमादिति भावः । वायाविति । चाक्षुषद्रव्यप्रत्यक्षे उद्भूतरूपं त्वाचद्रव्यप्रत्यक्षे च उद्भूतस्पर्शः कारणमिति मतेनेदम् ।

पृ० १६ पं० २७ प्रकारताविशेष्यतादिविषयतारहितमिति। ननु विषयता प्रकारताख्या विशेष्यताख्या संसर्गताख्या चेति त्रिविधा तत्र निर्विकल्पके त्रिविधविषयताशून्यत्वसत्वेन निर्विषयत्वमेव स्यादिति चेन्न निर्विकल्पके तुरीयविषयताया अभ्युपगमेनादोषात्।

पृ० १७ पं० ८ समवायघटितसामानाधिकरण्येनेति । समवायेन यत्स्वाधिकरणं तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वसंबन्धेनेत्यर्थः स्वसमवायिसमवेतत्वसम्बन्धेनेति यावत् । एकार्थसमवायेनेति । एकस्मिन्नर्थे उभयोः समवायः इत्यर्थः । यथा महत्वं द्रव्ये समवायेन वर्तते तत्रैव गुणक्रिये अपि इति एकार्थसमवायसम्बन्धेन महत्वं गुणक्रिययोः तन्निरूपितसमवायसम्बन्धावच्छिन्ना वृत्तिता च गुणक्रियागतजातौ स्वाश्रयसमवेतसमवेतत्वसम्बन्धेनेति यावत् ।

पृ०१७ पं० १० कालादिचाक्षुष इति । इदानीं घट इति प्रतीत्या कालस्यापि चाक्षुषत्वमिति भावः । तदुक्तं वेदान्तपरिभाषायाम् 'नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयकत्वेन न तत्राव्याप्तिः' इति । अत्र दीपिका 'इदानीं घटो वर्तत' इत्येवंरूपानन्यथासिद्धप्रतीतिबलेन महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य कालातिरिक्तद्रव्यचाक्षुषताप्रयोजकत्वकल्पनात्' इति ।

पृ० १७ पं० १४ मानसेऽपीति । 'कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्य' इति प्रशस्तपादभाष्यमुपादाय आदिपदेन परममहत्परिमाणं गृह्यते इत्युदयनाचार्यग्रन्थः आत्मपरिमाणातिरिक्तमहत्परिमाणपरः तेन आत्समानसे परममहत्परिमाणस्य हेतुतायां नक्षतिरिति वदतां मतेनेदम् । संकोचे मानाभाव इति मतेनाह–नेत्यन्य इति ।

पृ० १७ पं० २७ अभावस्त्रिधेति । नन्वभावानां त्रैविध्यमनुपपन्नम् उत्पन्नेऽपि घटे तदीयकारणानां कपालसंयोगदण्डादीनां सद्भावेन उत्पन्नस्य पुनरुत्पादवारणाय प्रागभावस्याप्यवश्यमङ्गीकर्तव्यत्वात् । ततश्च घटोत्पत्तिं प्रति प्रागभावस्यापि हेतुतया तस्यैव तदानीमभावेन न पुनर्घटोत्पाद इति 'अयं घटः स्वोत्पत्तिक्षणावृत्तिकारणाजन्यः स्वोत्पत्तिद्वितीयक्षणानुत्पन्नत्वात् इत्यनुमानेन प्रागभावसिद्धिः । तस्य सामग्रीनाश्यत्वेन उत्पत्तिक्षणावृत्तित्वादिति चेद्—

न—जन्यद्रव्यं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य हेतुताभ्युपगमेनैवोक्तदोषवारणसंभवात् प्रागभावस्यघटं प्रति हेतुताङ्गीकारानावश्यकतया प्रागभावासिद्धेः । घटो ध्वस्त इति प्रतीतिबलेन ध्वंसस्य सिद्धावपि प्रागभावस्य सिद्धौ मानभावः घटो भविष्यतीत्यत्र भविष्यत्वं वर्तमानकृतिध्वंसाधिकरणकालोत्पत्तिकत्वरूपमिति न भविष्यतीतिप्रतीत्यापि प्रागभावसिद्धिप्रत्याशेति तत्त्वम् ।

१८ पं० १२ चार्वाकैकदेशिन इति । यथाहुः—अन्यत्र वर्तमानस्य ततोऽन्यस्थान जन्मनि । तस्मादचलतः स्थानाद् वृत्तिरित्यतियुक्तता ॥ नायाति न च तत्रासीदस्तिपश्चान्नचांशवत् । जहाति पूर्वं नाधारमहो व्यसनसंततिः ॥ इति ।

१८ पृ० पं० २६ व्यक्तेरभेद इति । व्यक्तेरित्यत्र निष्ठत्वं षष्ठ्यर्थः, तथा च स्वाश्रयीभूतव्यक्तिनिष्ठो भेदाभावः स्वस्याकाशत्वस्य जातित्वे बाधकः स्वमाकाशत्वं तदा-

श्रयीभूता व्यक्तिराकाशरूपा तत्राकाशभेदः 'आकाशं न' इति प्रतीतिसाक्षिको न वर्तते इति भेदाभावसत्त्वादाकाशत्वं न जातिः ।

न चाकाशे आकाशभेदस्यासत्त्वेऽपि घटभेदस्य 'आकाशं घटो न' इति प्रतीतिसाक्षिकस्य सत्त्वेन भेदसामान्याभावस्यासत्त्वादाकाशत्वं जातिः स्यादेवेति वाच्यम्, भेदः स्वाश्रयीभूतव्यक्तिप्रतियोगिको ग्राह्यः, तथा च स्वाश्रयीभूतव्यक्तिप्रतियोगिको भेदाभावः स्वस्य जातित्वे बाधक इत्यर्थस्य लाभेनाकाशे आकाशभेदाभावस्य सत्त्वेन आकाशत्वे जातित्वबाध इत्यदोषात् ।

तुल्यत्वं स्वभिन्नजातिसमनियतत्वं स्वस्य जातित्वे बाधकम्, एवं कलशत्वं तद्भिन्नजातिर्घटत्वं तत्समनियतत्वं कलशत्वे इति कलशत्वे जातित्वबाधः 'अयं घटः' अयं घटः' इत्यनुगतधियः 'अयं कलशः अयं कलशः' इत्यनुगतधियश्च घटत्वजाति कलशत्वजाति वा ऽऽदायोपपत्तौ घटत्वकलशत्वयोरुभयोर्जातित्वस्वीकारे मानाभावस्तुल्यत्वस्य जातित्वबाधकत्वे बीजमिति बोध्यम् ।

परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः संकरः, भूतत्वमूर्तत्वयो जातित्वे बाधकः । मूर्तत्वाभाव आकाशे तत्र च भूतत्वं, भूतत्वाभावो मनसि तत्र च मूर्तत्वम्, उभयोः पृथिव्यादिचतुष्टये समावेश इति सांकर्याद् भूतत्वं मूर्तत्वं वा न जातिरिति ध्येयम् । सांकर्यस्य जातित्वबाधकत्वे मानं तु 'जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभावः' इति नियमस्य भङ्गप्रसङ्ग एवेति बोध्यम् । वैशिष्ट्यं च स्वसामानाधिकरण्य स्वाभावसामाधिकरण्योभयसंबन्धेन । उक्तोभयसंबन्धेन यज्जातिविशिष्टजातित्वं यत्र तत्र तज्जातिव्यापकत्वमिति नियमः इष्टश्च पृथिवीत्वव्यापकेद्रव्यत्वादौ एतादृशनियमभङ्गापत्तिरेव सांकर्यस्य जातित्वबाधकत्वे मानम् । प्रकृते यदि भूतत्वमूर्तत्वे जाती स्यातां तदा जातिर्भूतत्वजातिस्तदधिकरणपृथिव्यादिवृत्तित्वस्य तदभावाधिकरणमनोवृत्तित्वस्य च मूर्तत्वजातौ सत्त्वेन जातिविशिष्टजातित्वावच्छिन्नं मूर्तत्वं जातमिति मूर्तत्वे एवं भूतत्वं तदधिकरणाकाशनिष्ठमूर्तत्वाभावप्रतियोगित्वमेव न तु तदभाव इति नियमभङ्गः स्यात । वस्तुतस्तु उक्तनियमे मानाभावेन सांकर्यस्य जातिबाधकत्वं नव्या न सहन्त इति ध्येयम् ।

अप्रामाणिकानन्तपदार्थकल्पनाविश्रान्तेरभावो ऽनवस्था जातिवृत्तिधर्मस्य जातित्वे बाधिका । घटत्वपटत्वादिजातिषु इयं जातिरियं जातिरित्यनुगतप्रतीत्या यदि काचि जातिरभ्युपगम्यते तदा तस्यां काचिदन्या जातिरभ्युपेया तस्यां चान्येत्यनवस्था स्यादिति न जातौ जातिरङ्गीकर्तव्येति भावः ।

ननु निखिलजातिषु एकस्या जातेरङ्गीकारे तस्यां न, जात्यन्तरं व्यक्तेरैक्यादित्यनवस्थाया जातिबाधकत्वं विफलमिति चेत्? न, निखिलजातिष्वेका जातिस्तत्र तदाश्रयीभूतघटत्वादिजातिषु चैका एवमग्रेऽपीत्येवंरीत्या ऽनवस्थेत्याशयात् ।

रूपस्य विशेषलक्षणस्य स्वतोव्यावर्तकत्वस्य हानिः रूपहानिर्विशेषवृत्तेर्धर्मस्य जातित्वे बाधिका । तथा च जात्याश्रयस्य जातिपुरस्कारेणैव व्यावर्तकत्वनियमात् विशेषत्वजातेरङ्गीकारे विशेषत्वेनैव रूपेण विशेषाणां व्यावर्तकतया स्वतोव्यावर्तकत्वरूपस्य विशेषलक्षणस्य भङ्गापत्तिरिति भावः ।

नचोक्तनियमे मानाभाव इति वाच्यम्, नियमानङ्गीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव परमाण्वन्तरभेदसाधकत्वसम्भवे विशेषपदार्थस्यैवासिद्धिप्रसङ्गात् ।

प्रतियोगिताऽनुयोगितान्यतरसम्बन्धेन समवायाभावः समवायाभाववृत्तिधर्मयोर्जातित्वे बाधकः। यः समवायेन कुत्रचित्तिष्ठति तत्र प्रतियोगितासम्बन्धेन, यत्र तिष्ठति तत्रानुयोगितासम्बन्धेन समवायो वर्तते। समवायो ऽभावो वा न समवायेन कुत्रचित्तिष्ठति न वा समवायाभावयोः कश्चित्समवायेन तिष्ठतीति समवाये अभावे च प्रतियोगिताऽनुयोगितान्यतरसम्बन्धेन समवायाभावो वर्तत इति समवायत्वमभावत्वं वा न जातिरिति भावः।

ननु यदि समवायत्वस्याभावत्वस्य च जातित्वाङ्गीकारः स्यात्तदा समवायेनैव तौ समवायाभावयोस्तिष्ठत इति अनुयोगितासम्बन्धेन समवायस्य समवायाभावयोस्सत्त्वात्कथं जातित्वबाध इति चेत् न, प्रतियोगिताऽनुयोगितान्यतरसम्बन्धेन जात्यतिरिक्तप्रतियोगिकत्वविशिष्टसमवायाभावः समवायाभाववृत्तिधर्मयोर्जातित्वे बाधक इति स्वीकारेणादोषात्। एवञ्च अनुयोगितासम्बन्धेन रूपे जात्यतिरिक्तप्रतियोगिकसमवायाभावसत्त्वेन व्यभिचारवारणाय प्रतियोगित्वनिवेशः। आत्मनि प्रतियोगितासम्बन्धेन समवायासत्त्वेन व्यभिचारवारणायानुयोगितानिवेशः इति बोध्यम्।

न च समवायस्यैकत्वेन तद्वृत्तिसमवायत्वस्य 'व्यक्तेरभेदः' इत्यनेन जातित्वबाधात् तस्यासम्बन्ध एतदुदाहरणत्वे न सम्भवतीति वाच्यम्, समवायो नानेति नव्यमते व्यक्तेरभेद इत्यनेन जातित्वबाधासम्भवेन असम्बन्धोदाहरणत्वस्य सौष्ठवात्।

ननु जातौ जात्यतिरिक्तप्रतियोगिकत्वविशिष्टसमवायस्य प्रतियोगितया ऽनुयोगितया चासत्त्वेनासम्बन्ध इत्यनेनैव जातिबाधसम्भवेऽनवस्थायो जातित्वबाधकत्वकथनं विफलमिति चेत् न जात्यतिरिक्तेत्यत्र जातिपदस्यासमवेतवृत्तिजातिपरतयाऽदोषात्।

पृ० १८ पं० ३३ यथोपेक्षात्वमिति। अयमाशयः—यत्र समूहालम्बनं घटः पटश्च इति ज्ञानं जातं तस्य च एकविषयस्मारकत्वमपरविषयास्मारकत्वं च तत्र ज्ञाने उपेक्षात्वजात्यनभ्युपगमे सकलविषयस्मारकत्वम् अभ्युपगमे च सकलविषयास्मारकत्वं स्यादिति यद्विषयास्मारकत्वं तस्य तद्विषयावच्छेदेने उपेक्षात्वमभ्युपगन्तव्यम् अन्यविषयांशे च तदभावः इति तद्विषयकस्मृतौ तद्विषयावच्छिन्नमुपेक्षान्यत्वं प्रयोजकवक्तव्यमित्यव्याप्यवृत्तित्वादुपेक्षात्वं न जातिरिति।

पृ० १९ पं० १ सङ्करान्तर्गतमिति। वस्तुतस्तु चाक्षुषत्वव्याप्यमुपेक्षात्वं नानैव स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकमुपगन्तव्यं भेदकूटस्य कारणतावच्छेदकत्वे मानाभावात् तथा च न जातिसंकर इति न संकरान्तर्गतमिति आंशिकत्वमपि स्वातन्त्र्येण जातिबाधकमिति बोध्यम्।

पृ० १९ पं० ११ दृष्टान्तासिद्धेरिति। स्वप्ने हि बाह्यमेव देशकालान्तरगतमदृष्टोद्बोधितसंस्कारवशात् स्मर्यमाणं निद्रादूषितमनस्कतया भ्रान्त्या संनिहितदेशकालमिव मन्यते, स्फुटतरं चैतदनन्तरदिवसानुभूतस्य स्वप्ने वर्तमानावभासदर्शनादित्यन्यत्रापि स्वप्ने तथाङ्गीकर्तव्यम्। शिरश्छेदादयोऽप्यन्यत्रावगता एव दोषवशात्स्वसम्बन्धित्वेनावगम्यन्ते सर्वत्र संसर्गमात्रमसदेव भासते संसर्गिणस्तु सन्त एव सेयं विपरीतख्यातिरित्युच्यते मीमांसकैः। शुक्तिरजतज्ञानेऽपि विद्यमानैव रजतत्वजातिर्विद्यमानस्यैव शुक्तिशकलस्यानात्मभूतैवात्मतयाऽवगम्यते। एवं वन्ध्यासुतादिष्वपि विद्यमान एव सुतशब्दार्थो वन्ध्यान्विततया तत्पदसंनिधिदोषादवगम्यते। एवं च स्वप्नादिप्रत्यया अपि बाह्यविषया इति दृष्टान्तासिद्ध्या न स्तम्भादिप्रत्ययानामनात्मविषयकत्वमध्यसातुं शक्यमिति।

पृ० १९ पं० २२ त्रिपुटीति । ज्ञाने ज्ञाता, ज्ञानं ज्ञेयं चेति, त्रिकं प्रतिभासते । एतत्त्रयं च त्रिपुटीशब्देन व्यवह्रियते । अत एव घटादिज्ञानानन्तरं ज्ञातुर्ज्ञानस्य ज्ञेयस्य वा ज्ञातवानहं न वेत्यादिरूपा न संशया इति मीमांसकाः ।

२०-१३ व्यभिचाराच्चेति । तथा च-'सहोपलम्भनियमादभेदो नीलतद्धियोः' इति बौद्धोक्तानुमानासंभव इति भावः ।

२१-३२ सकलधूमप्रत्यक्षेति । सन्देहस्य प्रत्यक्षरूपत्वेन धर्मीन्द्रियसंनिकर्षं विना संशये धर्मिणो भानं न स्यादिति तद्भाननिर्वाहार्थं सामान्यलक्षणाङ्गीकर्तव्येति भावः । एतेन धर्मिज्ञानस्य संशयहेतुत्वे मानाभावेन असन्निकृष्टधूमादीनामज्ञानेऽपि तद्धर्मिकसंशयसम्भवात् तदनुरोधेन सामान्यलक्षणाङ्गीकारो व्यर्थ इत्यपास्तम् ।

२२-१ सुखादाविच्छेति । सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात ज्ञानेच्छयोश्च समानविषयकत्वेन कार्यकरणभावात् मम तु, सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विहाय असिद्धे इच्छा भवतीति भावः । घटस्याज्ञानादिति। अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वादिति भावः । शाब्दबोधोऽपीति । तत्र शक्तिग्रहासंभवादिति भावः ।

न च सामान्यलक्षणस्वीकारे प्रमेयत्वेन सकलपदार्थविषयकज्ञानसत्त्वात् सर्वज्ञत्वापत्तिरिति वाच्यम् विशिष्य सर्वपदार्थविषयकज्ञानाभावेन तदनापत्तेः ।

२२-७ प्रसिद्धधूम इति । प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञानं तद्धूमत्वेन वा आद्ये संशयासिद्धिः द्वितीये तु धूमत्वावच्छेदेन व्याप्तिग्रहस्य तद्विरोधितया संशये बाधकाभाव इति भावः ।

२२-१० तत्प्रकारकनिश्चयेति। समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावे समानप्रकारकत्वेन कार्यकारणभावस्य क्लृप्ततया समानविषयकत्वेनकार्यकारणभावे मानाभावाद् गौरवाच्चेति, भावः ।

इति प्रत्यक्षपरिच्छेदः ।

२३-१९ ज्ञातसम्बन्धस्येति । ज्ञातः सम्बन्धो व्याप्तिलक्षणो व्याप्यव्यापकयोर्दृष्टान्तधर्मिणि येन प्रमात्रा स ज्ञातसम्बन्धः तस्य एकदेशस्य व्याप्यस्य धूमादेर्दर्शनात् एकदेशान्तरे व्यापकवह्न्यादौ चक्षुराद्यसन्निकृष्टे या बुद्धिस्तदनुमानम् । यद्वा ज्ञातः सम्बन्धो यस्य एकदेशाभ्यां धूमवह्निरूपाभ्यां सह स ज्ञातसम्बन्धो महानसादिर्धर्मी एकदेशी तस्य यो धूमाख्य एकदेशः तस्य पर्वतादौ दर्शनात् एकदेशान्तरे वह्न्यादौ बुद्धिरनुमानम् इत्यर्थः । संदिग्धसाध्यवदधिकरणकमिति । अनेनसाध्यसंदेहरूपपक्षतासूचनम् ।

२३-१८ व्याप्यतावच्छेदकप्रकारकेति। तेन 'वह्निव्याप्यो धूमः' 'धूमवान् पर्वत' इति ज्ञानद्वयादेवानुमितिः, न तु वह्निव्याप्यधूमवान् पर्वत इति तृतीयं ज्ञानं कल्पयित्वानुमितिरिति भावः । इयमत्र प्रक्रिया महानसादौ वह्निसहचरितधूमदर्शने 'धूमो वह्निव्याप्य' इति व्याप्तिग्रहे जाते पश्चात् 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानात् 'पर्वतो वह्निमान्' इत्यनुमितिर्जायते व्याप्त्यनुभवस्य अनुमितिं प्रति करणता तु संस्कारद्वारा इति । न च संस्कारजन्यत्वेन अनुमितेः स्मृतित्वापत्तिरिति वाच्यम् , संस्कारजन्यत्वस्य संस्कारध्वंससाधारण्येन स्मृतित्वाप्रयोजकत्वात् ।

न च व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयत्वेनानुमितिकारणत्वस्वीकारे 'वह्निव्याप्यवान् पर्वत' इति ज्ञाने व्याप्यतावच्छेदकस्य धूमत्वस्याप्रकारतयास्यानुमितिजन-

कत्वं न स्यादिति वाच्यम्, इष्टापत्तेः तदुक्तं गादाधर्याम् 'मीमांसकैर्यथा वह्निव्याप्यवानयमिति व्याप्यतावच्छेदकानवगाहिपरामर्शादनुमितिरपलभ्यते धूमो वह्निव्याप्यो धूमवान् पर्वत इति समूहालम्बनाच्चानुमितिरूपेयते' इति ।

न च तथापि व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकात् 'धूमवान् पर्वत' इति ज्ञानात् 'वह्निव्याप्यो धूम' इति ज्ञानं विनाप्यनुमितिः स्यादिति वाच्यम्, गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयस्यानुमितिकारणताभ्युपगमेनादोषादिति दिक् ।

२६–२१ व्यापकवत्पक्षस्येति । पर्वतस्य प्रत्यक्षेऽपि वह्निमत्पर्वतस्य न प्रत्यक्षमिति कथं वह्निमत्पर्वतस्य स्मृतिः स्यादिति भावः ।

२३–२९ तदनुव्यवसाये—वह्निव्याप्यधूमवत्पर्वतं जानामीत्येवंरूपे, तद्विशिष्टवैशिष्ट्यप्रत्यक्षे—वह्निव्यापकधूमवत्पर्वतवान् देश इत्येवंरूपे, तत्सदृशज्ञानजन्योपमितौ—वह्निव्याप्यधूमवत्पर्वतसदृशो महानसपदवाच्य इत्येवंरूपायाम्, विशिष्टशाब्दबोधे—तदादिपदजन्ये वह्निव्याप्यधूमवत्पर्वतवान्देश इत्येवंरूपे, तत्स्मरणे—वह्निव्याप्यधूमवान् पर्वत इत्येवंरूपे इत्यर्थः । अनुव्यवसाये विषयत्वेनेति । लौकिकसन्निकर्षजन्यज्ञानीयविलक्षणविषयतासम्बन्धेन सामान्यतः प्रत्यक्षं प्रति तादात्म्येन विषयस्य कारणत्वमित्यर्थः ।

२४–१ विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनेति । नन्विदमयुक्तं तथा सति विशिष्टबुद्धेः व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावज्ज्ञानत्वेनानुमितित्वातिव्याप्तेर्दुष्परिहरत्वादिति चेन्न-विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेनैव हेतुता न तु तादृशसंशयान्यज्ञानत्वरूपनिश्चयत्वेन तथा सति इच्छादिजनकविशिष्टज्ञाननाशेऽपि रक्तत्वादिविशिष्टदण्डादिरूपविषयप्रकारेण 'रक्तदण्डमिच्छामि' रक्तदण्डं द्वेष्मि' इति इच्छाद्वेषयोः साक्षात्कारस्यानुभवसिद्धस्यापलापापत्तेः, एवं च विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनेत्यस्य विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेनेत्यर्थो बोध्य इत्यलम् ।

२४–२ सादृश्यज्ञानत्वेनेति । पदवाच्यत्वविशिष्टवह्निव्याप्यधूमवत्पर्वतसादृश्यावच्छिन्नधर्मिज्ञानत्वेनेत्यर्थः । अतिदेशवाक्यार्थज्ञाने व्याप्यवत्त्वस्य धर्मितावच्छेदककोटिनिविष्टतया भानाद्धर्मितावच्छेदकघटकांशे च संशयस्यानभ्युपगमात् उपमितिजनकतायां निश्चयत्वनिवेशनमफलमिति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताशालिनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावज्ज्ञानत्वरूपस्यानुमितिलक्षणस्य नातिव्याप्तिरिति भावः

२४–२ अवान्तरवाक्यार्थज्ञानत्वेनेति । तथा च शाब्दकारणतायां निश्चयत्वस्याप्रवेशान्नातिव्याप्तिरिति भावः । परोक्षसंशयानभ्युपगमेन संशयान्यत्वस्य निवेशनीयत्वेऽपि पदजन्यबुद्धावव्यावर्तकतया ज्ञानत्वस्य न निवेश इति तत्त्वम् ।

२४–३ अनुभवत्वेनेति । यदि तु संस्कारस्य स्वजन्यस्मृतिनाश्यतया प्रथमस्मरणेनैव पूर्वानुभवजन्यसंस्कारनाशे स्मरणोत्तरस्मरणाभावापत्त्या अनुभवत्वेन स्मृतिकारणताभ्युपगन्तुमशक्येत्युच्यते तदा ऽनुमितिलक्षणे ज्ञानपदमनुभवपरं द्रष्टव्यम्, तथा च व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वे सति अनुभवत्वमनुमितित्वमिति सिद्धम् ।

२४–६ न चेति । अन्वयव्याप्तिः साध्यवदन्यावृत्तित्वरूपा, व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा यथा वह्न्यभावव्यापकीभूतोऽभावो धूमाभावः

तत्प्रतियोगित्वं धूमे इति। अनुमितिलक्षणे अन्वयव्याप्तेरुपादाने वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान्पर्वत इति निश्चयजन्यानुमित्यसंग्रहः व्यतिरेकव्याप्तेश्चोपादाने वह्निमदन्यावृत्तिधूमवान्पर्वत इति निश्चयजन्यानुमित्यसंग्रह इति भावः। व्यभिचारज्ञानं साध्याभाववद्वृत्तित्वज्ञानं तद्विरोधि अन्वयव्याप्तिज्ञानं मणिमन्त्रादिन्यायेन व्यतिरेकव्याप्तिज्ञानं चेत्यर्थः।

२४-८ व्यभिचारधीविरोधीति। साध्याभाववद्वृत्तिधूम' इति धीविरोधिनी धीः 'साध्यभाववद्वृत्तिर्धूमः' इति 'वन्ह्यभावव्यापकीभूताभावप्रतियोगी धूमः' इति च तद्विषयतावच्छेदकं धूमत्वं तत्प्रकारकपक्षधर्मताज्ञानं 'धूमवान् पर्वत' इत्याकारकं तज्जन्यं ज्ञानं पर्वतो वह्निमानित्याकारकं तदेवानुमितिरिति समन्वयः।

१४ भूतभाविलिङ्गेनेति। इयं शाला अतीतवह्निमती अतीत धूमात्, इयं शाला भाविवह्निमती भाविधूमात् इत्यादिनेत्यर्थः। नन्वेवं धूमादेरनुमित्यहेतुत्वे धूमादिति हेतुपञ्चम्यनुपपत्तिरितिचेत् सत्यम् धूमादित्यत्र धूमपदस्य धूमज्ञाने पञ्चम्याश्च ज्ञाप्यत्वे लक्षणेत्यदोष इति।

२४-१६ साध्यवदिति। साध्यवत्पदं लक्षणया साध्यवत्प्रतियोगिकपरं तस्य चाभेदसम्बन्धेन अन्यपदार्थैकदेशे भेदेऽन्वयः न तु साध्यवत्पदार्थस्य प्रतियोगितासम्बन्धेन भेदेऽन्वयः, नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् भेदवतश्च निरूपितत्वसम्बन्धेन वृत्तित्वे तस्य च प्रतियोगितासम्बन्धेनाभावे। एवञ्च साध्यवत्प्रतियोगिकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरिति तदर्थः।

२४-१९ अत्रेति। अयम्भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः एवं च समवायेन वह्निमान् न इति प्रतीतिसाक्षिकभेदीयप्रतियोगितावच्छेदकता वह्निनिष्ठा सा च न साध्यतावच्छेदकसम्बन्धावच्छिन्ना या च साध्यतावच्छेदकसम्बन्धावच्छिन्ना संयोगेन वह्निमान्नेति भेदीया प्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदश्च न पर्वते इति नाव्याप्तिरिति।

२४-२१ साध्यवत्त्वावच्छिन्नेति। अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकावच्छिन्ना च या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः। अयं भावः पर्वतः संयोगेन महानसीयवह्निमान्नेति भेदीयप्रतियोगितावच्छेदकता न साध्यतावच्छेदकमात्रावच्छिन्ना इति तादृशो भेदो धर्तुं न शक्यते यश्च तादृशः संयोगेन वह्निमान्नेति प्रतीतिसाक्षिकः स च न पर्वते इति नाव्याप्तिः। इदमुपलक्षणम्-येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यनिरूपितवृत्तित्वं बोध्यम् तथा च—साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकावच्छिन्ना च या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपिता या हेतुतावच्छेदसम्बन्धावच्छिन्ना वृत्तिता तदभावो व्याप्तिरित्यर्थः एवं च संयोगेन वह्निमान्नेति प्रतीतिसाक्षिकभेदवद्धूमावयवनिरूपिता समवायसम्बन्धावच्छिन्ना वृत्तिता यद्यपि धूमे वर्तते तथापि साध्यवद्भिन्ननिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तिताया अभावो वर्तत एवेति नाव्याप्तिः।

तर्कपादः

२४-२२ वृत्तितात्वावच्छिन्न प्रतियोगितेति । अयं भावः साध्यतावच्छेदकसम्बन्धा वच्छिन्ना साध्यतावच्छेदकावच्छिन्ना च या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेदतावती या प्रतियोगिता तन्निरूपको योभेदस्तद्वन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावो व्याप्तिः एवं च धूमवान् वह्नेरित्यत्र धूमवदन्यजलनिरूपितवृत्तित्वं वह्नौ नास्तीति प्रतीतिसाक्षिकाभावीया प्रतियोगिता वृत्तितात्वावच्छिन्ना यथा वर्तते तथा निरूपितत्वसम्बन्धेन जलावच्छिन्नापि वर्तते इति इति तादृशाभावो धर्तुं न शक्यते किन्तु धूमवदन्यनिरूपितवृत्तित्वं नास्तीति एवंस्वरूपः स च न वह्नौ इति नातिव्याप्तिः । वृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकेत्यस्य वृत्तितात्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपिका सती वृत्तितात्वनिष्ठावच्छेदकता निरूपिका या प्रतियोगिता तन्निरूपिकेत्यर्थः इति भावः ।

२४-२७ हेतुसमानाधिकरणेति । पर्वतो वह्निमान्धूमादित्यत्र हेतुर्धूमस्तदधिकरणं पर्वतस्तन्निष्ठोत्यन्ताभावः घटो नास्तीतिप्रतीतिसाक्षिकस्तत्प्रतियोगिता घटे तदवच्छेदकं घटत्वमनवच्छेदकं साध्यतावच्छेदकं वह्नित्वं तदवच्छिन्नसामानाधिकरण्यं धूमे इति लक्षणसमन्वयः ।

२४-३० अत एवेति । प्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकमिति निवेशादेवेत्यर्थः । अन्यथा वह्निमान्धूमादित्यत्र हेतुर्धूमस्तदधिकरणं पर्वतस्तन्निष्ठोऽत्यन्ताभावो महानसीयवह्निर्नास्तीति प्रतीतिसाक्षिक इति चालनीन्यायेन प्रतियोगी महानसीयवह्न्यादिरप्रतियोगी न कोऽपि वह्निरित्यव्याप्तिः स्यात् मम तु प्रतियोगितावच्छेदकं महानसीवह्नित्वमनवच्छेदकं वह्नित्वं तदवच्छिन्नसामानाधिकरण्यं धूम इति लक्षणसमन्वयः ।

दण्डिमानिति । मठो दण्डिमान् दण्डसंयोगादित्यत्र दण्डसंयोगाधिकरणमनुयोगितासम्बन्धेन मठः तन्निष्ठोऽभावः तद्दण्डी नास्तीति तदभावीया प्रतियोगिता तत्तद्दण्डिनिष्ठा प्रतियोगितावच्छेदको दण्डः स एव साध्यतावच्छेदक इत्यव्याप्तिः स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन दण्डत्वस्य साध्यावच्छेदकत्वाङ्गीकारे तु दण्डसंयोगाधिकरणे स्वाश्रयाश्रयत्वसम्बन्धेन दण्डत्ववान्नास्तीति वक्तुं न शक्यते अपि तु घटत्ववान्नास्तीत्येवमादिरिति नाव्याप्तिः ॥

रूपत्वव्याप्यजातिमत्वान् पृथ्वीत्वादित्यत्र पृथिवीत्वाधिकरणे पीतघटे नीलो नास्ति, रक्तघटे पीतो नास्तीत्येवं चालनीन्यायेन सर्वेषामपि रूपाणामभावसत्त्वात्सर्वा अपि रूपत्वव्याप्या नीलत्वादिजातयः प्रतियोगितावच्छेदिकाः संपन्नास्ता एव च साध्यतावच्छेदिका इति हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितानवच्छेदिका न संपन्ना इत्यव्याप्तिः ॥

स्वाश्रयसंयुक्तत्वादीति । आदिपदेन स्वाश्रयसमवायसम्बन्धस्य परिग्रहः । स्वं रूपत्वव्याप्यजातित्वं तदाश्रयः रूपत्वव्याप्या नीलत्वादिजातिः तत्समवायो रूपे । एवञ्च पृथिवीत्वाधिकरणे स्वाश्रयसमवायसम्बन्धेन रूपत्वव्याप्यजातिमत्वान्नास्तीत्यभावो धर्तुं न शक्यते पृथिवीत्वाधिकरणे स्वाश्रयसमवायसम्बन्धेन रूपत्वव्याप्यजातित्वतो नीलरूपादेः प्रतियोगिनः सत्त्वादिति प्रतियोगितावच्छेदकं पूर्वोक्तरीत्या नीलत्वादिकमनवच्छेदकं रूपत्वव्याप्यजातित्वं तदेव साध्यतावच्छेदकमित्यदोषः ॥

२५-३ नन्वेवमपि वह्निमान् धूमादित्यत्र समवायेन धूमाधिकरणं धूमावयवस्तन्निष्ठोऽभावः वह्निर्नास्तीति प्रतीतिसाक्षिकः तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यमित्यं व्याप्तिरत आह-हेतुतावच्छेदकसम्बन्धेनेति ।

ननु द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टं शुद्धान्नातिरिच्यते इति न्यायाच्छुद्धसत्ताधिकरणं गुणस्तन्निष्ठोऽत्यन्ताभावः द्रव्यत्वं नास्तीति प्रतीतिसाक्षिकस्तदीयप्रतियोगितावच्छेदकं द्रव्यत्वत्वं तदेव साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं न जातमित्यव्याप्तिरत आह—हेतुतावच्छेदकविशिष्टेति ।

न च हेतुतावच्छेदविशिष्टसत्तात्वविशिष्टसत्त्वस्य गुणे सत्त्वादेवं विवक्षायामप्यव्याप्तेरप्रतीकार इति वाच्यम्—हेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वविशिष्टस्य हेत्वधिकरणपदेन विवक्षणात् । एवञ्च-विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वं द्रव्ये एव न गुणे द्रव्यं विशिष्टसत्तावदिति प्रतीतेरित्यदोष इति भावः ।

तथाच हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वविशिष्टाभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणस्वरूपं निष्पन्नम् ।

२९-८ ननु कपिसंयोगि एतद्वृक्षत्वादित्यत्र एतद्वृक्षत्वाधिकरणमेतद्वृक्षः तन्निष्ठोऽभावः मूलावच्छेदेन कपिसंयोगो नास्तीति प्रतीतिसाक्षिकः तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वमित्यव्याप्तिरतआह—अभावश्चेति। तथा च एतद्वृक्षे—शाखावच्छेदेन कपिसंयोगस्य सत्त्वात् प्रतियोगिसमानाधिकरण एव कपिसंयोगाभावो न प्रतियोगिव्यधिकरणः किन्तु घटाभावादिरेव तथा तत्प्रतियोगितावच्छेदकं घटत्वमनवच्छेदकं कपिसंयोगत्वं तदवच्छिन्नसामानाधिकरण्यमेतद्वृक्षत्वे इत्यदोषः ।

ननु प्रतियोगिव्यधिकरण इत्यस्य प्रतियोग्यनधिकरणवृत्तीत्यर्थाङ्गीकारे कपिसंयोगी एतद्वृक्षत्वादित्यत्र प्रतियोगिनः कपिसंयोगस्य अनधिकरणं गुणादिकं तन्निष्ठोऽभावः कपिसंयोगाभावः प्रतियोगिव्यधिकरणः स एव वृक्षे अधिकरणभेदेनाभावभेदानभ्युपगमादिति तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वमित्यव्याप्तिः । न च प्रतियोगिव्यधिकरणेत्यस्य प्रतियोग्यधिकरणावृत्तीत्यर्थः तथा च वृक्षवृत्तिकपिसंयोगाभावस्य प्रतियोग्यधिकरणवृत्तितया प्रतियोग्यधिकरणवृत्तिभिन्नत्वाभावान्नाव्याप्तिरिति वाच्यम् । एवमपि संयोगी सत्त्वादित्यत्र सत्त्वाधिकरणे गुणादौ वर्तमानो यः संयोगाभावः तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वात्प्रतियोग्यधिकरणावृतित्वं नास्ति किन्तूदासीनस्यैव घटाभावादेः तत्प्रतियोगितावच्छेदकं घटत्वादिकमनवच्छेदकं संयोगत्वमित्यतिव्याप्तेर्दुर्वारत्वादित्यत आह—हेत्वधिकरणावच्छेदेनेति—हेत्वधिकरणावच्छेदेन प्रतियोग्यनधिकरणावृत्तीत्यर्थः । तथा च कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभावो न हेत्वधिकरणावच्छेदेन प्रतियोग्यनधिकरणवृतिः गुणस्य हेत्वधिकरणत्वाभावात् संयोगी सत्त्वादित्यत्र च संयोगाभावस्तथा गुणस्य हेत्वधिकरणत्वादिति नाव्याप्त्यतिव्याप्ती इति भावः ।

ननु विशिष्टसत्तावान् जातेरित्यत्र जात्यधिकरणं गुणस्तन्निष्ठोऽभावः विशिष्टसत्ताभावः स च सत्तारूपप्रतियोगिसमानाधिकरण एव इत्युदासीन एवाभावो लक्षणघटको वाच्य इत्यतिव्याप्तिरतः प्रतियोगिव्याधिकरणेत्यस्यार्थमाह—प्रतियोगितावच्छेदकेति । प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताशून्यत्वं तदर्थः । तथा च विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वं न गुणे इति तन्निष्ठोऽभावः विशिष्टसत्ताभावः प्रतियोगिव्यधिकरणः संजात इति नातिव्याप्तिरिति भावः ॥

एवञ्च स्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताशून्यो हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणतावान् यः

तन्निष्ठाभावप्रतियोगितानवच्छेदकं साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणं निष्पन्नम् ।

२९-१२ नन्वेवमपि ज्ञानवान् सत्त्वादित्यत्र सत्ताधिकरणं घटादिकं तन्निष्ठोऽभावः समवायेन ज्ञानं नास्तीतिप्रतीतिसाक्षिकः स च विषयतासम्बन्धेन ज्ञानरूपप्रतियोगिसमानाधिकरण इति प्रतियोगिव्यधिकरणो न जातः किन्तु उदासीन एव तथेत्यतिव्याप्तिरत आह-साध्यतावच्छेदकसम्बन्धेनेति । साध्यतावच्छेदकसम्बन्धश्च प्रकृते न विषयता किन्तु समवाय एव तेन च सम्बन्धेन घटे ज्ञानं न वर्तत इति प्रतियोगिव्यधिकरणो ज्ञानाभावः तत्प्रतियोगितावच्छेदकं ज्ञानत्वमिति नातिव्याप्तिः ॥

एतेन वह्निमान् धूमादित्यत्र हेत्वधिकरणे समवायेन वह्निर्नास्तीतिप्रतीतिसाक्षिकाभावमादायाव्याप्तिमाशङ्क्य हेत्वधिकरणवृत्तिरभावः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्य इतिकस्यचिदुक्तिः परास्ता पर्वतनिष्ठस्य समवायेन वह्न्यभावस्य प्रतियोगिनो वह्नेः संयोगेन पर्वतवृत्तितया प्रतियोगिवैयधिकरण्याभावेन लक्षणाघटकत्वात् ।

२९-१९ ननु प्रतियोगितावच्छेदकावच्छिन्नस्येति-विशिष्टसत्तावान् जातेरित्यत्राव्याप्तिवाणाय प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वरूपं विवक्षितं तत्र प्रतियोगितावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिनोऽनधिकरणं विवक्षितं किम्वा प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणं विवक्षितम् आहोस्वित् यत्किञ्चित्प्रतियोग्यतावच्छेदको यो धर्मस्तदवच्छिन्नानधिकरणत्वं विवक्षितम् ।

आद्ये वृक्षः कपिसंयोगीएतद्वृक्षत्वादित्यत्राव्याप्तिः। एतद्वृक्षत्वाधिकरणनिष्ठो यो मूलावच्छेदेन कपिसंयोगो नास्तीत्यभावः तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वं तदवच्छिन्नो वृक्षावृत्तिकपिसंयोगोऽपि तदनधिकरणं हेत्वधिकरणमेतद्वृक्षस्तन्निष्ठाभावीयप्रतियोगितावच्छेदकत्वमेव कपिसंयोगत्वे इति अव्याप्तिः तद्वारणार्थं यदि प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणं विवक्ष्यते तदा वृक्षः कपिसंयोगी एतद्वृक्षत्वात् इत्यत्र न दोषः । तथा हि प्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नसामान्यस्यानधिकरणीभूतं हेत्वधिकरणमेतत्वृक्षो नास्ति किन्तु प्रतियोगितावच्छेदकघटत्वावच्छिन्नस्यानधिकरणं हेत्वधिकरणमेतद्वृक्षः तद्वृत्यभावीयप्रतियोगितावच्छेदकं घटत्वमनवच्छेदकं कपिसंयोगत्वं तदेव साध्यतावच्छेदकमित्यव्याप्त्यभावः ।

द्वितीये प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति । प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणमिति विवक्षिणे वह्निमान् धूमात् इत्यत्र सद्धेतुमात्रे लक्षणस्यासम्भवः। तथा हि धूमाधिकरणे पर्वते वर्तमानो यः घटाभावः पूर्वक्षणवृत्तित्वविशिष्टः तस्यैव तत्क्षणावच्छेदेनाभावोऽपि वर्तते इति पूर्वक्षणवृतित्वविशिष्टघटाभावाभावः पर्वते इति विशिष्टं शुद्धान्नातिरिच्यते इतिन्यायेन विशिष्टाभावः शुद्धघटाभावस्वरूपोऽस्ति इति घटाभावस्य प्रतियोगी घटः घटाभावाभावश्च-घटाभावस्य तृतीयाभावरूपत्वात् इति घटरूपप्रतियोगिनः पर्वते ऽसत्वेपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिनः सत्वेन नायं प्रतियोगिव्यधिकरणोऽभावः, एवं पटाभावादिरपीति प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः ।

न च ज्ञानवान् द्रव्यत्वादित्यत्राव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं विवक्षितम् इति पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपघटाभावप्रतियोगिनः स्वरूपेण पर्वते सत्वेपि साध्यतावच्छेदकसंयोगसम्बन्धेनाऽसत्त्वात् प्रतियोगिवैयधिकरण्य-

मक्षतम् इति न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् । एवमपि घटाभावे-यो वह्न्यभावः स घटाभावस्वरूपः अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात् इति घटाभावस्य प्रतियोगी वह्निरपि स च साध्यतावच्छेदकसंयोगसम्बन्धेन पर्वते वर्तते इति प्रतियोगिव्यधिकरणाभावाप्रसिद्धितादवस्थ्यात्। यदि च घटाभावे वह्न्यभावो भिन्न एव न घटाभावस्वरूप इत्युच्यते तदा वह्निमान् धूमादित्यत्र लक्षसमन्वयसंभवेऽपि यत्र स्वरूपेण साध्यता ह्रदो धूमाभाववान् वह्न्यभावादिति तत्राऽव्याप्तिः ।

२६-१ तृतीये त्विति । तथा च घटाभावीययत्किञ्चित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे सत्वेन न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति न वह्निमान् धूमादित्यादावव्याप्तिसम्भव इति भावः ।

कपिसंयोगिभाववानिति। अयं भावः-कपिसयोगाभावाभावः कपिसंयोगः तत्र च गुणत्वं कपिसंयोगत्वं चेति धर्मद्वयं वर्तते इति कपिसंयोगाभावाभावप्रतियोगितावच्छेदकं गुणसामान्याभावत्वं कपिसंयोगाभाववत्वं च भवितुमर्हति,ततश्च यत्किञ्चित्प्रतियोगितावच्छेदकपदेन गुणसामान्याभावत्वं धृतं तदवच्छिन्नानधिकरणत्वमात्मान इति तन्निष्ठोऽभावः कपिसंयोगाभावाभावः तत्प्रतियोगितावच्छेदकं कपिसंयोगाभावत्वं तदेव साध्यतावच्छेदकमित्यव्याप्तिरिति ।

२६-९ यादृशेति । तथा च प्रकृते हेत्वधिकरणस्यात्मनो यादृशप्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वं कपिसंयोगाभावत्वस्य वर्तते एवेति नाव्याप्तिरिति ।

कालो घटवानिति । अयं भावः कालपरिमाणाधिकरणे महाकाले समवायसम्बन्धेन घटो नास्तीत्यभावो यद्यपि धर्त्तुं शक्यते तथापि सोऽभावः साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोगिसमानाधिकरण एव जातः इति कालिकसम्बन्धेन काले वस्तुमात्रस्य सत्त्वेन अभावान्तरमपि प्रतियोगिसमानाधिकरणमिति प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति ।

२६-११ अत्र केचिदिति । स्वरूपसम्बन्धेन महाकालभेदः भूतले वर्तते तत्रैव घटोऽपि वर्तत इति महाकालभेदविशिष्टो घटो जातः वैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेन इतिमहाकालभेदविशिष्टो घटो महाकाले न वर्तते तत्र स्वरूपसम्बन्धेन महाकालभेदाभावेन महाकालभेदविशिष्टघटस्याभावादिति महाकालभेदविशिष्टघटभावः प्रतियोगिव्याधिकरणः तत्प्रतियोगितावच्छेदकं महाकालभेदविशिष्टघटत्वमनवच्छेदकं घटत्वं तदवच्छिन्नसामानाधिकरण्यं कालपरिमाणे इति समन्वयः ।

२६-१४ यद्वेति । पर्वतो वह्निमान् धूमादित्यादौ प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तिरभावः संयोगेन घटो नास्तीतिप्रतीतिसाक्षिकः तदीयप्रतियोगितासामान्ये संयोगसम्बन्धावच्छिन्नत्व वह्नित्वावच्छिन्नत्वोभयाभावो वर्तते एकसत्त्वे द्वयं नास्तीति प्रतीतेः इति संयोगसम्बन्धेन वह्नित्वावच्छिन्नो धूमहेतोर्व्यापकः तत्सामानाधिकरण्यञ्च धूमे इति व्याप्तिलक्षणसमन्वयः । एवं कालो घटवान् कालपरिमाणदित्यत्र प्रतियोगितावच्छेदकसमवायसम्बन्धेन घटरूपप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिरभावः समवायेन घटो नास्तीति प्रतीतिसाक्षिकः तदीयप्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्व घटत्वावच्छिन्नत्वोभयाभावसत्त्वात कालिकसम्बन्धेन घटत्वावच्छिन्नकालपरिमाणरूपहेतोर्व्यापक इति तत्सामानाधिकरण्यं कालपरिमाणे इति व्याप्तिलक्षणसमन्वयः ।

२६-१९ यद्वेति । पर्वतो वह्निमान् धूमादित्यत्र हेतुर्धूमः तत्समानाधिकरणोऽन्योन्याभावः पर्वतो घटवान्नेत्याकारकः तत्प्रतियोगिवच्छेदको घटस्तद्भिन्नः साध्यो वह्निस्तद्वत्त्वावच्छिन्नः पर्वतस्तन्निरूपितवृत्तित्वं धूम इति लक्षणसमन्वयः ।

२६-२० व्याप्यवृत्तित्वादिति । तथा च कपिसंयोगी एतद्वृक्षत्वादित्यत्र एतद्वृक्षत्वाधिकरणे वृक्षे कपिसंयोगरूपप्रतियोगितावच्छेदकस्य सत्त्वेन भेदस्य च प्रतियोगितावच्छेदकेन सह विरोधात् कपिसंयोगवान्नेति भेदस्य वक्तुमशक्यतया घटवान्नेत्यादिभेमादाय लक्षणसमन्वयात् प्रतियोगिव्यधिकरणत्वनिवेशो न कर्तव्य इति भावः ।

नन्वेवंव्याप्तिलक्षणस्वीकारे धूमाधिकरणे पर्वते तद्वह्निमान्नेतिभेदस्य वक्तुं शक्यतया चालनीन्यायेन सर्व एव वह्निः प्रतियोगितावच्छेदक इत्यव्याप्तितादवस्थ्यमिति चेन्न यद्रूपविशिष्टसाध्यतावच्छेदकविशिष्टं साध्यं हेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपविशिष्टसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति विवक्षणेन वह्नित्वविशिष्टवह्न्यवच्छिन्नान्योन्याभावस्य धूमवत्यसत्त्वेन दोषाभावात् ।

२६-२२ तस्याप्यव्याप्यवृत्तित्वादिति । तदा च प्रतियोगिनस्तादात्म्येन यःसम्बन्धो तद्भिन्नत्वरूपप्रतियोग्यसामानाधिकरण्यं विवक्षणीयम् । प्रतियोग्यवृत्तिर्हेतुसमानाधिकरणोऽन्योन्याभावो ग्राह्य इति यावत् । तावतापि अत्यन्ताभावघटितव्याप्तौ प्रतियोग्यसामानाधिकरण्यस्य निवेशेन तदपेक्षया अन्योन्याभावघटितव्याप्तौ प्रतियोग्यवृत्तित्वनिवेशेऽपि लाघवमिति भावः ।

२६-२३ किन्तु व्यापकसम्बन्धेति । तथा च शिरोमणिः 'एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयं न त्वधिकरणत्वं तथा च धर्मिणोपि व्याप्यत्वं व्यापकत्वं च निर्वहति' इति तथा च येन सम्बन्धेन हेतुसाध्ययोः सहचारग्रहः तेन सम्बन्धेन व्याप्यव्यापकभावः तस्य सम्बन्धस्य वृत्तितानियामकत्वं नापेक्ष्यते अत एव अयं वृक्षः शिंशपाया इत्यादौ तादात्म्येन व्याप्यव्यापकग्रहः अन्यथा तादात्म्यस्य वृत्त्यनियामकतया स न स्यादिति ध्येयम् ।

२६-२६ न चैवमिति। एवं-अबाधितत्वासत्प्रतिपक्षितत्वपक्षसत्त्वसपक्षसत्त्वविपक्षावृत्तित्वरूपपञ्चरूपोपपन्नस्यैव हेतोरनुमापकत्वाङ्गीकारेण केवलान्वयिहेतोः विपक्षस्यैवाभावेन विपक्षावृत्तित्वरूपेण व्यतिरेकिणः पृथिवी इतरभिन्ना गन्धवत्त्वादित्यादेः पृथिवीमात्रस्यैव पक्षतया सपक्षाभावेन सपक्षसत्त्वरूपेण उपपन्नत्वाभावेन तयोरनुमापकत्वासम्भवेन अन्वय्यनुमानस्यैव स्वीकारे इत्यर्थः । इदं च साध्यवदन्यावृत्तित्वरूपव्याप्तिनिरूपणप्रस्तावे 'एवं च केवलान्वयिव्यतिरेक्यनुमानमेव नेति ग्रन्थेन २४ पृष्ठे भाष्यचिन्तामणावुक्तम् तदेव एवंपदेनात्र परामृष्टम् ।

व्यतिरेकव्याप्ताविति-साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तिः अनुमानत्रैविध्यम्-केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदादितिशेषः ।

२२-२९ व्यभिचारधीति । व्यभिचारधीविरोधित्वं साध्यवदन्यावृत्तित्वरूपहेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिज्ञानयोरिव साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्याप्तिज्ञानस्यापि इति तद्विषयो धर्मः व्याप्तिः तद्विशिष्टो हेतुतावच्छेदको धर्मो धूमत्वादिस्तत्प्रकारकं पक्षधर्मताज्ञानं धूमवान् पर्वत इत्याकारकं तदनुमितिहेतुरित्यर्थः । वैशिष्ट्यं च सामानाधिकरण्यसम्बन्धेन ।

२६-३१ अविवक्षित इति । पञ्चरूपेषु यावन्ति रूपाणि सम्भवन्ति तदुपपन्नत्वमात्रे

तु विवक्षितम्। तेन केवलान्वयिव्यतिरेकिणोः पञ्चरूपोपन्नत्वाभावेऽपि न क्षतिरिति भावः। तदुक्तं मथुरानाथतर्कवागीशेन 'यत्र यावतां रूपाणां प्रसिद्धिसम्भवस्तावतामेवा· वश्यकत्वं यत्र विपक्षः सपक्षो वा न प्रसिध्यति तत्र विपक्षावृत्तित्वसपक्षवृत्तित्वज्ञानयो- रनुपयुक्तत्वमेव' इत्यर्थकेन ग्रन्थेन।

२६-३२ व्यभिचाराग्रह इति। व्यभिचारग्रहस्य व्याप्तिग्रहप्रतिबन्धकतया तदभावः व्याप्तिग्रहे कारणम्। कारणीभूताभावप्रतियोगिन एव प्रतिबन्धकपदार्थत्वात्। एवम- न्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुत्वमिति भावः।

२७-२तर्क इति। तर्कयामि इत्यनुभवसिद्धो मानसत्वव्याप्यो जातिविशेषस्तर्कत्वम्। निवर्तते इति। यदि धूमो वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात् इति ज्ञानेन व्यभि· चारशङ्का निवर्तते। ननु धूमो न वह्निजन्यः किन्त्वहेतुक एवेति यदि शङ्का भवेत् तदा कार्यकारणभावप्रतिसंधानाभावात् कथं व्यभिचारशङ्कानिवृत्तिरित्याह–तत्रापीति। परिहरति धूमार्थमिति।

ननु तर्कं प्रति आपाद्यव्याप्यापादकवत्ताज्ञानं कारणं तत्र व्याप्तिग्रहप्रतिबन्धकव्यभि- चारग्रहशङ्कानिवर्तकस्तर्कोऽपेक्षित एवमग्रेऽपीत्यनवस्था स्यादत आह–यत्रेति। स्वत एव- शङ्कासामग्रीविरहादेव। न तर्कापक्षेत्यनन्तरमतो नानवस्थेति शेषः।

ननु तर्कस्य न व्यभिचारशङ्कानिवर्तकत्वं तर्ककारणीभूतव्याप्तिज्ञानेनैव तन्निरासा- दिति चेदत्र केचित्–अनाहार्यशङ्कानिवर्तकत्वस्य तर्ककारणीभूतव्याप्तिज्ञानसाध्यत्वेऽपि आहार्यशङ्कानिवर्तनाय तर्कस्यापेक्षणात् आहार्यज्ञानस्य व्याप्तिज्ञानाप्रतिबध्यत्वात् अनिष्टप्रसञ्जनात्मकतर्केण तु आपादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषो जन्यते तेन च आपाद्यज्ञाने इच्छाप्रतिबन्धः क्रियते। एवं च इच्छारूप· कारणाभावादेव नाहार्यशङ्कोत्पत्तिरिति अर्थसिद्धं तर्कस्य निवर्तकत्वम्।

२७-८ तदनङ्गीकारेत्विति। साध्यतावच्छेदकरूपेणैकव्यक्तिज्ञानादेव पक्षधर्मतावला· त्सादृश्येण साध्यान्तरानुमितिसंभवेन सामान्यलक्षणानङ्गीकार इत्यर्थः।

२७-१० व्याप्तिग्रहप्रतिबन्ध इति। उपाधिव्यभिचारेण साधने साध्यव्यभिचारा नुमानाद्व्याप्तिग्रहप्रतिबन्ध इत्यर्थः। अनुमानं च वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धन· संयोगव्यभिचारित्वादिति। व्यापकव्यभिचारिणो व्याप्यव्यभिचारस्यावश्यकत्वात्।

साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः, धूमवान् वह्नेरित्यत्र साध्यस्य धूमस्य व्यापकः साधनस्य वह्नेरव्यापकश्च आर्द्रेन्धनसंयोग इति सोपाधिकत्वाद्वह्निरूपो हेतुर्व्याप्यत्वासिद्धः। नन्वेवमुपाधिलक्षणस्वीकारे स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिर्न स्यात श्यामत्वस्य घटादावपि सत्त्वेन शाकपाकजत्वस्य तत्रा- भावेन साध्यव्यापकत्वाभावादत आह–यद्धर्मावच्छिन्नेति। तथा च मित्रातनयत्वाव· च्छिन्नश्यामत्वव्यापकत्वस्य मित्रातनयत्वाव्यापकत्वस्य च शाकपाकजत्व सत्त्वा· दुपाधित्वमिमि।

२७-१७ एवं यत्र तादृश इति। वायुः प्रत्यक्षो द्रव्यत्वादित्यत्र प्रत्यक्षत्वरूपसा- ध्याधिकरणं घटः प्रत्यक्षत्वरूपसाध्यानाधिकरणं परमाणुः एतदन्यतरत्वरूपावच्छिन्नप्रत्य- क्षत्वव्यापकत्वस्य उद्भूतरूपे सत्त्वात् उद्भूतरूपमुपाधिः।

वस्तुतस्तु उपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधिशून्य साध्यव्यभिचाराधि· करणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वमुपाधे. सम्भवतीतिबोध्यम्। धूम·

वान्वह्नेरित्यत्रार्द्रेन्धनसंयोग उपाधिः उपाधेरार्द्रेन्धनसंयोगस्य साध्यस्य धूमस्य चाधिकरणं महानसादिकमुपाधिनार्द्रेन्धनसंयोगेन शून्यं व्यभिचारनिरूपकाधिकरणं चायोगोलकं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं वह्निरूपसाधनाव्यापकत्वं चार्द्रेन्धनसंयोगस्येति समन्वयः। यथाश्रुतं तु न युक्तम् प्रत्यक्षत्वाधिकरणमात्मा प्रत्यक्षत्वानधिकरणं गगनं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्य उद्भूतरूपेऽसत्वादुद्भूतरूपस्य वायुः प्रत्यक्षो द्रव्यत्वादित्यत्रोपाधित्वानापत्तेः मम तु उपाधेरुद्भूतरूपस्य साध्यस्य प्रत्यक्षत्वस्य चाधिकरणं घटः उद्भूतरूपशून्यम् प्रत्यक्षत्वव्यभिचाराधिकरणं च गगनादिकं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वमुद्भूतरूपे आत्मा तु यद्यपि साध्याधिकरणं परन्तु नोपाध्यधिकरणमिति तन्नान्यतरत्वेन गृह्यते इति न दोषः।

२७–२० वह्नीतरत्वमुपाधिरिति। अनुष्णत्वरूपसाध्यस्य व्यापकं वह्नावपि कृतकत्वस्य सत्त्वेन तदव्यापकं च वह्नीतरत्वमिति भवति तस्योपाधित्वम्। पर्वतेतरत्वं तु नोपाधिः तत्र वह्निव्यापकत्वग्राहकमानस्याभावादिति ध्येयम्।

बाधोन्नीतः बाधेन पक्षे साध्याभाववत्तया उन्नीतः निश्चित इत्यर्थः।

२७–२४ अन्ये त्विति। अयोगोलकं धूमवत् वह्नेरित्यस्य अयोगोलकं धूमाभाववदार्द्रेन्धनसंयोगाभावादित्यनेन सत्प्रतिपक्षितत्वमिति भावः। तदुक्तं तत्त्वचिन्तामणौ— 'केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद्यत्र पक्षावृत्तिर्हेतुः, यथा करका पृथिवी कठिनसंयोगादित्यत्रानुष्णाशीतस्पर्शवत्त्वम्, न च तत्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसंकरादित्याहुः' इति।

२७–२८ पक्षत्वं चेति। अनुमित्साविरहविशिष्टसिद्ध्यभावः पक्षता। तत्र विशिष्टाभावस्त्रिधा विशेषणाभावप्रयोज्यः विशेष्याभावप्रयोज्यः उभयाभावप्रयोज्यश्चेति—तद्यथा— अयोध्यास्थे ब्राह्मणे काशीस्थत्वरूपविशेषणाभावप्रयोज्यः काशीस्थत्वविशिष्टब्राह्मणत्वाभावः, काशीस्थे शूद्रे काशीस्थत्वरूपविशेषणसत्त्वेऽपि ब्राह्मणत्वरूपविशेष्याभावप्रयुक्तो विशिष्टाभावः अयोध्यास्थे शूद्रे काशीस्थत्वरूपविशेषणस्य ब्राह्मणत्वरूपविशेष्यस्य चाभावादुभयाभावप्रयुक्तो विशिष्टाभावः, एवं प्रकृते यत्र अनुमित्सासिद्धी तत्र सिद्धिरूपविशेष्यस्य सत्त्वेऽपि अनुमित्साविरहरूपविशेषणस्याभावाद्विशेषणाभावप्रयुक्तो विशिष्टाभावः, यत्र अनुमित्सा नास्ति सिद्धिश्च नास्ति तत्र अनुमित्साविरहरूपविशेषणस्य सत्त्वेऽपि सिद्धिरूपविशेष्यस्याभावात् विशेष्याभावप्रयुक्तो विशिष्टाभावः, यत्र अनुमित्साऽस्ति सिद्धिश्च नास्ति तत्र सिद्धिरूपविशेष्यस्य अनुमित्साविरहरूपविशेषणस्य चाभावादुभयाभावप्रयुक्तो विशिष्टाभावः इति त्रिषु स्थलेषु अनुमितिर्भवति। यत्र च अनुमित्सा नास्ति सिद्धिश्चास्ति तत्र अनुमित्साविरहविशिष्टसिद्धेः सत्त्वात् अनुमित्साविरहविशिष्टसिद्ध्यभावरूपपक्षतायाः असत्त्वेन नानुमितिरिति।

अनुमित्साविरहवैशिष्ट्यञ्च सिद्धौ एककालावच्छेदेन एकशरीरावच्छेदेन एकात्मवृत्तित्वं तेन अनुमित्साकालीनसिद्धेः कालिकसम्बन्धेन अनुमित्साविरहविशिष्टत्वेन घटावच्छेदेनैकस्मिन्नात्मनि अनुमित्साविरहविशिष्टत्वेन वा नानुमितिक्षतिः एककालीनैकशरीरावच्छेदेन एकात्मवृत्तित्वस्य अभावात्।

अयमत्र निष्कर्षः 'पर्वतो वह्निमानिति' निश्चयः सिद्धिरित्युच्यते सा च 'पर्वतो वह्निमानि' त्यनुमितौ प्रतिबन्धिका। प्रतिबन्धकत्वं च कारणीभूताभावप्रतियोगित्वम् प्रकृते च सिद्ध्यभावस्य अनुमितिं प्रति कारणत्वात् तत्प्रतियोगित्वं सिद्धाविति भवति तस्याः

प्रतिबन्धकत्वम् । परन्तु सिद्धिसत्त्वे पर्वते वह्न्यनुमितिर्मे जायतामितीच्छा अनुमित्सा तस्यां सत्याम् अनुमितिर्जायते इति अनुमित्साया उत्तेजकत्वम्, उत्तेजकत्वं च प्रतिब न्धकसमानकालीनकार्यजनकत्वम् । एवं च अनुमित्साविरहविशिष्टसिद्धिरनुमितेः प्रतिबन्धिका तदभावश्च पक्षता सा च अनुमितौ कारणम् ।

ननु यत्र प्रथमं परामर्शः तद् द्वितीयक्षणे सिद्धिः सिद्ध्युत्पत्तिद्वितीयक्षणे अनुमित्सा तत्र अनुमित्साकाले परामर्शस्य नाशात् नानुमितिः यत्र च क्रमेण अनुमित्सासिद्धिपरामर्शाः तत्र परामर्शकाले अनुमित्साया नष्टत्वादुत्तेजकाभावेन प्रतिबन्धकसद्भावान्नानुमितिः, यत्र च क्रमेण सिद्धिपरामर्शानुमित्साः तत्र अनुमित्साकाले सिद्धेर्नाशेन प्रतिबन्धकाभावादेवानुमितिः, यत्र च परामर्शानुमित्सासिद्धयस्तत्र परामर्शनाशादेव नानुमितिः यत्र च अनुमित्सापरामर्शसिद्धयस्तत्र उत्तेजकाभावात्प्रतिबन्धकसद्भावाच्च नानुमितिः, यत्र च सिद्ध्यनुमित्सापरामर्शास्तत्र प्रतिबन्धकाभावादेवानुमितिः, इति सिद्धिकाले परामर्शकाले वा न अनुमित्सा इति अनुमित्साविरहविशिष्टत्वं सिद्धेर्विशेषणं व्यर्थमिति चेन्न यत्र वह्निव्याप्यधूमवान्पर्वतो वह्निमान् अनुमितिरिष्टसाधनम् इतिसमूहालम्बनात्मकं ज्ञानम् तत अनुमित्सा तत्रानुमित्सापरामर्शसिद्धीनां साहित्यादनुमित्यर्थं पक्षतासम्पत्तये तद्विशेषणस्यावश्यकत्वात् ।

२७-३० ननु सिद्धिपरामर्शसत्त्वेऽपि एतदुत्तरकालीनं यत्किञ्चिज्ज्ञानं मे जायतामितीच्छाया अप्यनुमित्सात्वेन तत्सत्त्वे अनुमित्यापत्तिः-नच अनुमितित्वप्रकारिकैवेच्छा अनुमित्सा तथा च एतदुत्तरकालीनं यत्किंचिज्ज्ञानं जायतामितिच्छाया नानुमित्सात्वमिति न दोष इति वाच्यम् तथा सति प्रत्यक्षभिन्नं ज्ञानं जायतामितीच्छायां इष्टस्यानुमित्सात्वस्यानापत्तेः इत्यत आह अनुमित्सेति ।

२८-३०परामर्शश्चेति। अयम्भावः द्विविधादपि परामर्शात्पक्षः साध्यवान् इत्येवमाकारानुमितिस्वीकारे यदा व्याप्यप्रकारकपक्षविशेष्यकपरामर्शादनुमितिर्जाता तदा पक्षप्रकारकव्याप्यविशेष्यकः परामर्शो नास्ति यदा च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शादनुमितिर्जाता तदा व्याप्यप्रकारकपक्षविशेष्यकः परामर्शो नास्तीति कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारसत्त्वात कस्यापि परामर्शस्य कारणत्वन्न स्यात् अतः पक्षो व्याप्यवान् इत्याकारकपक्षविशेष्यकपरामर्शात् पक्षविशेष्यिका पक्षः साध्यवानित्याकारिका पक्षे व्याप्य इति व्याप्यविशेष्यकपरामर्शात् साध्यविशेष्यिका पक्षे साध्यम् इत्याकरिकानुमितिः स्वीक्रियते एवं च एकधर्मावच्छिन्नकार्यं प्रति यदानेकधर्मावच्छिन्नस्य कारणता तदा व्यतिरेकव्यभिचारः प्रकृते च साध्यप्रकारकपक्षविशेष्यकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकपक्षविशेष्यकपरामर्शत्वावच्छिन्नस्य पक्षप्रकारकसाध्यविशेष्यकानुमितित्वावच्छिन्नं प्रति च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शत्वावच्छिन्नस्य कारणतया एकधर्मावच्छिन्नं कार्यं प्रति अनेकधर्मावच्छिन्नस्य कारणस्याभावान्न व्यतिरेकव्यभिचारः ।

एतदुक्तं भवति वह्निव्याप्यधूमवान् पर्वतः इतिपरामर्शात् पर्वतो वह्निमान् इत्याकारानुमितिः पर्वते वह्निव्याप्यो धूमः इतिपरामर्शात् पर्वते वह्निः इत्याकारानुमितिर्जायते इति ।

ननु व्याप्यप्रकारकपक्षविशेष्यकपक्षप्रकारकव्याप्यविशेष्यकान्यतरपरामर्शत्वेन पक्षः साध्यवानित्याकारानुमितिं प्रति कारणतास्वीकारेण अन्यतरपरामर्शत्वावच्छिन्नकारणत्वस्य सत्त्वान्न व्यतिरेकव्यभिचारः कारणतावच्छेदकावच्छिन्नप्रतियोगिताककरणाभावे कार्यत्वाव-

च्छेदकावच्छिन्नोत्पादस्यैव व्यतिरेकव्यभिचाररूपत्वादिति चेन्न-तद्भिन्नत्वे सति तद्भेदवान् यः तत्प्रतियोगिकभेदवत्त्वमन्यतरत्वम् यथा घटभिन्नत्वे सति पटभेदवद् एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वमेतद्द्वये इति इदमेव घटपटान्यतरत्वं नाम एवं पक्षविशेष्यकपरामर्शभिन्नत्वे सति व्याप्यविशेष्यकपरामर्शभिन्नं एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वं द्विविधपरामर्शे इति पक्षविशेष्यकव्याप्यविशेष्यकपरामर्शान्यतरत्वमिति एवं चान्यतरत्वरूपकारणतावच्छेदककुक्षौ जगतः प्रवेशेन विशेष्यविशेष्यणाभावव्यत्यासेन व्याप्यविशेष्यकपरामर्शभिन्नत्वे सति पक्षविशेष्यकपरामर्शभिन्नो यस्तद्भिन्नत्वरूपस्य पक्षविशेष्यकपरामर्शभिन्नत्वे सति व्याप्यविशेष्यकपरामर्शभिन्नो यः तत्प्रतियोगिकभेदवत्त्वरूपस्य च अन्यतरत्वस्य विनिगमनाविरहेण कारणतावच्छेदकत्वेन गौरवेण अन्यतरत्वेन कारणतायाः स्वीकर्तुमयोग्यत्वात्।

२८-३२ उभयविधेति। ननु द्विविधादपि परामर्शादेकविधानुमितिस्वीकारे व्यतिरेकव्यभिचार इति चेन्न व्याप्यप्रकारकपक्षविशेष्यकपरामर्शाव्यवहितोत्तरक्षणजायमानपक्षः साध्यवानित्याकारकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकपक्षविशेष्यकपरामर्शस्य कारणता एवं पक्षप्रकारकव्याप्यविशेष्यकपरामर्शाव्यवहितोत्तरक्षणजायमान पक्षः साध्यवान् इत्याकारकानुमितित्वावच्छिन्नं प्रति पक्षप्रकारकव्याप्यविशेष्यकपरामर्शस्य कारणता इति स्वीकारेण व्यतिरेकव्यभिचाराभावात्।

वस्तुतस्तु एतदपेक्षयापि लाघवात् पक्षनिष्ठविषयतानिरूपितव्याप्यनिष्ठविषयताकपरामर्शत्वेन द्विविधपरामर्शस्य पक्षः साध्यवान् इत्याकारानुमितिं प्रति कारणतास्वीकाराद् व्यतिरेकव्यभिचारवारणं बोध्यम् द्विविधपरामर्शात् पक्षविशेष्यकसाध्यविशेष्यकानुमितिद्वयस्वीकारस्तु नोचितः अनुभवविरोधादिति।

केचित्तु अनुभवानुरोधेन पक्षविशेष्यकादेव परामर्शादनुमितिर्जायते न तु व्याप्यविशेष्यकात् अत एव वह्निव्याप्यधूमवांश्चायमित्याकारकः पक्षविशेष्यक एवोपनय इतिवदन्ति।

२९-१ तृतीयक्षणसाधारणमव्यवहितोत्तरत्वमाह-अव्यवहितोत्तरत्वं चेति।

२९-६ संकर इति। चाक्षुषत्वाभाववति शाब्दादिपरामर्शे परामर्शत्वं परामर्शत्वाभाववति घटविषयकचक्षुषे चाक्षुषत्व चाक्षुषपरामर्शे चाक्षुषत्वं परामर्शत्वं चेति संकर इत्यर्थः

२९-८ व्यभिचारवारणस्येति। मानसपरामर्शस्यैवानुमितिकारणत्वे यत्र चाक्षुषपरामर्शादनुमितिस्तत्र व्यभिचारः तद्वारणाय चाक्षुषपरामर्शानन्तरं मानसपरामर्शं कल्पयित्वाऽनुमितिस्वीकारेण व्यभिचाराभाव इत्यर्थः।

२९-१० चक्षुर्योगाभावेनेति। मनस इति शेषः। तथा च चाक्षुषसामग्र्यन्तर्गतस्य मनश्चक्षुः संयोगस्याभावादेव न चाक्षुषमिति भावः।

३०-९ व्याप्त्यंशे निश्चयत्वानिवेशेनेति। विशिष्टवैशिष्ट्यबुद्धौ विशेषणांशे संशयानङ्गीकारेणेत्यर्थः।

अयं भावः--विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयः कारणम् अत एव रक्तो दण्डो नवेति संशयात् न रक्तदण्डवानयमिति ज्ञानस्योदयः। एवं च प्रकृते वह्निव्याप्यो धूमो नवेति संशयकाले वह्निव्याप्यधूमवानय पर्वत इति ज्ञानानुदयात्तस्यैव चानुमितिकारणत्वात् व्याप्त्यंशे निश्चयत्वनिवेशो विफल इति।

३०-१२ बाधकाभाव इति। दण्डी रक्तो नवेति संशयानन्तरं रक्तदण्डवानिति संशयस्योत्पादाद्विशेषणांशे संशयानभ्युपगमपक्षस्य निर्युक्तिकत्वादिति भावः।

३०-२० केचिदिति । उदयनाचार्याः इत्यर्थः। तथा च 'यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते । तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ।' इति प्रशस्तपादभाष्यमुपादाय लिङ्गमनुमापकमिति यल्लिङ्गं प्रमाणमनुमापकम् अनुमितिरूपप्रमाकरणम् एतेन परामृश्य मानं लिङ्गमनुमापकम् तथा च लिङ्गस्यावान्तरव्यापारवत्त्वेन करणत्वमिति संगच्छत इति भावः इति किरणावली । भाविभूतलिङ्गस्थले च लिङ्गस्याभावेऽपि ज्ञानरूपव्यापारद्वाराऽनुमितिः अतः एव धूमादिति हेतुपञ्चम्युपपत्तिरिति तेषामाशयः ।

३०-२१भूतभाविलिङ्गास्यामिति । 'लिङ्गदर्शनात्संजायमानं लैङ्गिकम्' इति यथाश्रुत प्रशस्तपादभाष्यानुसारिणः । अस्मिन्मते धूमादित्यत्र धूमपदं धूमज्ञाने लाक्षणिकम् । तात्पर्यटीकायां अनुमानादीनि तु स्वज्ञानेन प्रमासाधनानि न खल्वगृहीतं लिङ्गं शब्दो वाऽऽगमसहितं सादृश्यं वा यथाविषयमादधाति प्रमाम् इत्युक्तमतो धूमादेरेव ज्ञानद्वारानुमिति करणत्वं यद्यपि प्रतीयते तथापि 'अपरे तु मन्यन्ते लिङ्गपरामर्शोऽनुमानम् वयं तु पश्यामः सर्वमनुमानमनुमितेस्तन्नान्तरीयकत्वात् प्रधानोपसर्जनताविवक्षायां लिङ्गपरामर्श इति न्याय्यम् इति वार्तिकात् लिङ्गपरामर्शस्यैवानुमितिकारणता सिध्यतीति भावः ।

३०-२७प्रतिज्ञात्वमिति । अस्मिल्लक्षणे न्यायान्तर्गतत्वे सतीति देयम् तेनोदासीन वाक्ये नातिव्याप्तिः ।

३१-२ तथा चायमिति । वह्निव्याप्यधूमवाँश्चायमित्यर्थः ।

३१-४ निगमनत्वमिति । तस्मात्तथा इति निगमनम् । धूमज्ञानज्ञाप्यवह्निमान् पर्वत इति बोधः अयमिति पदस्यानुषङ्गात् ।

३१-१७ दिगिति । 'पञ्चावयववाक्यस्य गुणदोषविभागवित्' इति महाभारत दर्शनेन पञ्चावयवानां श्रौतत्वमवगम्यते ।

अनुमितिकरणेति । अनुमितिपदम् साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इति समूहालम्बनानुमितिपरम् । तथा च ह्रदो वह्निमान् धूमादित्यत्र वह्निमान् ह्रद इत्यनुमितिकारणीभूतोऽभावः वह्न्यभाववान् ह्रद इति बाधाभावः तत्प्रतियोगी वह्न्यभाववद्ध्रदः तत्प्रकारकं यथार्थज्ञानं ह्रदे वह्निसाधने धूमो बाधित इति तत्प्रकारो वह्न्यभाववद्ध्रदः स च स्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन धूमनिष्ठ इति भवति तस्य दोषत्वम्।

३१-१८ एतदुक्तं भवति अनुमितिकारणीभूताभावप्रतियोगिनो ये (व्यभिचारादयः) तत्प्रकारकयथार्थज्ञानविषयत्वम् हेत्वाभासत्वं (दुष्टहेतुत्वम्) हेतुवदाभासन्त इति व्युत्पत्त्या हेत्वाभासपदं दुष्टहेतुपरम् । हेतोराभासा इति व्युत्पत्त्या च हेतुदोषपरम् । इदं लक्षणं, च ज्ञायमानानां बाधादिदोषाणां प्रतिबन्धकत्वमभ्युपेत्य बाधादिज्ञानस्यानुमितिप्रतिबन्धकत्वे तु न बाधादयोऽनुमितिकारणीभूतप्रतियोगिनः किन्तु बाधनिश्चयः तदा च अनुमिति कारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् हेत्वाभासलक्षणं बोध्यम् । अनुमितिकारणीभूतो ऽभावः वह्न्यभाववान् ह्रद इति बाधज्ञानाभावः तत्प्रतियोगियथार्थज्ञानं वह्न्यभाववान् ह्रद इत्याकारकं तद्विषयत्वं वह्न्यभाववद्ध्रदे इति तस्य हेतुदोषत्वम् तद्वत्त्वं च दुष्टहेतुनां लक्षणम् इति ।

३१—२१ यादृशविशिष्टविषयकत्वेनेति । तृतीयार्थोऽनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वम् यादृशविशिष्टविषयकत्वं च यद्रूपावच्छिन्नविषयकत्वम् ज्ञानपदमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरम् षष्ठ्या निष्ठत्वमर्थः । तत्त्वमित्यस्य तद्रूपवत्त्वमित्यर्थः । तथा च अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषय-

कत्वावच्छिन्ना प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वं हेत्वाभासत्वम्, ह्रदो वह्निमान् धूमादित्यनुमितौ वह्न्यभाववान् ह्रद इति बाधनिश्चयः प्रतिबन्धकः तथा च प्रकृतानुमितिः ह्रदो वह्निमान् इत्याकारिका सा च प्रतिबध्या इति प्रतिबध्यता तन्निष्ठा तन्निरूपिता प्रतिबन्धकता वह्न्यभाववान् ह्रद इति अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चये तत्र वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वं वर्तते इति प्रतिबन्धकता वह्न्यभावद्ध्रदविषयकत्वावच्छिन्ना तद्रूपवान् वह्न्यभाववद्ध्रदः इति तस्य दोषत्वम् एवं पर्वतो धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तिवह्नेर्दोषत्वम् तथा हि हेत्वाभासलक्षणे अनुमितिपदं साध्यव्याप्यहेतुमान् पक्षः साध्यवानिति समूहालम्बनानुमितिपरम् इति तादृशानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता धूमाभाववद्वृत्तिर्वह्निरितिनिश्चये तदवच्छेदकं धूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयकत्वमिति धूमाभाववद्वृत्तिवह्निर्व्यभिचारदोष इति समन्वयः ।

३१—२९ साक्षात्प्रतिबन्धकत्वाभावेनेति। उपाधिर्हि: स्वव्यभिचारेण हेतौ साध्यव्यभिचारानुमापक इति साध्यव्यभिचारद्वाराऽनुमितिदूषकः न साक्षात् व्यभिचारादयस्तु व्याप्तिज्ञानविघटनद्वारा व्याप्तिविषयकसमूहालम्बनानुमितेः साक्षादेव दूषका इति भावः।

३२—४ दूषकतावीजमिति। अनुकूलतर्काभावेन अनेन हेतुना यथा साध्यं साध्यते तथैव साध्याभावोऽपि साधयितुं शक्य इति दूषकत्वमस्येत्यर्थः ।

३२—९ मूर्त्तत्वादितीति। पृथिव्यप्तेजोवायुमनांसि मूर्तानीति तत्र मूर्तत्वं वायौ वर्तते आकाशे च नेति पक्षैकदेशे आकाशे हेतोरवृत्तित्वमित्यर्थः ।

३२—१२ अक्षपादीया इति। अत्रारुचिवीजं तु नीलधूमे व्याप्तेः सत्त्वेन व्याप्यत्वासिद्धेरसम्भव एव बोध्यम् ।

न च तत्र व्याप्तिसत्त्वेऽपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यम् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात् ।

न च स्वरूपसम्बन्धरूपावच्छेदकत्वस्य सम्भवति लघौ गुरौ तदभावादिति न्यायेन गुरुणि नीलधूमत्वेऽभावाद्व्याप्यत्वासिद्धिरिति वाच्यम् तथा सति 'पशुमान् सास्नादिमतः' इत्यत्रापि व्याप्यत्वासिद्ध्यापत्तेः सास्नापेक्षया गोत्वस्य लघुत्वेन स्वरूपसम्बन्धरूपावच्छेदकत्वाभावात् । तस्माद्व्यर्थविशेषणस्थले न व्याप्यत्वासिद्धिहेत्वाभासः किन्त्वधिकोक्तिरूपनिग्रहस्थानेन पुरुषो निगृह्यते इति भावः ।

३२—१४ आद्यमुदाहरति—यथा नित्यः शब्द इति। द्वितीयमुदाहरति एवं वायुरप्रत्यक्ष इति ।

३२—२० अत्राहुरिति। रत्नकोषकारा इति शेषः। सत्प्रतिपक्षस्य संशयजनकत्वं दूषकतावीजं न त्वनुमितिप्रतिबन्धकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमितिप्रतिबन्धकत्वे मानाभावादिति तेषामाकूतम् ।

अत्रेदमवधेयम्—घटाभावव्याप्यवत्ताज्ञानेऽपि घटचक्षुः संयोगे सति घटवत्ताज्ञानं जायते एवं शङ्खे पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सत्यपि पित्तादिदोषे सति पीतः शङ्ख इति ज्ञानं जायते तदभावव्याप्यवत्ताज्ञाने सति तद्वत्ताविषयकः शाब्दबोधः ज्ञानलक्षणाधीनं चाक्षुषं तु न जायतेऽतस्तद्वत्ताविषयकं शाब्दं ज्ञानलक्षणाजन्यज्ञानं च प्रति तदभावव्याप्यवत्ताज्ञानं प्रतिबन्धकं न तु तद्वत्ताविषयकज्ञानमात्रं प्रतीत्यङ्गी कर्तव्यम् तथा सति पूर्वोदीरितयोः घटवत्ताज्ञानपीतः शङ्ख इति ज्ञानयोरनापत्तेः एवञ्च

यथा कोटिद्वयव्याप्यवत्ताज्ञाने सति उभयभासकसामग्रीसत्त्वात् कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थलेऽपि संशयरूपानुमितिर्भवत्येव ।

न च यद्युभयभासकसामग्रीसत्त्वे उभयभानं तदा पित्तादिदोषसत्त्वेऽपि पीतत्वशुक्लत्वोभयस्मृतावुभयोर्भानापत्तिरिति वाच्यम् तत्र पीतत्वसाक्षात्कारस्यैवानुभविकत्वेन पीतत्वाभावग्रहे पित्तरूपदोषस्य प्रतिबन्धकत्वमभ्युपगम्य पीतत्वसाक्षात्कारसामग्र्या अधिकवलवत्त्वं दूरत्वदोषे च स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैवोदयात् उभयसामग्र्योः समवलत्त्वं कल्प्यत इत्यदोषात् ।

ननु पूर्वोक्तरीत्या तद्वत्तानुमितौ तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावेन परस्परानुमितिप्रतिबन्धः सत्प्रतिपक्षस्थले यद्यपि न सम्भवति तथापि निश्चयोत्पादने क्लृप्तशक्तिकयोस्तद्व्याप्यवत्तातदभावव्याप्यवत्ताज्ञानयोर्मिलितयोः साध्यसंशयहेतुत्वं कल्पनीयमिति गौरवमिति चेन्न — तत्तत्परामर्शस्य तत्तद्विधेयकानुमितित्वमेव कार्यतावच्छेदकं न तु निश्चयत्वमपि तद्घटकं किन्तु एकैकपरामर्शसत्त्वे कोट्यन्तरभासकसामग्र्यभावात् निश्चयात्मिकाऽनुमितिर्भवति उभयपरामर्शसत्त्वे च कारणवलादुभयकोट्योर्विरोधितया भानेऽर्थात्संशयरूपानुमितिर्भवतीति अधिककार्यकारणभावकल्पनाभावेन गौरवाभावादिति ।

३२—२४ अत्र नव्या इति । लाघवेन लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताज्ञानं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वमभ्युपगम्यते न तु ज्ञानलक्षणासन्निकर्षजन्ये शाब्दबोधे च पृथक् प्रतिबन्धकता गौरवात् तथा च प्रतिबन्धकसत्त्वान्नानुमितिः न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव प्रत्यक्षस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वमपि प्रतिबध्यतावच्छेदककोटौ दीयेतेति भावः ।

३२—३० धर्मनिरूपणपरमीमांसाशास्त्रे अनुमाननिरूपणं काकदन्तपरीक्षावान्निष्फलमित्याशङ्कां निरस्यति—तदिदमनुमानमित्यादिना । एवं च चोदनैव प्रमाणमिति नियमोपयोगि तन्निरूपणमित्याशयः ।

३२—३२ सिद्धसाधनभियेति । क्षितिः सकर्तृका कार्यत्वादित्यनुमानेन पक्षतावच्छेदकक्षितित्वावच्छेदेन सकर्तृकत्वसाधने परमाणौ बाधः, पक्षतावच्छेदकक्षितित्वसामानाधिकरण्येन सकर्तृकत्वसाधने घटादौ सिद्धसाधनमतः जन्यकृत्यजन्यं द्व्यणुकं सकर्तृकं कार्यत्वादित्यनुमानेन नित्यकृत्याश्रयेश्वरसिद्धिः।अत्र द्व्यणुकमित्येव पक्षनिर्देशः जन्यकृत्यजन्यमिति स्वरूपासिद्ध्यविषयताप्रतिपादनाय न पक्षतावच्छेदककोटौ निविशते नैष्फल्यात् ।

अत्र सकर्तृकमित्यस्य कर्तृजन्यमित्येवार्थः प्रतीयते तथा च कार्यं प्रति कर्ता कारणमिति स्वीकारे कर्तृत्वं कारणतावच्छेदकं तच्च कृतिमत्त्वं कृतिमत्त्वं च कृतिरेव सा च नानेति गौरवम् अतः कार्यं प्रति कृतिः कारणम् तथा च कृतित्वं कारणतावच्छेदकं तच्च नानाकृतिष्वेकमिति लाघवमिति सकर्तृकमित्यस्य कृतिजन्यमित्यर्थो बोध्यः इति द्व्यणुकं कृतिजन्यं कार्यत्वादित्यनुमानेन द्व्यणुकस्य कृतिजन्यत्वसिद्धौ क्षितिजनिका कृतिः यत्किंचिदात्मसमवेता कृतित्वात् इत्यनुमानेन अस्मदादिसमवेतत्वस्य बाधिततयाऽस्मदादिभिन्नेश्वरसिद्धिरिति भावः ।

३३—३ सत्प्रतिपक्षितत्वादिति । द्व्यणुकमकर्तृकं शरीराजन्यत्वात इत्यनुमानेनेत्यर्थः शरीरपदानुपादाने द्व्यणुकस्य जन्यतया हेतोः स्वरूपासिद्धत्वमिति तद्वारणाय शरीरपदं

व्यभिचारवारकमिति तस्य वैयर्थ्यं व्यभिचारवारकविशेषणस्यैव सार्थकत्वादित्याह—व्यर्थविशेषणत्वेनेति ।

ननु स्वरूपासिद्धिवारकस्यापि विशेषणस्य सार्थकत्वं पक्षधरमिश्रादिसम्मतमिति नेदं दूषणमित्यपरितोषादाह नित्यत्वोपाधिकतयेति। अकर्तृकत्वमाकाशादौ तत्र नित्यत्वमिति साध्यव्यापकत्वम् अजन्यत्वं प्रागभावे आकाशादौ च तत्र प्रागभावे नित्यत्वाभाव इति साधनाव्यापकता एवं च शरीराजन्यत्वं अकर्तृकत्वव्यभिचारि नित्यत्वव्यभिचारित्वादित्यनुमानेन व्यभिचारानुमानात् द्व्यणुकमकर्तृकं शरीराजन्यत्वादित्यनुमानस्यासम्भवेन न सत्प्रतिपक्ष इत्यर्थः ।

३३—६ सत्प्रतिपक्ष इति । द्व्यणुकम् अशरीरमात्रकर्तृकत्वाभाववत् वस्तुत्वादित्यनुमानाकारः ।

३३—१२ वह्निर्दाहानुकूलेति । अद्विष्टातीन्द्रियधर्मसमवायीत्येतन्मात्रोक्तौ वह्निद्व्यणुकवृत्तिपरिमाणव्यक्तिमादाय भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपमादाय वा सिद्धसाधनमतः—साध्ये दाहानुकूलेति । अदृष्टवदात्मसंयोगमादाय सिद्धसाधनमतोऽद्विष्टेति । वह्निनिष्ठोष्णस्पर्शमादाय सिद्धसाधनमिति तद्वारणायातीन्द्रियेति ।

अदृष्टवदात्मवदिति । कार्यमात्रेऽदृष्टस्य हेतुतयेत्थमभिधानं यद्यप्यात्मनो दृष्टान्तत्वमसङ्गतं तस्य दाहजनकत्वे मानाभावात् तथापि कार्यमात्रे कर्तुरेव कारणतेति मताभिप्रायेणैवमुक्तम् । अथ वा दाहजनकत्वमत्र न दाहकारणत्वं किन्तु दाहप्रयोजकत्वं तच्च कारणतत्कारणसाधारणं स्वरूपसम्बन्धरूपमिति कार्यमात्रकारणकृतिकारणात्मन्यक्षतमिति ध्येयम् ।

३३—१३ उत्तेजकाभावेति । अयं भावः दाहं प्रति शक्तिर्न कारणं किन्तु प्रतिबन्धकाभाव एव तथा च न शक्तिसिद्धिरिति । न चोत्तेजकसत्त्वे प्रतिबन्धकसद्भावे कथं दाह इति वाच्यम् उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वाङ्गीकारेणादोषात् । तथा च उत्तेजकप्रतिबन्धकवह्नीनां समवधाने उत्तेजकाभावरूपविशेषणासत्त्वेन विशेषणाभावप्रयुक्तो विशिष्टाभावः वह्निमात्रसत्त्वे उत्तेजकाभावरूपविशेषणस्य सत्त्वेऽपि प्रतिबन्धकमणिरूपविशेष्यस्यासत्त्वेन विशेष्याभावप्रयुक्तो विशिष्टाभावः । उत्तेजकस्य वह्नेश्च सत्त्वे उत्तेजकाभावरूपविशेषणस्य मणिरूपविशेष्यस्य चाभावादुभयाभावप्रयुक्तो विशिष्टाभावः इति त्रिषु स्थलेषु दाहः । यत्र प्रतिबन्धकवह्नी तत्रोत्तेजकाभावविशिष्टमणेरेव सद्भावान्न दाह इति ।

३३—१७ तृणारणिमणीनामिति । अयमभिप्रायः—वह्निं प्रति तृणस्यारणेर्मणेश्च कारणतेति व्यभिचारेण कस्यापि कारणत्वं न स्यादिति तत्तदव्यवहितोत्तरत्वमन्तर्भाव्य कार्यकारणभावो वाच्यस्तार्किकैः अस्माकं तु वह्न्यनुकूलशक्तिमत्त्वेनानुगमसंभवान्न व्यभिचारो न वा गौरवम्। किं च शून्यस्याभावस्य कुत्रापि कारणत्वानङ्गीकारेण दाहं प्रति मण्यभावस्य कारणत्वानुपपत्तिश्च किंचास्माच्छब्दादयमर्थो बोध्यव्य इतीश्वरेच्छायाः पदशक्तित्वे पदस्य गुणत्वेन गुणे गुणानङ्गीकारेण पदनिष्ठत्वानुपपत्तिः कारणे कञ्चिदतिशयमनापादयतो मणेः प्रतिबन्धकत्वानुपपत्तिश्च अस्माकं तु शक्तिरूपकारणविघटनेनैव मणेः प्रतिबन्धकत्वमिति ।

३३—२३ ननु व्रीहियवयोः प्रदेयहविःप्रकृतित्वेनैकरूपेणैव यागकारणत्वसम्भवान्न तत्र व्यभिचारवारणाय शक्तिकल्पनमावश्यकमित्याशङ्कते—न च प्रदेयप्रकृतित्वेनेति ।

३३—२८ दत्तजलाञ्जलिरिति । व्रीहिजन्यतावच्छेदकाग्नेयत्वजातेर्यवजन्यतावच्छेदकत्वाभावेन व्रीहियवयोर्विकल्पो न स्यादित्यर्थः ।

ननु तथापि शक्तेरुभयपर्याप्तत्वे व्रीहिमात्रादहृष्टं न स्यादिति व्रीहियवयोः समुच्चय एव स्यात्तथा च विकल्पोच्छेद इत्यत आह—शक्तेश्चेति ।

३३—२९ अन्यथेति । शक्त्यनङ्गीकारे इत्यर्थः । विकल्पसिद्ध्यर्थमहृष्टं प्रति व्रीहियवान्यतराभावविशिष्टव्रीहियवान्यतरस्य कारणताऽभ्युपमन्तव्येत्यर्थः ननु स्वप्रतियोगिकभेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वरूपान्यतरत्वेन कारणत्वे गौरवमत आह—उभयाभावेति । व्रीहियवोभयाभावविशिष्टव्रीहेः, आदिना व्रीहियवोभयाभावविशिष्टयवस्य च कारणता कल्प्येत्यर्थः । तावतापि व्यभिचारवारणाय अव्यवहितोत्तरत्वनिवेश आवश्यक इति गौरवमन्यथा व्यभिचारः इत्याह—गौरवापत्तिः व्यभिचारश्चेति ।

३४-२० दिगिति । एवं च शक्तिस्त्रिधा सहजशक्तिराधेयशक्तिः पदशक्तिश्चेति ।

३४-२५ उत्तेजकेऽव्याप्तेरिति । उत्तेजकाभावो हि न कार्योत्पत्तिप्रतिबन्धकः प्रतिबन्धकाभावे उत्तेजकस्य सत्त्वेऽसत्त्वे वा कार्योत्पादादिति भावः ।

३४-२८ तद्घट इति । वस्तुतस्तु दण्डत्वादौ नियतपूर्ववर्तितायाः सत्त्वादतिव्याप्तिरत उक्तमन्यथासिद्धिशून्येति । तद्घटत्वावच्छिन्नेऽन्यत्र कलसपूर्वेत्याद्यन्यथासिद्धिमत्यपि घटत्वावच्छिन्नेऽनन्यथासिद्धे तद्रासभेऽतिव्याप्तिवारणाय नियतेति ।

ननु अन्यथासिद्धिशून्यत्वं कारणत्वमित्येवास्तु नियतपूर्ववर्तित्वदलं व्यर्थमिति चेदत्र केचित् अन्यथासिद्धित्वस्य जातित्वाभावेनानुगततया कार्यनियतपूर्ववर्तिनिष्ठतत्तदन्यथासिद्धीनां कार्यानियतपूर्ववर्तिपटादिनिष्ठतत्तदन्यथासिद्धीनां चाभावकूटस्य निवेशापेक्षया कार्यनियतपूर्ववर्तिदण्डत्वादिनिष्ठतत्तन्यथासिद्धीनामभावकूटस्य निवेशेन लाघवम् इति एतादृशलाघवमनुसृत्य कार्यनियतपूर्ववर्तिदलम् इति ।

३४-३० गृहीतस्वतन्त्रेति । घटरूपकार्यं प्रति दण्डरूपस्य दण्डत्वस्य वाऽन्वयव्यतिरेकौ घटकारणीभूतदण्डमादायैव गृह्येते न स्वातन्त्र्येति घटं प्रति दण्डरूपं दण्डत्वं चान्यथासिद्धम् 'यत्र स्वाश्रयजन्यभ्रमिमत्त्वसम्बन्धेन दण्डरूपं दण्डत्वं वा तत्र घटः' इत्यन्वये 'यत्रोक्तसम्बन्धेन दण्डरूपाभावस्तत्र घटाभाव' इति व्यतिरेके च स्वाश्रयपदेन दण्डस्यैव ग्रहणेन दण्डमादायैवान्वयव्यतिरेकयोर्ग्रहणात् । स्वं दण्डरूपं दण्डत्वं वा तदाश्रयो दण्डः तज्जन्या भ्रमिश्चक्रे तज्जन्या भ्रमिः कपाले तत्र घटः इति बोध्यम् अन्वयव्यतिरेकयोः स्वातन्त्र्यं च स्वभिन्नप्रकृतकार्यकारणान्वयव्यतिरेकाप्रयुक्तत्वम्, तच्च प्रकृतान्वयव्यतिरेकयोर्नास्तीति सर्वं सुस्थम् ।

३४-३० अन्यनिरूपितेति । अन्यं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा घटादिकं प्रत्याकाशस्य तस्य हि घटादिकं प्रतिकारणत्वमाकाशत्वेनैव स्यात् आकाशत्वं हि शब्दसमवायिकारणत्वम् एवं च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम् एवं कुलालपितुरपि घटं प्रति जनकत्वं कुलालपितृत्वेनैव तच्च कुलालनिरूपितान्यथासिद्धिशून्यनियतपूर्ववर्तित्वं तद्गृहीत्वैव कुलालपितुर्घटं प्रति नियतपूर्ववर्तित्वं ग्राह्यमतस्तदप्यन्यथासिद्धम् ।

३४-३१ कलसान्वयेति । अवश्यकॢप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्य-

थासिद्धमित्यर्थः । यथा यत्र यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति तत्र अन्यत्र क्लृप्तनियतवर्तिभिर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्धः इति समन्वयः ।

३९—९ कारणं द्विविधमिति । अयं भावः दण्डनिष्ठा या कारणता तस्या दण्डत्वमवच्छेदकम् तत्र अन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वमिति नियमः एवं च यदि फलोपधायकतारूपैव कारणता स्वीक्रियेत तदा दण्डत्वस्य अरण्यस्थदण्डे सत्त्वात्कारणत्वस्य च तत्रासत्त्वात् दण्डत्वमवच्छेदकं न स्यादतः स्वरूपयोग्यतारूपापि कारणता स्वीक्रियत इति।

३८—१९ रजतोत्पत्त्यङ्गीकार इति । ननु रजतोत्पादकानां रजतावयवादीनामभावेन शुक्तौ कथं रजतोत्पत्तिरिति चेदुच्यते काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा च काचिदन्तः करणवृत्तिरुदेति तस्यां च वृत्तौ इदमवच्छिन्नं चैतन्यं प्रतिविम्बते तत्र इन्द्रियद्वारा अन्तःकरणं विषयदेशं गत्वा विषयाकारेण परिणमतेइति एकदेशस्थितोपाधिद्वयस्य भेदकत्वाभावेन अन्तःकरणपरिणामरूपायां वृत्तौ प्रतिबिम्बितं चैतन्यम् इदमवच्छिन्नचैतन्यं चाभिन्नम् ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसंदर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण परिणमते इति रीत्या रजतोत्पत्तिसम्भव इति भावः ।

४१—९ तेषां—प्रयत्नसुखादीनाम् । अयावच्छरीरभावित्वेनेति । शरीरनिष्ठा हि रूपादयो गुणा यावच्छरीरभाविनः यत्नादिकं तु न तथा मृतशरीरेऽभावात् । अयावच्छरीरभावित्वं च शरीरनिष्ठात्यन्ताभावप्रतियोगित्वम् , अनुमानाकारश्च यत्नादिकं न शरीरगुणः अयावद्द्रव्यभावित्वाच्छब्दवत् इति ।

४१—१० किंचेति । अवयविविशेषगुणेषु घटरूपादिषु अवयवगुणपूर्वकत्वं दृष्टं न च ज्ञानादौ तथेत्यर्थः । द्व्यणुकपरिमाणस्य परमाणुगतद्वित्वसंख्याजन्यत्वेन अवयवगुणपूर्वकत्वाभावेन व्यभिचारः स्यादतो विशेषपदम् नन्वेवमपि चित्ररूपे व्यभिचार इति चेन्न चित्ररूपानङ्गीकारात् ।

४१—१९ मनसो विभुत्वनये त्विति । दीर्घशष्कुलीभक्षणादावेकदाऽनेकेन्द्रियज्ञानदर्शनान्मनसो विभुत्वमिति तेषां भावः ।

४१—३२ निष्प्रकारकमेवेति । तत्त्वमस्यादिवाक्यैः शक्त्या निष्प्रकारकबोधाजननेऽपि लक्षणया निष्प्रकारकबोधजननम् आकाशपदाच्छक्त्या निष्प्रकारकोपस्थितिवदिति भावः । यदि तु आकाशपदान्न निष्प्रकारकोपस्थितिरिति मतं विभाव्यते तदापि शक्त्या सप्रकारकत्वधीजनकत्वनियमेऽपि लक्षणया तथात्वे मानाभावः सोऽयं देवदत्तः प्रकृष्टप्रकाशः शशीत्यादौ लक्षणया निष्प्रकारकबोधस्य दर्शनात् अत एव 'सविकल्पकवाक्यार्थबोधे सविकल्पपदार्थोपस्थितिः निर्विकल्पकवाक्यार्थबोधे च निर्विकल्पकपदार्थोपस्थितिरङ्गम्' इति सिद्धान्तबिन्दौ श्रीमधुसूदनसरस्वतीचरणाः । उपनिषज्जन्यं प्रत्यक्षमिति । शब्दादपि प्रत्यक्षस्य वेदान्तिभिरङ्गीकारादिति भावः ।

इत्यनुमानपरिच्छेदः ।

४९—२१ उपमितिरिति । अनेन सदृशी मदीया गौरित्येवंरूपा ।

४९—२६ व्यासज्यवृत्तितयेति । व्यासज्यवृत्तिधर्मप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणताया द्वित्वादिप्रत्यक्षे क्लृप्तत्वादिति भावः ।

४६—४ अयं गवयपदवाच्य इत्येवं शक्तिग्रहे गवयान्तरे शक्तिग्रहो न स्यादित्य-रुचेराह—गवयो गवयपदवाच्य इति ।

इत्युपमानपरिच्छेदः ।

४६—३२ सन्निकर्षत्वायोगादिति । सम्बन्धो हि सम्बन्धिभ्यां भिन्ना द्विष्ठो विशिष्ट-बुद्धिनियामकश्च भवतीति भावः ।

४७—२१ षड् युक्तयः-षट् प्रमाणानि ।

इत्यभावपरिच्छेदः ।

४८—१ जन्यपदेति । जन्या या पदधीस्तज्जन्यत्वव्यभिचारिणी यानुभवत्वव्यापि-का जातिः प्रत्यक्षत्वमनुमितित्वं च पदविषयकत्वाव्यभिचारिणी जातिरुपमितित्वम् उपमितेरयं गवयपदवाच्य इत्येवंरूपत्वेन पदविषयकत्वं तादृशजातिशून्यत्वं शाब्दप्र-मायामेवेति समन्वयः ।

४८—६ स्वकरणकेति । पदकरणकं यच्छाब्दज्ञानं घट इत्याकारकं तत्र प्रकारः घटत्वं तत्प्रकारिका प्रमा अयं घटत्ववानित्याकारिका अयं घट इत्याकारिका वा तज्जन्यः शब्दः घटशब्द इत्यर्थः ।

४८—१० न त्वेकाख्यातत्वमिति । अत एव तिङ्ङतिङः इति सूत्रेऽतिङ्ग्रहणं पचति भवतीत्यत्र महाभाष्योक्तमेकवाक्यत्वं च संगच्छते पश्य मृगो धावतीति । मृगाभिन्ना-श्रयवृत्तिधावनानुकूलव्यापारकर्मकं त्वद्भिन्नाश्रयवृत्ति प्रेरणाविषयीभूतं दर्शनमिति बोधः।

४९-२२ विशेष्यत्वनियम इति । ओदनं पचतीत्यत्र ओदननिष्ठविक्लित्त्यनुकूलव्यापारा नुकूला कृतिरिति पच्यते ओदन इत्यत्र व्यापारजन्यविक्लित्त्याश्रय ओदन इति बोधः अत्र पाकपदेन कृतिः ।

५२—३१ तद्धेतोरिति न्यायेनेति । तद्धेतोरेव तत्त्वे किं तेनेति न्यायाकारः ।

५३—१९ जन्यत्वापेक्षयेति । तन्निष्ठान्यथासिद्ध्यनिरूपकत्वे सति तन्नियतोत्तरवर्तित्वं जन्यत्वम् प्रयोज्यत्वं च तन्नियतोत्तरवर्तित्वमात्रम् ।

५७—१ प्रयोजकवाक्येति । घटानयनप्रवृत्तिः घटानयनधर्मिकेष्टसाधनताज्ञानजन्या प्रवृत्तित्वात् मदीयस्तनपानादिप्रवृत्तिवदित्यनुमानेनेष्टसाधनताज्ञानमनुमाय घटानयनध-र्मिकेष्टसाधनताज्ञानं घटमानयेति शब्दकरणकं तन्नियतोत्तरवर्तित्वात् इति शब्दस्य तादृशबोधे हेतुतामनुमिनोति एवं च असम्बद्धस्य जनकत्वानुपपत्त्या शब्दार्थयोः शक्ति-रूपः सम्बन्धः कल्प्यत इति भावः ।

५७—१६ परम्परासम्बन्धेनेति । स्वशक्यसमवेतगुणसजातीयगुणवत्त्वरूपेणेत्यर्थः ।

५८—३ प्राञ्च इति । लक्ष्यलक्ष्यतावच्छेदकसाधारणस्य एकस्यानारोपितशक्य-सम्बन्धस्यासम्भवादिति भावः ।

५८—५ नव्या इति । एवं च तीरे प्रवाहस्य सामीप्यरूपः तीरत्वे च स्वसमीपवृत्तित्व रूपः, सम्बन्धः शक्यसम्बन्धो लक्षणेत्यत्र।जात्यभिप्रायमेकवचनम् तीरत्वे प्रवाहसामी-प्यस्यारोपो वेति भावः ।

५८—८ तदसम्भवादिति । वेदस्यापौरुषेयत्वेन तात्पर्यासम्भवादित्यर्थः ।

५८—१४ सर्वलाक्षणिकस्थले—धूमादित्यत्रेत्यर्थः । अत्र धूमपदस्य धूमज्ञाने पञ्च-म्याश्च ज्ञाप्यत्वे लक्षणा ।

६०—१८ भेदरूपः संसर्गरूपश्चेति । अयं भावः राजपुरुषः इत्यतो राजसम्बन्धवान्

पुरुष इति बोधाङ्गीकारे विरोधाभावाद्राजपुरुषो देवदत्तस्य चेति प्रयोगापत्तिरतो भेदो वाक्यार्थः तथा च राजेतरसम्बन्धिभिन्नः पुरुष इति बोधः एवं च विरोधान्न तादृशः प्रयोगः भेदमात्रस्यैव वाक्यार्थत्वे अस्वामिके राजपुरुष इति प्रयोगापत्तिः तस्य राजेतरसम्बन्धिभिन्नत्वादतः संसर्गोऽपि वाक्यार्थः ततो राजेतरसम्बन्धिभिन्नो राजसम्बन्धवांश्च पुरुष इति बोधः इति ।

६०—२८ विशिष्टस्येति । यथा दण्डी पुरुष इति । अत्र पुरुषत्वविशिष्टे दण्डत्वविशिष्टस्य वैशिष्ट्यं (संसर्गो) भासते । नीलदण्डवानिति । पुरुषे दण्डो विशेषणं तत्र च नैल्यं विशेषणं विशेषणत्वं नाम विद्यमानत्वे सति व्यावर्तकत्वे सति विधेयान्वयित्वं प्रकृते च नैल्यस्य न पुरुषे विशेषणत्वम् । दण्डीति । अत्र दण्डविशिष्टे देवदत्ते कुण्डलवैशिष्ट्यं भासते । दण्डी कुण्डलीत्यत्र एकत्र (देवदत्ते) दण्डकुण्डलयोरुभयोर्विशेषणत्वम् इति ।

६१—१२ गौरवादिति । लः कर्मणीति सूत्रं तु तिबादिनिष्ठां बोधकतारूपां शक्ति तत्तत्स्थानित्वेन कल्पिते लकारे आरोप्येति बोध्यम् ।

६३—१९ इष्टसाधनत्वस्येति । इष्टसाधनत्वज्ञानाभावात् जलताडने कृतिसाध्यत्वज्ञानाभावात् सुमेरुशृङ्गाहरणे बलवदनिष्टाननुबन्धित्वज्ञानाभावाच्च मधुविषसम्पृक्तान्नभोजने न प्रवृत्तिः । वस्तुतस्तु आस्तिककामुकस्य बलवदनिष्टानुबन्धित्वज्ञानसत्त्वेऽपि अगम्यागमने प्रवृत्तेर्व्यभिचारेण बलवदनिष्टाननुबन्धित्वज्ञानं न प्रवृत्तिहेतुः किन्तु बलवद्द्वेषः प्रतिबन्धकः इति ।

६७—२९ पुष्पवन्तशब्दवदिति । एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकराविति कोशेन एकयैव शक्त्या पुष्पवन्तपदाच्चन्द्रसूर्ययोर्यथा बोधस्तथा लिङापि इष्टसाधनत्वादित्रिकमेकयैव शक्त्या बोध्यत इत्यर्थः ।

७६—१० उत्पत्त्यादिरूपं फलमिति । स्फुटं चैतत् 'रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत्' इत्यादिप्रयोगेष्ववगम्यते ।

७६—१४ सूचयतीति । अयं भावः भूश्च वाश्च भूवौ आदिश्च आदिश्च आदी भूवावादी येषां ते भूवादयः एक आदिशब्दो व्यवस्थावाची तत्र भूपदार्थस्य एकश्च प्रकारवाची तत्र वापदार्थस्यान्वयस्तथा च भूप्रभृतयो वासदृशा इत्यर्थो लभ्यते सादृश्यं च क्रियावाचकत्वेन तथा च क्रियावाचिनो भ्वादयो धातुसंज्ञां लभन्त इति सूत्रार्थः क्रिया च व्यापार एव तथा च व्यापारवाचकत्वाभावे धातुसंज्ञैव न स्यादिति धातुत्वान्यथानुपपत्तिरेव भ्वादीनां क्रियावाचितां गमयतीति ।

७६—१८ आहुरिति । तथा च देवदत्तस्तण्डुलं पचतीत्यत्र देवदत्तस्याभेदसम्बन्धेन तिङर्थैकत्वस्य च समवायेन तिङर्थाश्रयेऽन्वयः । तिङर्थाश्रयस्य वृत्तित्वसम्बन्धेन, क्रियाकर्मभावसम्बन्धेन तण्डुलान्वितफलस्य अनुकूलत्वसम्बन्धेन, वर्तमानकालस्य च वृत्तित्वसम्बन्धेन, व्यापारेऽन्वयः इति देवदत्ताभिन्नैकत्वावच्छिन्नाश्रयवृत्तिस्तण्डुलकर्मकविक्लित्त्यनुकूलो वर्तमानकालिको व्यापार इति बोधः भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इति निरुक्तात् । एवं देवदत्तो ग्रामं गच्छतीत्यत्र देवदत्ताभिन्नैकत्वावच्छिन्नाश्रयवृत्तिर्ग्रामकर्मकसंयोगानुकूलो वर्तमानकालिको व्यापारः इति बोधः । एवं देवदत्तो हरिंभजतीत्यत्र देवदत्ताभिन्नैकत्वावच्छिन्नाश्रयवृत्तिर्हरिकर्मकप्रीत्यनुकूलो वर्तमानकालिको व्यापारः इति बोधः एवमन्यत्राप्यूह्यम् ।

देवदत्तेन तण्डुलः पच्यते इत्यत्र फलविशिष्यको बोधः भावप्रधानमिति निरुक्तवचनेन व्यापारस्येव भवत्यसौ भाव इति व्युत्पत्त्या फलस्यापि विशेष्यताया लाभात् सुप आत्मनः क्यजिति सूत्रभाष्याच्च तथाहि तत्र पुत्रमिच्छतीत्यत्रेव पुत्र इष्यते इत्यत्र क्यच्कुतो नेत्याशङ्क्य भिन्नार्थकत्वान्नेति समाहितं तस्य भिन्नविशेष्यकत्वादित्यर्थः इति एवं च देवदत्तस्य क्रियाकर्तृभावसम्बन्धेन व्यापारे तस्य च जन्यत्वसम्बन्धेन फले तण्डुलस्य चाभेदेन तेप्रत्ययार्थाश्रये तत्रैवै-कत्वसंख्याया अन्वय इति । देवदत्तकर्तृकवर्तमानकालिकव्यापारजन्या तण्डुलाभिन्नैकत्वावच्छिन्नाश्रयवृत्तिर्विक्लित्तिरिति बोधः देवदत्तेन ग्रामो गम्यत इत्यत्र देवदत्तकर्तृकवर्तमानकालिकव्यापारजन्यः ग्रामाभिन्नैकत्वावच्छिन्नाश्रयवृत्तिः संयोग इति बोधः देवदत्तेन हरिः भज्यते इत्यत्र देवदत्तकर्तृकवर्तमानकालिकव्यापारजन्या हर्यभिन्नैकत्वावच्छिन्नाश्रयवृत्तिः प्रीतिरिति बोधः ।

७६—२३ आहेति । अत्रारुचिवीजं तु एकत्रान्वितस्यापरत्र विशेषणतयान्वयायोग इति व्युत्पत्त्या व्यवस्थायामन्वितस्य भूपदार्थस्य प्रकारेऽन्वयायोग एवेति बोध्यम् ।

७६—२४ अत्र मण्डन इति । एतन्मते देवदत्तस्तण्डुलं पचतीत्यत्र एकत्वावच्छिन्नदेवदत्तवृत्तिः तण्डुलनिष्ठविक्लित्त्यनुकूलो वर्तमानकालिको व्यापार इति बोधः प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोश्च प्रत्ययार्थः प्रधानमिति न्यायात् भावप्रधानमिति निरुक्ताच्च । देवदत्तेन ग्रामो गम्यते इत्यादावपि व्यापारविशेष्यक एव बोधः ।

७६—३२ ग्रामो गमनवान् इति । भावार्थकप्रत्ययानां साधुत्वमात्रार्थकतया धातोश्च फलमात्रबोधकतया गमनं संयोग एव तथा च ग्रामः संयोगवान् इतिवत् ग्रामो गमनवानित्यपि स्यादिति भावः ।

७६—३३ निरूपकत्वादिसम्बन्धविशेषेणेति । अयं भावः यथा संयोगस्य समवायेन कुण्डवदरोभयनिष्ठत्वेऽपि कुण्डे वदरमिति प्रयोगो भवति न तु वदरे कुण्डमिति वदरानुयोगिकसंयोगस्य वृत्त्यनियामकत्वात् एवं ग्रामो गमनवानिति प्रयोगो न भवति ग्रामानुयोगिकस्य संयोगस्य वृत्त्यनियामकत्वादिति ।

७७—२६ इत्याहुरिति । ग्रामो गम्यत इत्यादौ च तेप्रत्ययेन फलं बोध्यत इति तेषामाशयः ।

७८—२६ घञादिसमभिव्याहारस्येति । तथा च गमधातोः संयोगमात्रार्थकत्वेऽपि ल्युडादिसमभिव्याहारे व्यापारे लक्षणया न ग्रामो गमनवानिति प्रयोगस्यापत्तिः । फलप्रत्ययेति । धातुना फलोपस्थितौ जननीयायां तदुत्तरघञादिप्रत्ययज्ञानं प्रतिबन्धकमिति भावः ।

केचित्तु भाव इति सूत्रेण भावप्रत्ययस्य व्यापारवाचित्वं न तु साधुत्वमात्रार्थत्वं तदा उक्तप्रयोगाणामापत्तिर्नास्तीत्याहुः । तन्मतं खण्डयति–घञादेरिति ।

७८—२९ इदानीं वैयाकरणमतमुपसंहरति स्वमते–अतः फलव्यापारौ धात्वर्थ इति ।

७९—३ तावदन्यतमत्वमिति । अतो न नानार्थत्वम् अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वस्यैव नानार्थत्वात् । ननु अन्यतमत्वस्य शक्यतावच्छेदकत्वे स्वप्रतियोगिकभेदद्वयाधिकभेदावच्छिन्नप्रतियोगिताकभेदवत्त्वरूपस्य तस्य शक्यतावच्छेदकत्वेऽत्यन्तं गौरवमिति चेन्न–अन्यतमत्वस्य तावत्समुदायवृत्तिधर्मविशेषस्य अखण्डोपाधेरङ्गीकारेणादोषात् तस्याखण्डत्वे विवादेऽप्याह—फलानुकूलत्वमिति ।

७१—८ विवक्षाया इति । तथा च यदा यदीयो व्यापारो धातुवाच्यत्वेन विवक्ष्यते

तदा स कर्ता इति करणादिव्यापारस्य धातुवाच्यत्वेन विवक्षायां काष्ठानि पचन्तीति इष्यत एव तदुक्तं हरिणा–धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यत इति ।

७९—२९ प्रत्ययार्थोद्देशेनेति । यः प्रत्ययार्थः स प्रधानम् इत्यर्थस्वीकारे असति प्रतिबन्धके उद्देश्यतावच्छेदकव्यापकत्वं विधेये भासत इति नियमेन प्रत्ययार्थत्वव्यापकत्वं प्राधान्ये भासेत तच्च न सम्भवति लिङ्गसंख्ययोः प्रत्ययार्थत्वेऽपि प्रधानत्वाभावात् । नापि यः प्रधानं स प्रत्ययार्थ इत्यर्थः खट्वा इत्यादौ खट्वायाः प्राधान्येऽपि प्रत्ययार्थत्वाभावेन प्रत्ययार्थत्वस्य प्राधान्यव्यापकत्वायोगादिति भावः ।

८०—१ यतो वाच्य इति । न च लःकर्मणि च भावे चाकर्मकेभ्यः इति सूत्रे कर्तरि कृदिति सूत्रात्कर्तरीत्यस्यानुवृत्त्या कर्तरि लकारविधानात्कथमेतदिति वाच्यम् कर्तृपदस्य भावप्रधाननिर्देशेन कृतिपरत्वेन कृतौ लकारविधानलाभात् कर्तरि कृदित्यत्र तु न कृतिपरत्वं देवदत्तः कर्तेत्यादौ सामानाधिकरण्यानुरोधेन कर्तृपरत्वस्यैवौचित्यात् न चैवं शब्दाधिकाराश्रयणापत्तिः, शक्तिः कारकं शक्तिमच्च कारकमिति पक्षयोर्महाभाष्ये उक्ततया कर्तरि कृदित्यत्र शक्तिमत्परस्यापि कर्तृपदस्य उत्तरत्र शक्तिपरत्वे बाधकाभावात् ।

८०—१३ प्रत्ययार्थप्राधान्यबोधकस्मृतेरिति । प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति स्मृतेरित्यर्थः । न च भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इति स्मृत्या विरोध इति वाच्यम् भावप्रधानमित्यत्र भावस्य धात्वर्थस्य प्रधानं भावप्रधानमिति तत्पुरुषेण आख्यातपदस्य च तिङ्परत्वेन धात्वर्थापेक्षया तिङर्थः प्रधानमित्यर्थस्य प्रकृतिप्रत्यययोरिति न्यायैकवाक्यतानुरोधेन स्वीकारेणादोषात् ।

८०—१६ तण्डुलादौ वेति । वस्तुतस्तु कर्मणि ल इत्यस्य कर्मत्वे ल इत्यर्थेन फलमेव कर्मप्रत्ययार्थः तदा च देवदत्तेन तण्डुलः पच्यते इत्यादौ देवदत्तवृत्तिकृतिजन्यो यो विक्लित्त्यनुकलव्यापारस्तज्जन्यविक्लित्तिमान् तण्डुल इति बोधः फलव्यापारयोश्च विशिष्ट एव शक्तिः तृतीयार्थश्च कृतिः आनुभाविकत्वात्फलस्य द्विधाभानं न क्षतिकरम् व्यापारमात्रं वा धात्वर्थः कर्मद्वितीयया कर्माख्यातेन वा फलस्य भान सम्भवादिति बोध्यम् ।

८०—२९ जन्यत्वादि चेति । फले व्यापारे च खण्डशः शक्तिः कर्तृप्रत्ययस्थले अनुकूलत्वं कर्माख्याते च जन्यत्वं संसर्गमर्यादया भासत इति भावः ।

८१—८ किंच यतते इति । प्रकृत्या प्रत्ययेन च कृतेरेवोपस्थित्या घटो घट इति वदनन्वयापत्तिरित्यर्थः ।

८१—२४ अखण्डोपाधिरूपमिति । अत एव राजपुरोहितौ सायुज्यकामौ यजेयाताम् इत्यादौ कर्तृत्वस्य राजपुरुषयोः पर्याप्तिः कृतिरूपत्वे तु कृतेरव्यासज्यवृत्तितया सा न स्यादित्याह अत एवेति ।

८२—१० अनेनेति । प्रत्याहारान्तः पातिनामनुप्रयोगस्वीकारे तद्बहिर्भूतस्य यतते कथमनुप्रयोगापादनमिति चिन्त्यमिदम् ।

८५—३ साक्षात्परम्परासम्बन्धेनेति । पिङ्गाक्ष्यादेः साक्षादारुण्यादेः परम्परयेत्यर्थः । यद्वा तण्डुलादेर्विक्लित्तावन्वयेन परम्परया तस्य व्यापारेन्वयः । केचित्तु तण्डुलादेरपि व्यापार एवान्वय इति वदन्ति ।

८५—७ यजेतेत्यादावाश्रयेति । दम्पत्योः सहाधिकारेण कर्तृत्वाश्रयभेदेऽपि एकस्यैव कर्तृत्वस्योभयत्रपर्याप्तेः तत्रैकत्वान्वयो नानुपपन्न इति भावः ।

८६—२१ अनुशासनैकवाक्यतेयति। कर्तृगते कर्मगते वाऽनाभिहिते एकत्वादा तृतीयाद्येकवचनदिरिति सूत्रार्थः।

८७—३३ लट्प्रयोगाधिकरणेति। अत्र लट्प्रयोगाधिकरणकालपदेन प्रहरात्मकं दिनात्मकं वा कालमादाय पाकानन्तरमपि पचतीति स्यादत आह लट्शब्देति। कालोपाधेः क्षणादिरूपस्य ग्रहणे न दोष इति भावः। अत्रापि प्रहरात्मककालोपाधिमादाय दोषतादवस्थ्यमित्यत आह—अतीतेति। वर्तमानकालोऽपि भाविकालमादाय अतीतभविष्यत्कालातिरिक्तः स्यादतः यस्माद्धातोवर्तमानकालिकः प्रत्ययश्चिकीर्षितस्तद्धातुविशिष्टत्वं वर्तमानत्वम् वैशिष्ट्यं च स्वप्रयोगाधिकरणत्व स्ववाच्यक्रियाकलापविशिष्टत्वोभयसम्बन्धेन अत्र वैशिष्ट्यं स्वघटकाद्यक्रियाप्रागभावानधिकरणत्व स्वघटकचरमक्रियाध्वंसानधिकरणत्व स्वघटकक्रियाधिकरणत्वैतत्रितयसम्बन्धेन। अतीते वर्तमानत्वविवक्षया लड्वारणायाद्यदलम्। क्रियारम्भप्राक्कालमादाय वर्तमानत्ववारणाय क्रियाकलापवैशिष्ट्यनियामक आद्यः सम्बन्धः क्रियारम्भप्राक्कालमादाय वर्तमानत्ववारणाय द्वितीयः यत्र पाक उपक्रान्तः प्रतिबन्धकवशाच्च न सम्पन्नस्तत्र पचतीतिवारणाय तृतीयः सम्बन्धः।

८९—११ वाक्यपरिसंख्यार्थमिति। समासेतरस्य पूर्वभागपदकसमुदायेतरस्य प्रतिपदिकसंज्ञा नेति तदर्थः। 'तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते' इति हि परिसंख्या लक्षणम्। वैयाकरणास्तु नियमपरिसंख्ययोरुभयोरपि अन्यनिवृत्तिरूपफलसाम्येन 'भक्ष्यनियमे अभक्ष्यप्रतिषेधो गम्यते' इतिमहाभाष्येण च नियमत्वं व्यवहरन्ति

९०—१० हेतुतापीति। गोत्वप्रकारकबोधं प्रति गोत्वशक्तं गोपदमिति शक्तिज्ञानं कारणम् न तु गोत्वं गोपदशक्यमित्याकारकं तथा सति गोत्वत्वस्य धर्मितावच्छेदकत्वेन गौरवापत्तेः।

९०—२१ समानसंविदिति। एका या संविद् तद्वेद्यत्वम्—एकज्ञानविषयत्वमिति यावत् यज्ज्ञाने घटत्वं भासते तत्रैव घटोऽपीति भावः।

९४—६ ज्ञोऽविदर्थस्येति। अविदर्थस्येति च्छेदः, अन्यथा लाघवायासन्देहाय च विदर्थस्य ज्ञ इत्येव वदेत्।

९८—६ यस्य चेश्वरवचनमिति। उच्यते इति वचनम् ईश्वरवचनमितिपदं तन्त्रेण यन्निष्ठमीश्वरत्वमुच्यते इत्यर्थकं यस्य ईश्वर उच्यते इत्यर्थकं च। तत्राद्योदाहरणम् अधिरामे भूः, द्वितीयोदाहरणं अधि भुवि राम इति।

९९—७ सहयुक्त इति। अप्रधानत्वं शाब्दगुणक्रियान्वयित्वाभावरूपम् पुत्रसाहित्यविशिष्टः पिता आगत इत्यत्र शाब्दबोधे पुत्रस्य न आगमनक्रियायामन्वयोऽतोऽप्रधानत्वम्।

९९—१६ येनाङ्गविकार इति। अङ्गशब्दोऽर्थआद्यजन्तः तेन अङ्गिनो विकार इत्यर्थः।

रामेश्वरतनूजन्मा सूर्यनारायणः सुधीः।
भाट्टचिन्तामणेस्तर्कपादेऽकार्षीत्सुटिप्पणम्॥

इति भाट्टचिन्तामणि मयूखे तर्कपादः समाप्त।